14. Vs: Viśvanātha's commentary on Vr. The ms. used by me is No. 608 of 1887–91 of the Bhandarkar Institute. Viśvanātha was the son of Śrīnātha. He composed this commentary called Prabhā for honouring King Harisiṅha (who is described as the builder of a fort: *susuvarṇamayam hi devadurgam racitam mālavamaṇḍanam kulam ca*). Viśvanātha does not always compose or give illustrations, but sometimes quotes from the five Mahākāvyas.

15. Wa: This is Chamber's ms. No. 576 containing Bhāskara's Setu on Vr. This along with the five others mentioned below, was used by Weber for his edition of Piṅgala's Chandassūtra at Indische Studien Vol. VIII pp. 157 to 457. The mss. are described at pp. 206–207, in that Volume.

16. Wb: This is Chamber's ms. No. 690 containing chs. 1–5 only, of the text.

17. Wc: This is Chamber's ms. No. 525 A, containing only chs. 1–3, of the text.

18. Wd: This is Chamber's ms. No. 525 B containing chs. 1 and 2 only, of the text.

19. Wg: This is a copy of the text of Vr. collated from five mss. written in the Sinhalese script and two mss. of Rāmacandra's Pañjikā on Vr. composed in Ceylon in the 16th century A. D. This copy was prepared by one Mr. Grimbolt for Weber and it faithfully represents the Ceylonese version of the text of Vr. as Weber points out. It usually agrees with Rm. mentioned above.

20. Wr. A lithograph edition of the Setu of Bhāskara also called Hari Bhsākara. This differs very rarely from Wa or Br. I have referred to this only now and then.

The following points should be noted before using this edition.

(1) In the variant readings given in the last paragraph on each page, the references are to the numbers of the stanzas (and their lines marked as a, b, c, d, etc.), or of the Sūtras as the case may be. A small dash (–) before the letters and a small zero (0) after them respectively indicate that the preceding and the succeeding portions of the line do not differ from the constituted text.

(2) Additional stanzas found in the authorities consulted by me for the edition are given in the second paragraph on the page with additional numbers after the last Sūtra of a section, which is indicated by an asterisk (*). All these additional stanzas or lines of definitions are arranged in an alphabetical order of the Gaṇas occurring in them. A Roman T within the brackets after a reference indicates that the particular authority considers the line or Sūtra as a part of the text of Vr. and not as an addition. Manuscripts of the text of Vr. and the commentators Br. and Rm. do not give any indication of an addition; other commentators either indicate them by giving them all without commentary at the end of a section (Sd, Sk, Sm, Su, Vs), or, introduce them with such words as *kutracid adhikam*, *tathā ca* etc., (Jn, Nr, Ss). Metres with identical Gaṇas but with different names are given under the same number, but marked with different letters of the alphabet. On the other hand, metres with identical names, but having different Gaṇas, are given under different numbers according to the alphabetical order of the Gaṇas.

(3) Important variant readings in these additions are given immediately after them with the help of a dash and a zero as in the case of the text variants; see above under no. (1). Minor variants in them are indicated by means of brackets just in the additional Sūtra itself; here a letter or letters given in the brackets stand for an equal number of letters immediately preceding the brackets.

4, Chandonus'āsana of Hemacandra,

In constituting the text of the Chandonuśāsana of Hemacandra, I have used two mss. of the work and a printed edition of the same. The mss. are :–

A. Ms. No. 265 of A. 1882–83 at the Bhandarkar Institute, Poona. It has four folios and contains only the Sūtras, written neatly and generally without mistakes. The ms. has however, a break in ch. 2 where Sūtras 137 to 373 are missing.

B. Ms. No. 115 of the Descriptive Catalogue of mss. in the BBRAS., library, Town Hall Bombay. This contains the Sūtras with the Svopajña Vṛtti; but is incomplete running only upto the end of the Udgatā group in chapter 3.

P. In addition to these two, I have used the printed edition of the work published at the Nirnaya Sagar Press, Bombay, 1912.

In reading the Sūtras the following points should be noted: The number of Gaṇas whether of the Varṇas or of the Mātrās is indicated by a vowel which stands at the corresponding place in the list of vowels, added to the consonent signifying the Gaṇa. Thus mā mi mī mu mū mṛ mṝ mḷ mḹ respectively signify 2, 3, 4, 5, 6, 7, 8, 9, and 10 ma Gaṇas; gā gi gī etc., signify 2, 3, 4 long letters; dā di dī etc., tā ti tī etc., pā pi pī etc., signify 2, 3, 4, etc., Dvimātra, Trimātra and Pañcamātra Gaṇas. Further, these letters or their groups are declined like similar vowel–ending words except when they end in ā. Letters ending in ā and signifying 2 Gaṇas are allowed to stand only in the middle of a compound of such letters. On the other hand, single letters signifing 2 Gaṇas of the same class are shown by the dual forms of that letter which is treated as ending in ā.

IV. Jayadāman: Vṛttakusumoccaya.

(A Classified List:- A Critical Survey).

The Vṛttakusumoccaya or the Alphabetical list is strung together from metres that have been defined by nine ancient writers on Sanskrit prosody, beginning with Piṅgala and ending with Hemacandra. A few more metres are added from some later works, the choice being purely subjective; as far as possible however, metres which are closely allied with those that are defined in the older works have been chosen from the later works. This broadly represents the theory about these metres as current in ancient India. This List contains about 850 metres of which over 600 are the Varṇa Vṛttas of the Sama Catuṣpadī type, distributed over 30 different heads accodding as they contain 1 to 45 letters in each of their 4 lines. It contains 33 Daṇḍakas, 50 Ardhasama Catuṣpadīs, 36 Viṣama Catuṣpadīs and 42 Mātrā Vṛttas, of which latter, 14 are Dvipadīs and 28 are Catuṣpadīs. Out of this very large number of metres however, a few alone were being actually handled by the Sanskrit poets of roughly the period which is represented by the above mentioned prosodists. In a separate article published in the Journal BBRAS., 1948, I have analysed metrically the Mahākāvyas of about 28 Mahākavis, from Aśvaghoṣa (2nd century A. D.) to Śivasvāmin (16th century A. D.). From this analysis, it has been found out that out of the 600 Varṇa Vṛtta Sama Catuṣpadīs only about 100 seem to have been actually used by the poets, and even out of this 100 hardly more than 25 were employed with any frequency, e. g., for the composition of a canto in a poem, while the rest were used only for a change or ornamentation. The Daṇḍakas are very rarely used in the poems and dramas. Out of the Ardha Sama Catuṣpadīs, only 3 namely, Viyoginī, Mālabhāriṇī and Puṣpitāgrā, were popular with the Mahākavis,

while only a single Viṣama Catuṣpadī, namely the Udgatā, has found favour with them. These four metres were first used for the composition of a canto by Aśvaghoṣa. Among the Mātrā Vṛttas, Āryā with its derivatives like the Gīti was however repeatedly employed by the poets and particularly the vercifiers who composed treatises on philosophical and other topics; but Vaitālīya and Aupacchandasika were also used by the Mahākavis though on comparatively rare occasions.

It may be concluded on the whole, that the Anuṣṭubh, the Upajāti and to a certain extent, also the Vaṃs'astha were the commonest among the Mahākavis; that these same three along with the Vasantatilaka and S'ārdūlavikrīḍita were similarly so among the Khaṇḍakavis and the Campūkāras; while the Nāṭakakavis generally showed preference to longer metres like Śārdūlavikrīḍita Sragdharā and others in addition to Upajāti, Vaṃs'astha and Vasantatilaka. In the Mahākāvyas and the Khaṇḍakāvyas including the Campūs, a topic is often pursued in several stanzas at a stretch; but in a Nāṭaka this is generally not so. Each stanza as a rule, is a separate entity in a Nāṭaka and this is probably why the Nāṭakakavis show preference to longer metres. Anuṣṭubh is comparatively rare among them, except in the case of Bhāsa and Bhavabhūti. The Anuṣṭubh, though easiest to handle for composition in the dramas, is yet most illusive and unyielding except to a great and really skilful artist in point of effectiveness. Its small compass and want of elaborate Varṇa Saṅgīta usually prevent a lesser artist from making it pregnant, elegant and agreeable to the ear.

As regards the names of the metres, they are mostly of the feminine gender, but a fairly large number has also names of the neuter gender, while comparatively only a few have masculine names given to them. Thus out of nearly 950 names of the metres recorded in the Varṇasūcī or the

Alphabetical Index, 610 are in the feminine, 213 in the neuter and 129 in the Masculine gender. The names appear to have been given at random and only rarely do they signify the rhythm, the nature, the appearance or the figure when drawn in a picture, of the particular metre. Such for example are to be found among those which end in words like *gati*, *vilāsa*, *vibhrama*, *vilasita*, *lalita*, *vikrīḍita* and the like, attached to the names of birds and animals. Names of animals and birds, of trees and creepers particularly the flowering ones, of ornaments and decorations are freely used; but proper names of human beings are extremely rare, though romantically significant adjectives used by the Sanskrit poets for men and women are quite in abundance here. When the names consist of compounds, words like *mālā*, *latā*, *mukha*, *prabhā*, *locana*, *pada*, *bhāṣiṇi*, *madhyā*, *lekhā*, *dāma* and their synonyms, besides the words indicative of movement noted above, are employed as the second members. Some of these names, not more than 40, appear to have been old and therefore traditionally handed down. They are almost identically employed by all the prosodists whom I have utilised. Such e. g., are:— Tanumadhyā (6. 3), Kumāralalitā (7. 2), Māṇavaka (8. 17), Vidyunmālā (8. 22), Samānī (8. 25), Śuddhavirāṭ (10. 24), Mayūrasāriṇī (10. 26), Indravajrā (11. 1), Upendravajrā (11. 8), Śālinī (11. 29), Bhramaravilasita (11. 31), Svāgatā (11. 38), Rathoddhatā (11. 39), Mauktikadāman (12. 1), Indravaṃśā (12. 9), Bhujaṅgaprayāta (12. 48), Asaṃbādhā (14. 25), Maṇiguṇanikara (15. 9), Śikhariṇī (17. 18), Mandākrāntā (17. 15), Vaṃśapattrapatita (17. 14), Śārdūlavikrīḍita (19. 14), Suvadanā (20, 11), Krauñcapadā (25. 4), Apavāha (26. 7), and Bhujaṅgavijṛmbhita (26. 8) in the Sama Catuṣpadis; Bhadravirāṭ (III. 12), Ketumatī (III. 13), Aparavaktra (III. 21), Hariṇapluta (III. 24), and Puṣpitāgrā (III. 36) in the Ardhasama Catuṣpadīs; almost all the Mātrā Vṛttas and

most of the Viṣama Vṛttas. On the other hand, different names are given to the same metre by different writers, and similarly the same name given to different metres by different writers. Some of the names of this latter kind which are given to more than five metres, are Candralekhā, Candrikā, Jayā, Nandinī, Rucirā, Lakṣmī and Lalitā. *Sometime, it is possible to discern a distinct tradition* among the Jain authors about the names of metres.

It is interesting to note how among the Sama Vṛtta Catuṣpadīs those that have between 6 and 16 letters in a line have a larger number of varieties when compared with those that have less than 6 or more than 16 letters in each of their four lines. The reason is obvious: Metres containing less than 5 letters in a line were introduced into the field in an artificial manner – in a spirit of systematization – and at a later stage as pointed out by me in the General Introduction. As regards the metres of longer lines they were not much favoured by artists owing to their clumsiness and cumbrousness. On the other hand, in view of reasons stated above, p. 15, it is but natural that metres with lines of 11 and 12 letters in a line should have the largest number of varieties.

From a reference to the Classified List, it would be seen how the poet–prosodists seek to effect a different variety of a metre by (1) an exchange of Trikas in lines of equal length; (2) an exchange of places among the lines of metres whose stanzas are made up of lines of unequal length, both in the Varṇa and the Mātrā Vṛttas; (3) a balance secured by the introduction of the opposite Trikas, usually *ta* and *ya*, *ja* and *ra*, sometimes *bha* and *sa* and rarely if at all *na* and *ma*, in the case of lines which form the hemistichs and lastly (4) a shifting of short and long letters in the case of the Mātrā Vṛttas, Catuṣpadīs in particular. Most ot these manipulations indicate a clear consciousness that a change in the order of short and long letters

in a line effects a change in the nature of a metre, and this unmistakably proves my thesis about the origin and growth of the Varṇa Vṛttas on the basis of the music of sound-variation, or the Varṇa Saṅgīta, as distinct from the Svara and the Tāla Saṅgīta.

H. D. Velankar

अथ जयदेवच्छन्दः ।

प्रथमोऽध्यायः ।

गायत्रं छन्दसां पूर्वं वर्धमानाक्षरं परम् ।
वाङ्मण्डनकरं नौमि चित्रवृत्तप्रसिद्धये ॥ १ ॥

शंकरं शाश्वतं शौरिं प्रणम्य विवृणोम्यहम् ।
जयदेवानि सूत्राणि स्वरूपविधिना स्फुटम् ॥

अत्र आद्येन श्लोकपदत्रयेणेष्टदेवतानमस्कारं करोत्याचार्योऽपरेण चतुर्थेन संबन्धादिकथनम् । यस्मात्क्रियारम्भे विघ्नविनायकोपसर्गोपशमाय शिष्टा इष्टदेवतानमस्कारं कुर्वन्ति । ततोऽर्थादिनिधेर्धर्मस्य वृद्धिरधर्मस्य हानिर (+त) स्तत्प्रभवानां(णां) विघ्नादि(दी)नामुपशमः । कारणाभावे कार्यस्याप्यभावात् । ततोऽभीष्टार्थसिद्धिरिति । तद्गायत्रं गायत्राभिधानं छन्दो नौमि स्तौमि । गायत्र्येव गायत्रम् । प्रज्ञादित्वात्स्वार्थे अण् (पा० ५.४.३८) अथवा च्छन्दसः प्रत्यविधानो नपुंसकात्स्वार्थां इत्यण् । कीदृक् । छन्दसां पूर्वम् । छन्दसामुष्णिगादीनां पूर्वमाद्यं प्रथमं प्रधानं च । छन्दोक्षराणामियत्ताविशेष इति । तथा वर्द्धमानाक्षरं परम् । न केवलं गायत्रं नौमि । यावत्परमनन्तरपठितं उष्णिगादि च्छन्दः उत्कृतिपर्यन्तमपि नौमि । अथवा परं प्रधानं देवतात्मकत्वात् । कीदृक् । वर्धमानाक्षरम् । वर्धमानमधिकीभवदक्षरं बलं यस्मिन्यस्य वा तद्वर्धमानाक्षरं उष्णिगादिच्छन्दः । अथवा वर्धमानान्यक्षराणि यतः तद्वर्द्धमानाक्षरं गायत्रम् । वाङ्मण्डनकरम् । वाचां मण्डनं वाङ्मण्डनम् । तदवश्यं करोतीति कृञो हेतुताच्छील्ये टः । गिरामलंकरणं भूषणकरम्[१] ।

केयूराणि न भूषयन्ति[३] पुरुषं[४] हाराश्च चन्द्रप्रभाः[५]
न[६] स्नानं न च वर्णको न कुसुमं नाकुण्ठिता मूर्द्धजाः ।
एका वाक्समलंकरोति पुरुषं या संस्कृतं भाषते
क्षीयन्ते किल भूषणान्यभरणाँ वाग्भूषणं त्वक्षयम् ॥

---

१ प्रज्ञादि A; २ भषणकरम् A; ३ भषयन्ति A; ४ पुरुषां A; ५ चन्द A; ६ नास्नानं A; ७ न्यमरहो B.

सर्वादिमध्यान्तग्लौ त्रिकौ म्नौ भ्यौ जौ स्तौ ॥ २ ॥ मात्रिको लृजुः ॥ ३ ॥ वान्ते ग्वक्रः ॥ ४ ॥ संयोगादिपरः ॥ ५ ॥ दीर्घप्लुतौ

संस्कारकमित्यनर्थान्तरम् । किमर्थम् । चित्रवृत्तप्रसिद्धये । चित्राणि च तानि वृत्तानि चित्रवृत्तानि नानाप्रकाराणि अक्षरविन्यासरूपाणि तनुमध्यादीनि तेषां प्रसिद्धये निष्पत्तये प्रतिपत्त्यर्थम् । तादर्थ्ये च चतुर्थी । अथवा वर्धमानाक्षराभिधानमाचार्यं नौमि । कीदृशम् । गायत्रम् । गायन्तीति[३] गायाः शिष्यास्तांस्त्रायत इति गायत्रम् । स्पष्टमन्यत् । अनेन च देवतास्तुतिपूर्वं स्तोतृजन[४]प्रवर्तननिमित्तं संबन्धादिकथनं विदधाति । तत्र साध्यसाधनलक्षणः संबन्धः वाच्यवाचकलक्षणो वा । छन्दांस्यभिधेयानि । तत्परिज्ञानं प्रयोजनम् । वैदिका(+ना)मुपस्थानादौ विनियुक्तानां गायत्र्यादीनां परिज्ञानस्य पुरुषार्थसाधनत्विधि एषिर्थ[६] (?) धिकारित्वसंपत्त्या स्वर्गाद्यवाप्तिप्रयोजनमिति । तथा च छन्दोऽज्ञानस्यानधिकारश्रुतिरियं दर्शयति । यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वा अध्यापयति वा स्थाणुं वांछति (वार्छति?) गंत्तं (गर्तं?) वा प्रपद्यते प्र वा मीयते । पापीयान्स भवति यातयामान्यस्य च्छन्दांसि भवन्तीति । तस्माद्विदुषोऽधिकारः । विद्वत्ता[७] च षडङ्ग[८]वेदवेदनेन । इदं वेदाङ्गम् । तथा चोक्तम् ।

शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां गतिः ।

च्छन्दोधि(वि)चितिषष्ठश्च[९] षडङ्गो वेद उच्यते ॥

इति । आर्यादीनां तु लौकिनानां वृत्तानां परिज्ञानस्य चतुर्वर्गमार्गादिकाव्यविरचनं प्रयोजनम् । तथा चोक्तम् । उपेयुषामपि दिवं सन्निबद्धावधायिनाम् । ॥ १ ॥ एष एवार्थः केनचिच्छन्दोविदा श्लोकेनाभिहितः—

मस्त्रिगुरुस्त्रिलघुश्च नकारो भादिगुरुश्च तथादिलघुर्यः ।

जो गुरुमध्यगतो रलमध्यस्सोन्तगुरुः कथितोन्तलघुस्तः ॥ इति ।

प्रस्तारो मकारस्त्यऽऽऽ; नकारस्य ।।।; भकारस्य ऽ।। ; यकारस्य ।ऽऽ; जकारस्य ।ऽ।; रेफस्यऽ।ऽ; सकारस्य ।।ऽ; तकारस्य ऽऽ।;॥ २ ॥ मात्रापरिमाणं यस्य स मात्रिक इति । तदस्य परिमाणमिति ठक् । स लघुसंज्ञो भवति । स च ऋजुः शराकारः[१०] । स्पष्टप्रस्तारः । ३ ॥ मात्रिक इति वर्तते । अन्ते वर्तमानो मात्रिको[११]

---

१ मातृको A; B; C; २ राविधान A; ३ गायन्तिति A; ४ स्तोत्रजन B; ५ तद B; ६ पषिव्य A. ७ विद्विता A; ८ षडङ्गोवेद A; ९ षस्वश्च A; षष्ठश्च B. १० सराकारः A; B; ११ मातृको A; B.

च ॥ ६ ॥ द्विमात्रोऽसौ ॥ ७ ॥ समुद्रादिर्लोकात् ॥ ८ ॥ विरामो यतिरिति ॥ ९ ॥

इति जयदेवच्छन्दसि प्रथमोऽध्यायः ॥ १ ॥

वा गुरुसंज्ञो भवति । स च वक्रः कुटिलः प्रस्तार्यः । वा शब्दो व्यवस्थितविकल्पविज्ञानार्थः । तेन क्वचिन्न भवत्येव अन्ते मात्रिकस्य[१] गुरुसंज्ञा । यथा अचलधृतिसमानीप्रभृतेः । अच (+ल) धृतेः समान्याश्च[२] लक्षणं वक्ष्यते 'द्विकविहृतवसुलघुः' इति, तथा 'ग्लौ समान्यनुष्टुभि' इति । क्वचित्तु भवत्येव । यथा वसन्ततिलकादिः (देः) । तस्य च लक्षणं वक्ष्यते 'त्भौजौ वसन्ततिलकं[३] गुरुच(क) द्वयं चेत्' इति । भवति च न भवति च । यथा अनङ्गक्रीडा । तस्या हि पूर्वार्द्धान्ते गुरुः । चरमार्द्धान्ते तु लघुः । गुरोः प्रस्तारः ऽ॥ ॥ ४ ॥ मात्रिके[४] इति वर्तते गिति च । संयोगं[५] आदिर्येषां विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारानुनासिकानां ते संयोगादयः ते परे यस्मात्स मात्रिको[६] गुरुसंज्ञो भवति । संयोगादीनां क्रमेणोदाहरणान्युपदर्श्यन्ते । विष्णुः । हरिः । देवः कृपावान् । एनसः पाति । नरसिंहः । मधौ (मध्वौ ?) ॥ ५ ॥ गिरिति वर्तते । दीर्घप्लुतौ च गुरुसंज्ञौ भवतः । आ ई ऊ ॠ ॡ इति दीर्घाः । दूराध्दूतादावेत एव प्लुताः ॥ ६ ॥ असौ ह्रस्वप्लुतरूपो गुरुर्द्विमात्रो वेदितव्यः । अतिदेशार्थमिदम् । ह्रस्वप्लुतौ द्विमात्रवद्भवत इत्यर्थः । आर्यावैतालीयादौ मात्राणां गणनार्थम् । दीर्घो हि गुरुर्यः स स्वतएव द्विमात्रः । अतो न तदर्थमिदं वचनम् । तथा च तत्रभवन्त आहुः ।

'द्विमात्रता न दीर्घार्था शिष्टयोस्त्वतिदिश्यते[७] ।
मात्रावृत्तेषु संख्यातुं मात्राः सा चोपयुज्यते ॥' इति ॥ ७ ॥

इह मकारादिसंज्ञाः शास्त्राङ्गतयोपयुज्यमाना[९] यथाभिहितास्तथा 'समुद्रर्तुलोकैः' इत्यादौ समुद्रादिशब्दैर्व्यवहरन्नपि[८][१०] चतुषट्सप्तसंख्यादीनां[११] समुद्रर्तुलोकादिसंज्ञाः कथं नाभिहितवानिति यश्चोदयेत्तं प्रत्याह । समुद्र आदिर्यस्य ऋतुप्रभृतेः स समुद्रादिरपि मकारादिवच्छास्त्रव्यवहाराङ्गम् । स लोकाद्वेदितव्यः । लोकेऽपि कथमिति चेल्लक्षणयेति ब्रूमः ॥ ८ ॥ विरतिर्विरामः समाप्तिः स यतिसंज्ञो भवति । इति शब्दोऽध्यायपरिसमाप्तिं द्योतयति ॥ ९ ॥

(इति श्री)भट्टमुकुलकात्मजहर्षटविरचितायां जयदेवच्छन्दोविवृतौ प्रथमोध्यायः ॥

---

१ मातृकस्य A; B. २ सामान्या० A; ३ तिलकं A; ४ मातृकः A; B; ५ संयोगादिर्येषां A; ६ मातृको A; B; ७ सिष्ट० A; B; ८ दिस्यते A; B; ९ सास्राङ्ग A; B; १० व्यवहारन्नपि A; B; ११ शंख्या० A; B.

द्वितीयोऽध्यायः ॥

छन्दः ॥ १ ॥ धातुर्गायत्र्याद्याः सप्ताष्टौ चतुर्भिरभिवृद्धाः ॥ २ ॥ यजुषां षडेकेन ॥ ३ ॥ देवानामेकम्[२] ॥ ४ ॥ असुराणां पञ्चदशोनाः ॥ ५ ॥

एवमनन्तरोदीरिताध्यायेन वक्ष्यमाणसमार्द्धसमविषमवृत्तादिलक्षणाङ्गतयोपयुज्यमानः संज्ञासंज्ञिसंबन्धोऽभिहितः । इदानीं वैदिकं छन्दो व्याख्यायते । छन्दःशब्दो वृत्ताधारवचनः । अक्षरकोशात्मकत्वात् । चन्दति ह्लादं करोति दीप्यते वा श्रव्यतया[३] इति छन्दः । छन्द इत्यधिकृतं वेदितव्यमासप्तमाध्यायपरिसमाप्तेः ॥१॥ छन्द इति वर्तते । धातुः प्रजापतेः । आदौ भवा आद्याः । गायत्र्याद्या यासां ताः गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुप्जगत्यः सप्त छन्दोजातयोऽष्टौ च वर्णाश्चतुर्भिश्चतुर्भिरभिवृद्धा भवन्ति । तत्र गायत्र्यष्टाक्षरा । इतरास्तु चतुर्भिश्चतुर्भिरभिवृद्धा भवन्ति । अत्र च चतुर्भिश्चतुर्भिरिति द्विरुक्त्यर्थोऽवश्य[४]मेवाश्रयणीयः[५] । अन्यथा उष्णिहैवानुष्टुबादयो निगीर्णाः स्युः । उष्णिहो द्वादशाक्षरत्वादनुष्टुबादीनां च । एवं वक्ष्यमाणेषु सूत्रेषु वाच्यम् । धात्रीयाणां गायत्र्यादीनां प्रस्तारः ॥ गा० ८; उ० १२; अ० १६; बृ० २०; पं० २४; त्रि० २८; ज० ३२ ॥ २ ॥ छन्दो गायत्र्याद्याः सप्त अभिवृद्धाः इति वर्तते । यजुषां गायत्र्याद्याः सप्त छन्दोजातयः षड्वर्णाः एकैकेनाभिवृद्धा भवन्ति । तत्र गायत्री षडक्षरा । इतरास्त्वेकैकेनाभिवृद्धाः । याजुषीणां गायत्र्यादीनां प्रस्तारः गा० ६; उ० ७; अ० ८; बृ० ९; पं० १०; त्रि० ११; ज० १२ ॥ ३ ॥ छन्दो गायत्र्याद्याः[६] सप्ताभिवृद्धा एकेन चेति वर्तते । देवानां गायत्र्याद्याः[६] सप्त छन्दोजातयः । एकं वर्णमेकैकेन अभिवृद्धं भवति । तत्र गायत्र्येकाक्षरा । इतरास्त्वेकैकाभिवृद्धाः । दैवीनां गायत्र्यादीनां प्रस्तारः । गा० १; उ० २; अ० ३; बृ० ४; पं० ५; त्रि० ६; ज० ७ ॥ ४ ॥ छन्दो गायत्र्याद्याः सप्तैकेन चेति वर्तते । अभिवृद्धा इति निवृत्तम् । असुराणां गायत्र्याद्याः सप्त छन्दोजातयः पञ्चदशवर्णा एकैकेन न्यूना भवन्ति । तत्र गायत्री पञ्चदशाक्षरा इतरास्त्वेकैकेन न्यूना भवन्ति । आसुरीणां गायत्र्यादीनां प्रस्तारः ॥ गा० १५; उ० १४; अ० १३; बृ० १२; प० ११; त्रि० १०; ज० ९ ॥ ५ ॥ छन्दो गायत्र्याद्याः सप्तेति वर्तते । यजुषामिमा[७] याजुष्यः । यार्जुष्यो[८] गायत्र्याद्याः सप्त छन्दोजातयो यथासंख्यं द्वित्रिचतुःषड्गुणा भवन्ति । अत्र संग्रहाय सार्द्धेयं गीत्यार्या ।

१ चतुर्भिर्वृद्धाः A; २ मेकः A; B; ३ स्रव्यतया A; B. ४ वस्य० A; B; ५ स्रयणीयः A; B; ६ गायत्राद्याः B. ७ यजुषानिमा A; B; ८ यजुषो A; यजुष्यो B.

याजुष्यो द्वित्रिचतुःषड्गुणाः सामर्ग्यति[1]ब्रह्मणामिति ॥ ६

[इति जयदेवछन्दसि] द्वितीयोऽध्यायः ॥ २ ॥

याजु[2]ष्यो गायत्र्याद्याश्छन्दोजातयो मताः सप्त ।
साम्नां द्विगुणास्त्रिगुणा ऋचां यतीनां चतुर्गुणाश्चापि ।
कथितास्तु षड्गुणाश्च ब्रह्मण एषोत्र संक्षेपः ॥

याजुषीणां गायत्र्यादीनां सामसंबन्धितया प्रस्तारः । गा० १२; उ० १४; अ० १६; बृ० १८; पं. २०; त्रि० २२; ज० २४ । याजुषीणां गायत्र्यादीनां ऋक्संबन्धितया प्रस्तारः । गा० १८; उ. २१; अ० २४; बृ० २७; पं. ३०; त्रि० ३३; ज. ३६ याजुषीणां गायत्र्यादीनां यतिसंबन्धितया प्रस्तारः । गा० २४; उ० २८; अ. ३२; बृ० ३६; पं. ४०; त्रि० ४४; ज० ४८ । याजुषीणां गायत्र्या[4]दीनां ब्रह्मसंबन्धि[3]तया प्रस्तारः । गा० ३६; उ० ४२; अ० ४८; बृ० ५४; पं. ६०; त्रि० ६६; ज० ७२ ॥ एतानि गायत्र्यादीनि सप्त छन्दांसि मन्दबुध्दिप्रबोधनाय धात्रादिदेवतासंबन्धि[3]तया युगपद्विन्यस्यन्ते ।

उ	धा	या	दे	आ	सा	ऋ	य	ब्र
गा	८	६	१	१५	१२	१८	२४	३६
उ	१२	७	२	१४	१४	२१	२८	४२
अ	१६	८	३	१३	१६	२४	३२	४८
बृ	२०	९	४	१२	१८	२७	३६	५४
पं	२४	१०	५	११	२०	३०	४०	६०
त्रि	२८	११	६	१०	२२	३३	४४	६६
ज	३२	१२	७	९	२४	३६	४८	७२

इतिशब्दोध्यायसमाप्तिं द्योतयति ॥ ६ ॥

(इतिश्री) भट्टमुकुलात्मजहर्षटविरचितायां जयदेवच्छन्दोविवृतौ द्वितीयोऽध्यायः ।

---

१ सामर्ग्यतिस्रणामिति A; २ यजुष्यो A; B. ३ संबन्धितया A; B; ४ गायत्र्यादीनां B.

तृतीयोऽध्यायः ।

आर्षम् ॥१॥ पादः ॥ २ ॥ इयादिना[1] पूर्यः ॥३॥ चतुर्भिः स्वैः[2] ॥ ४ ॥ एकद्वित्रिभिश्च पङ्क्त्याद्याः[3] ॥ ५ ॥ गायत्र्यष्टकैः ॥ ६ ॥ विराड् वस्विनौ[4]

ऋषिर्वेदस्तत्र भवमार्षम् । छन्द इति[5] वर्तते । आर्षमित्यधिकृतं वेदितव्यमाध्यायपरिसमाप्तेः ॥ १ ॥ अयमप्यधिकारः आसप्तमाध्यायपरिसमाप्तेः ॥ २ ॥ छन्दः आर्षं पादः इति वर्तते । पाद इत्येतदनुरोधादार्षमित्येतल्लिङ्गविपरिणामेनार्षं इति संपद्यते । यथा क्वचिद्यागे चतुर्विंशत्यक्षरया गायत्र्या[6] स्तोत्रे कर्तव्ये त्रयोविंशत्यक्षरया तन्न कृतं स्यादित्याशङ्क्याह । आर्षं पाद इयादिना पूरयितव्यः । इयं उदाहरणम्[7] । तत्सवितुर्वरेणियम् । त्रियम्बकं यजामहे । आदिग्रहणादुवश्च । तनुवं पुषेम । सुवर्गो लोक इति ॥ ३ ॥ छन्द आर्षं पादो गायत्र्याद्याः सप्तेति वर्तते । गायत्र्याद्या इत्येतत्सामानाधिकरण्यादार्षशब्दो लिङ्गवचनविपरिणामेन आर्ष्य इति संपद्यते । चतुर्भिः स्वैरित्येतदनुरोधात्पादशब्दो वचनविभक्तिविपरिणामेन पादैरिति संपद्यते । उत्तरत्रार्षपादशब्दावेवमेवाभिसंबन्धनीयौ[8] । आर्ष्यो[10] गायत्र्याद्याः सप्त छन्दो जातयः स्वैः स्वैश्चतुर्थाध्यायवक्ष्यमाणैश्चतुर्भिश्चतुर्भिः पादैर्भवन्ति[11] । तत्र हि 'षट्तुर्यमेकैकवृद्धाश्च गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुभो जगती' इति वक्ष्यते । गायत्री ६,६,६,६ । उष्णिक् ७,७,७,७ । अनुष्टुप् ८,८,८,८ । बृहती ९,९,९,९ । पङ्क्तिः १०, १०, १०, १० । त्रिष्टुप् ११, ११, ११, ११ । जगती १२,१२,१२,१२ ॥४॥ छन्द आर्षं पाद इति वर्तन्ते । चकारः 'चतुर्भिः स्वै' रित्यस्यानुकर्षणार्थः । अतो यथासंख्याभावः । आदौ भवा आद्या । पङ्क्तिराद्या यासां ताः पङ्क्त्याद्याः पङ्क्तित्रिष्टुप्जगत्यस्तिस्रश्छन्दोजातयः एकेन द्वाभ्यां त्रिभिश्च स्वैः स्वैः पादैर्भवन्ति । चतुर्भिरपि[12] स्वैः पादैः । चकारोऽनुकर्षणेन चतुर्भिः स्वैरित्यस्य प्रतिप्रसवार्थतां संपादयति । अन्यथा एकद्वित्रिभिरित्यमुना विशेषविहितेन चतुर्भिः स्वैरित्यस्य सामान्यविहितत्वात् बाधा स्यात् । दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेत्यत्र दध्नो यथा तक्रेण । अतोऽयं चकारः[13] । तथा च तत्र-

---

१ इत्यादिना A. २ स्वैः A; ३ पङ्क्त्याद्याः A; ४ वश्विनौ A; B; ५ इति च A; ६ गायागायत्र्या A; ७ इयोदाहरणम् A; ८ पद A; B; ९ संबद्धनेयौ A; B; १० आर्षौ A; B. ११ भवति A; B; १२ रिपिरस्वैः A; रपिरस्वैः B; १३ यश्चकारः A; B;

वा ॥ ७ ॥ ईशैश्च ॥ ८ ॥ आद्याश्वैः ॥ ९ ॥ सा पादनिचृत्[1] ॥ १० ॥ वस्वोः प्रथमादिधाम्नीने[2]नोष्णिक् पुरःककुप्परेभ्यः ॥ ११ ॥ रव्योः स्वै-[3]

भवन्तः प्रतिप्रसवलक्षणमकार्षुः । 'प्राप्तेऽथ प्रतिषिद्धे स्यात्प्रतिप्रसवयोगिता[4]' इति । एकपात् पङ्क्तिः १० । द्विपात् १०।१०॥ त्रिपात् १०।१०।१०॥ चतुर्भिः स्वैरिति चतुष्पात् १०।१०।१०।१०॥ एकपात् त्रिष्टुप्[5] ११।......... चतुष्पात् जगती १२।१२।१२।१२॥ ॥ ५ ॥ छन्द आर्षे पादः एकद्वित्रिभिरिति वर्तते । आर्षी गायत्री छन्दोजातिरेकेनाष्टकेन द्वाभ्यां चाष्टकाभ्यां त्रिभिश्चाष्टकैः पादैर्भवति । चकारानुवृत्त्या स्वैश्चतुर्भिःपादैरपि । एकपाद्[6] गायत्री ८। ॥६॥ छन्द आर्षे पाद इति । विराट्छब्देन पङ्क्तिरभिधीयते । वसुरविशब्दयोर्यासौ स्वाभिधेयगता अष्टद्वादशसंख्या सा अभेदोपचारेणोच्यते 'वस्विनौ' इति । एवमन्यत्रापि 'ईशैश्च' इत्यादौ[7] वाच्यम् । वाशब्दो दशकापेक्षया विकल्पार्थः । अष्टद्वादशसंख्यौ[8] च द्वौ दशकौ पादौ आर्षी पङ्क्तिच्छन्दोजातिर्भवति ८।१२। १०। १० ॥ ७ ॥ छन्द आर्षे पादो विराडिति वर्तते । ईशैरिति त्रिषु बहुत्वं परिसमाप्यते । संनिकृष्टत्वात् । एवमश्वादौ वाच्यम् । ईशैरेकादशसंख्याकैस्त्रिभिः पादैश्चकाराद्दशाक्षरैः स्वैश्चतुर्भिः पा(+ दै)रार्षी पङ्क्तिच्छन्दोजातिर्भवति ११ । ११ । ११ ॥ १० । १० । १० । १० ॥ ॥ ८ ॥ छन्द आर्षे पाद इति वर्तते । अश्वैः रवितुरगैः सप्ताक्षरैस्त्रिभिश्चतुर्भिः स्वैरिति च षडक्षरैश्चतुर्भिः पादैरार्षी आद्या गायत्रीच्छन्दोजातिर्भवति ॥ ७। ७। ७॥ ६। ६। ६। ६ ॥ ॥ ९ ॥ येयमश्वैः पादैरुक्ता गायत्री सा पादनिचृत्[10] द्रष्टव्या । पादेपादे[11] एकैकाक्षरापचयात् । वक्ष्यति च 'एकेनोनाधिकेन निचृद्भुरिजौ' इति ॥ १० ॥ छन्द आर्षे पाद इति वर्तते । वस्वोरष्टाक्षरयोर्द्वयोः पादयोः संबन्धिनि प्रथमादिधाम्नि प्रथम-द्वितीयतृतीयाख्ये धाम्नि स्थाने इनेन द्वादशाक्षरेण पादेन यथासंख्यं पुरःककुप्प-रेभ्यः परा आर्षी उष्णिक् छन्दोजातिर्भवति । आदौ द्वादशकस्तदनु द्वावष्टकौ पादौ पुरउष्णिक् । १२ । ८ ।८॥ मध्ये द्वादशक आद्यन्तयो रष्टक(कौ) ककुभुष्णिक् ८।१२। ८ ॥ अन्ते द्वादशक आदिमध्ययोरष्टकौ परोष्णिक् ॥८। ८। १२॥

---

१ निभृत् A; B; त्वचित् C; २ नेनोष्णिपुरः A; ३ स्वैना A; ४ योगता A. ५ Graphical representation of the other varieties of त्रिष्टुप् and जगती are dropped by me though given in the mss. ६ पद: A; B; ७ Graphical representation of the other varieties of गायत्री are droped by me. ८ ईशाश्वादौ A; B; ९ संख्यौ च A; B. १० पादन्यचित् B; पादन्यचि A; ११ पादैः पादैः A.

नानुष्टुप् ॥ १२ ॥ वसूनां बृहतीनेन पुरस्तादुरःपथ्योपरिष्टाद्भ्यः ॥ १३ ॥ सतः पूर्वेनाः ॥ १४ ॥ वसू दिशौ च ॥ १५ ॥ वस्वोः[3] पङ्क्तिरिनाभ्यां युगयुग्बहिराद्यादिषु सतःसतःसंस्तारप्रस्तारविस्तारास्तारेभ्यः ॥ १६ ॥

॥११॥ छन्द आर्षे पादः प्रथमादिधाम्नीति वर्तन्ते । रूयोर्द्वादशाक्षरयोर्द्वयोः पादयोः संबन्धिनि प्रथमद्वितीयतृतीयाख्ये धाम्नि स्थाने स्वेनाष्टाक्षरेण पादेन आर्षी अनुष्टुप् छन्दोजातिः ॥८।१२।१२॥१२।८।१२॥१२।१२।८॥१२॥ छन्द आर्षे पादः प्रथमादिधाम्नीति वर्तन्ते । वसूनामष्टाक्षराणां त्रयाणां पादानां प्रथमद्वितीयतृतीयचतुर्थाख्ये धाम्नि स्थाने इनेन द्वादशाक्षरेण पादेन यथासंख्यं पुरस्तादुरःपथ्योपरिष्टाद्भ्यः परा आर्षी बृहतीच्छन्दोजातिर्भवति । आदौ द्वादशकेन त्रिभिरपरैरष्टकैः पुरस्ताद्बृहती ॥ १२।८।८।८॥ द्वितीयस्थानस्थितेन द्वादशकेन प्रथमतृतीयचतुर्थाश्च पादा अष्टाक्षराः उरोबृहती । ८।१२।८।८॥ तृतीयेन द्वादशाक्षरेण प्रथमद्वितीयचतुर्था अष्टाक्षराः पादाः पथ्याबृहती । ८।८।१२।८। चतुर्थेन द्वादशाक्षरेण प्रथमद्वितीयतृतीयाश्चाष्टाक्षराः पादाः उपरिष्टाद् बृहती ॥ ८।८।८।१२॥ १३ ॥ छन्द आर्षे पादो बृहतीति वर्तते । इना द्वादशाक्षरास्त्रयः पादाः सतःपूर्वा बृहतीच्छन्दोजातिर्भवति । सतोबृहती भवतीत्यर्थः १२।१२।१२॥ १४ ॥ छन्द आर्षे पादो बृहतीति वर्तते । चकारः सतःशब्दानुकर्षणार्थः । वसू द्वावष्टकौ दिशौ च दशकौ द्वौ पादौ इयमपरा सतोबृहती ॥ ८।८।१०।१०॥ १५ ॥ छन्दे आर्षे पाद इति वर्तते । आद्य आदिर्येषां ते आद्यादयः । आदिमध्यान्ताः इत्यर्थः । युक्चायुक्च बहिश्च आद्यादयश्च तेषु वस्वोर्द्वयोः पादयोः संबन्धिषु षट्सु स्थानेषु यथासंख्यं स्थिताभ्यामिनाभ्यां पादाभ्यां सतःसतःसंस्तारप्रस्तारविस्तारा-स्तारेभ्यः परा आर्षी पङ्क्तिश्छन्दोजातिर्भवति । युगयुग्बहिराद्यादयो विभागेनो-च्यन्ते । वस्वोः संबन्धिनोर्युजोः[13] द्वितीयचतुर्थयोः स्थानयोरिनाभ्यां पादाभ्यां सतः-पङ्क्तिः । ८।१२।८।१२॥ वस्वोः संबन्धिनोरयुजोः प्रथमतृतीययोरिनाभ्यामपरा सतःपङ्क्तिः १२।८।१२।८॥ वसुभ्यां बहिराद्यन्तयोरिनाभ्यां स्थिताभ्यां संस्तार-पङ्क्तिः । १२।८।८।१२ ॥ वस्वोरादिभूताभ्यामिनाभ्यां [प्रस्तारपङ्क्तिः । १२।

---

१ शतः A; २ वस्वोर्दिग्भ्याम् A; वस्वोर्द्दिग्याम् B; ३ Both A and B drop these three words and combine Sutras 15 and 16 into one; ४ शतोऽशतः A; B; ५ अनेन A; B. ६ कर्षण्यर्थः A; B; ७ छन्दार्षे A; B; ८ युक्तायुक्त बहिश्च A; B; ९ बस्वात् A; बस्वात् B; १० पदयो A; B; ११ संबन्धेषु A; B; १२ विष्टरा० A. १३ संबद्धिनोः A; B; १४ The portion within the brackets is supplied by me.

पङ्क्तिक्रमेणनाभ्याम् ॥ १७ ॥ अक्षरपङ्क्तिः शराः ॥ १८ ॥ द्वौ वा ॥ १९ ॥ पदात् पञ्च ॥ २० ॥ युगरसौ त्रयश्च ॥ २१ ॥ पथ्याष्टकैः[1] ॥ २२ ॥ षड् विष्टारात् ॥ २३ ॥ त्रिष्टुबिनौ[2]श्चत्वारः ॥ २४ ॥ जगती द्वौ त्रयश्च[3] ॥ २५ ॥ स्वेषामादिमध्यान्तेष्वष्टकेनोभे[4] पृथक् पुरस्तान्मध्योपरि-

---

१२।८।८॥ वस्वोर्मध्यभूताभ्यामिनाभ्यां] विस्तारपङ्क्तिः[5] ८।१२।१२।८॥ वस्वोरन्तस्थिताभ्यामिनाभ्यामास्तारपङ्क्तिः ८। ८। १२। १२॥ ॥ १६ ॥ छन्द आर्षे पाद इति वर्तते । इनाभ्यां पादाभ्यामार्षी पङ्क्तिः छन्दोजाति[6]र्भवति । चकारान्निजाभ्यां दशकाभ्याम्[7] ॥ १२। १२। १०। १०॥ ॥ १७ ॥ छन्द आर्षे पाद इति वर्तते । शराः[8] इत्यत्र चतुर्षु बहुत्वं परिसमाप्यते । कथमेतत्[9] ? । यावता प्रागुक्तं त्रिषु बहुत्वं परिसमाप्यत इति । उच्यते । द्वितीयस्मिन्नध्याये पञ्चदशाक्षरा पङ्क्तिर्न काचिदुक्तेति चत्वारः शराः[10] परिगृह्यन्ते । चत्वारः पञ्चाक्षराः पादाः आर्षी अक्षरपङ्क्तिश्छन्दोजातिर्भवति । तथा चोक्तं भगवता पिङ्गलेन 'अक्षरपङ्क्तिः पञ्चकाश्चत्वारः' इति (३. ४४) ॥५।५।५।५ ॥ १८ ॥ छन्द आर्षे पादोऽक्षरपङ्क्तिः शरा इति वर्तते । द्वौ पञ्चाक्षरौ पादौ 'वा'शब्दाच्च द्वौ दशकौ आर्षी अक्षरपङ्क्तिः छन्दोजातिर्भवति ॥५। ५। १०। १० ॥ १९ ॥ छन्द आर्षे पादः पङ्क्तिः शरा इति वर्तते । पञ्च शराः पञ्चाक्षराः पञ्च पादाः पदात्परा पङ्क्तिश्छन्दोजातिर्भवति । पदपङ्क्तिर्भवतीत्यर्थः ५। ५। ५। ५ ।५॥ २० ॥ छन्द आर्षे पादोऽक्षरपङ्क्तिः शरा इत्यनुवर्तते । युगरसौ चतुष्कषट्कौ त्रयश्च शराः पञ्चकाः पादाः आर्षी अक्षरपङ्क्तिश्छन्दोजातिर्भवति ॥४। ६। ५। ५। ५ । २१ ॥ छन्द आर्षे पादः पङ्क्तिः पञ्चेत्यनुवर्तते । अष्टकैः पञ्चभिः पादैरार्षी पथ्याशब्दात्परा पङ्क्तिः छन्दोजातिर्भवति । पथ्यापङ्क्तिरित्यर्थः ॥८। ८। ८। ८। ८ । २२ ॥ छन्द आर्षे पादः पङ्क्तिरष्टकैरित्यत्र वर्तते । षट् अष्टकाः पादाः आर्षी विष्टारात्परा[11] पङ्क्तिच्छन्दोजातिर्भवति । विष्टारपङ्क्तिरित्यर्थः ॥८।८।८।८।८।८ । २३ ॥ छन्द आर्षे पादोऽष्टकैरिति वर्तते । इना (+ त्) द्वादशकाश्चत्वारोऽष्टकाः पादाः आर्षी त्रिष्टुप् छन्दोजातिर्भवति ॥ १२। ८। ८। ८। ८ । २४ ॥ छन्द आर्षे पादोऽष्टकैरिनादिति वर्तते । द्वाविनौ त्रयश्चाष्टकाः पादा आर्षी जगतीच्छन्दोजातिर्भवति । ॥ १२।१२

---

१ पथ्याष्टकाः A; २ बिनश्चत्वारश्च A; बिनश्चत्वारः B; बिना चत्वारः C; ३ त्रश्च B; C; ४ मध्यान्तेनाष्टकेनोभेन A; com. seems to drop उभे; ५ विष्टार० A; B; ६ याति० A; B; ७ दसकाभ्याम् A; B; ८ सराः A; B; ९ मेतयावता A; B; १० सरा A; B; ११ विस्तारा० B.

द्वाज्ज्योतिष्मत्यौ त्रिष्टुप्[1]जगत्यौ ॥२६॥ पङ्क्त्रैक[2] एकस्मिंश्छन्दः शङ्कुमती ॥ २७ ॥ [3]द्वौ नवकौ षट्कश्च ऋङ्क्[4] नागी ॥ २८ ॥ त्रिपादूनमध्या पिपीलकमध्या ॥ २९ ॥ यवमध्यान्यथा ॥ ३० ॥ एकेनोनाधिकेन नि[5]-

---

८। ८। ८॥ २५॥ छन्द आर्षे पाद इति वर्तते। स्वेषां यथासंख्यमेकादशकानां तथा द्वादशकानां त्रयाणां पादानां[6] संबन्धिष्वादिमध्यान्तेषु यथाक्रममष्टकेन पृथग् विन्यस्ते पुरस्तान्मध्योपरिष्टाज्ज्योतिर्ष्मत्यार्षौ[7][8] त्रिष्टुप्जगत्यौ छन्दोजाती[9] भवतः। अतो विभज्यते। स्वेषामेकादशकानामादावष्टकेन पुरस्ताज्ज्योतिष्मती त्रिष्टुप्। ८। ११। ११। ११ ॥ स्वेषामेकादशकानां मध्ये (+ अष्टकेन[10] मध्ये) ज्योतिष्मती त्रिष्टुप् ११। ८। ११। ११ ॥ पुनरपि मध्येऽष्टकेन सैव ११। ११। ८। ११ ॥ स्वेषामेकादशकानामन्तेऽष्टकेन उपरिष्टाज्ज्योतिष्मती त्रिष्टुप् ११। ११। ११। ८ ॥ स्वेषां द्वादशकानामादावष्टकेन पुरस्ताज्ज्योतिष्मती जगती ८। १२। १२। १२ ॥ स्वेषां द्वादशकानां मध्येष्टकेन मध्येज्योतिष्मती जगती १२। ८। १२। १२ ॥ पुनरपि मध्येष्टकेन सैव १२। १२। ८। १२॥ स्वेषां द्वादशकानामन्ते अष्टकेन उपरिष्टाज्ज्योतिष्मती जगती। १२। १२। १२। ८ ॥ २६ ॥ छन्द आर्षे पाद इति वर्तते। पङ्क्त्रैकग्रहणमादेर्न्यूनतोपलक्षणार्थम्। एकस्मिन्पङ्क्त्रैके[11][12] आदिन्यूनतायां शङ्कुमती[13] नामच्छन्दोजातिर्भवति[14]। च्छन्द इति वर्तमाने पुनश्छन्दोग्रहणं विस्पष्टार्थम् ॥ ५। ६। ६ ॥ २७ ॥ छन्द आर्षे पाद इति वर्तते। आद्यौ द्वौ नवकौ षडक्षरश्च एकः पादो यस्याः सा ऋङ्क् नागी नाम भवति (९। ९। ६) ॥ २८ ॥ त्रयः पादा यस्याः सा त्रिपादिति। संख्या (+ सु) पूर्वस्य (पा० ५.४.१४०) इति अनुलोपः। ऊनमध्या। स्वल्पाक्षरद्वितीयपादेत्यर्थः। एवंविधा ऋङ्क्[15] पिपीलकमध्या वेदितव्या॥ ८।५।८ ॥ २९॥

---

१ त्रिष्टुप्जगत्यौ dropped in A and B; २ पङ्क्त्रैक C; ३ The whole Sutra is dropped in A and B (text); ४ औद्गागी C. But this is due to a worng deciphering of the original letters ऋङ्नागी in the palm-leaf ms. ५ Words निवृद्भुरिजौ are not copied in A; mere dashes are given in their place. ६ पदानां A; B; ७ मध्येपरि० A; B; ८ ज्योतिष्मावार्ष्यौ A; B; ९ जातीर्भ० B; जातिर्भ० A; १० These two words are dropped in the mss; ११ पङ्क्त्रैक A; B; १२ पङ्क्त्रैके A; B; १३ संकुमती A; B; १४ जातीर्भवति A; १५ रिकं A; B.

निचृद्भुरिजौ ॥ ३१ ॥ द्वाभ्यां[1] विराट्स्वराजौ ॥ ३२ ॥ आद्यात् सन्देहे देवतादि[2] भिश्रावगतिरिति ॥ ३३ ॥

इति जयदेवच्छन्दसि तृतीयोऽध्यायः ॥ ३ ॥

अन्यथेत्यस्य पूर्वापेक्षया मध्यस्थूलत्वमर्थः । सैवे[3] त्रिपात् ॠक्[4] प्रथमतृतीयाभ्यां द्वितीयपादस्याधिकाक्षरत्वे यवमध्या भवति । ८ । ९ । ८ ॥ ३० ॥ एकेन ऊनेन अधिकेन च यथासंख्यं निचृद्भुरिजौ भवतः ॥ ३१ ॥ ऊनाधिकेनेत्येव । द्वाभ्यामूनाधिकाभ्यां यथासंख्यं विराट्स्वराजौ भवतः ॥ ३२ ॥ यत्र षड्विंशतिसंख्योक्षरकोशस्तत्र[5][6] सन्देहः । स किं धात्रीयायास्त्रिपादो गायत्र्या एकः पादः स्वराट्त्वमापन्नः अथ चतुष्पाद्याऔष्णी[7] उष्णिग् विराट्त्वमिति सन्देहे सति तस्या ऋचो विवादास्पदीभूतायाः आद्या पूर्वमवस्थिता ऋग्या तस्यां चेद् गायत्र्याख्यं छन्दो दृश्यते[8] हन्त[9] तर्हि स्वराट्त्वमापन्नं षड्विंशतिसंख्यस्याक्षरकोशस्य[10] । अथ चेदाद्याया ऋच उष्णिगाख्यच्छन्दो दृश्यते एवं तर्हि विराट्त्वमानीतं तदेव षड्विंशतिसंख्यस्याक्षरकोशस्य अभ्युपगन्तव्यम् । गायत्र्यादीनां सप्तानां च्छन्दसां देवताः क्रमेण अग्निसवितृसोमबृहस्पतिमित्रावरुणेन्द्रविश्वेदेवाख्याः । अत्रापि तच्चेत्सूक्तं अग्निदेवताकं तदानीं विवादास्पदीभूता षड्विंशत्यक्षरा[11] ऋग् गायत्र्येव भवेत् । तस्याः खल्वग्निभक्तित्वात् । एवमुष्णिगादिष्वपि वाच्यम् । आदिग्रहणेन गोत्रस्वरवर्णादेः परिग्रहः । अग्निवेश्यगोत्रा गायत्री । काश्यपगोत्रा उष्णिक् । गर्गगोत्रा अनुष्टुप् । वसिष्ठगोत्रा बृहती । भृगुगोत्रा पङ्क्तिः । कुत्सगोत्रा त्रिष्टुप् । भरद्वाजगोत्रा जगती । स्वरः षड्जादिक्रमेण गायत्र्यादिषु शुक्लश्च वर्णः । इतिशब्दोऽध्यायपरिसमाप्तिं द्योतयति । ३३ ॥

[इति] भट्टमुकुलकात्मजहर्षटविरचितायां जयदेवच्छन्दोविवृतौ तृतीयोऽध्यायः ॥ ३ ॥

---

१ Letters द्वाभ्यां वि not copied in A; mere dashes are given in their place. २ देवताभिश्राव० B. देवताऋकाव० C; ३ सैव A; B; ४ त्सक् A; B. ५ विंसति A; B; ६ कोसस्तत् B; ७ थाय:ज्ञुधी A; B; ८ दृश्यते A; B; ९ तद्दन्त B; १० कोसस्य A; B; ११ षड्विंसत्य० A; खड्विंशत्य० B.

अथ चतुर्थोऽध्यायः ॥

लौकिकं च ॥ १ ॥ षट्तुर्यम् ॥ २ ॥ एकैकवृद्धाश्च ॥ ३ ॥ गायत्र्युष्णिगनुष्टुप्बृहतीपङ्क्तित्रिष्टुभः जगतीशक्वर्यष्टिधृतीनां पृथक् परा[2] परातितः ॥ ४ ॥ कृतिः[3] प्राविसमभ्युदश्च ॥ ५ ॥ द्यन्तान्तरादिगुरुभिः सोदधिलैः सप्तभिर्गणैर्गुरुणा । आर्यार्धं; नात्रायुजि जः षष्ठोऽयं नलघुकौ वा ॥ ६ ॥

एवं प्रथमाध्यायेन वृत्ताङ्गत्वेनोपयुज्यमानः संज्ञासंज्ञिसंबन्धः प्रदर्शितः । द्वितीयतृतीयाभ्यां वैदिकं छन्दोऽभिहितम् । इदानीं लौकिकं छन्दः आचष्टे ॥ चकारेणार्षमिति प्रत्यवमृष्य (श्य) ते । लोके विदितं लौकिकम् । आर्षं च लौकिकं च छन्दोऽधिकृतं वेदितव्यमाध्यायपरिसमाप्तेः ॥ १ ॥ षडक्षरस्तुर्यः पादो यस्य तदिदं षट्तुर्यं गायत्र्यम् ॥ २ ॥ एकैकवृद्धाश्च तुर्याः पादा येषामुष्णिगादीनां विंशतेश्छन्दसां तानि च च्छन्दांसि ॥३॥ सूत्रद्वयं निराकाङ्क्षीकर्तुमाह । षट्तुर्यमिति गायत्री व्याख्याता तद्वर्जमुष्णिगादीनि छन्दांसि क्रमेणैकैकाक्षराभिवृद्धतुर्याणि । जगत्यादीनां तु एकैका(+ भि)वृद्धतुर्याणां पृथग् विन्यस्तानां परा परा अतिशब्दात्परा विज्ञेया । तत्संज्ञकानि च छन्दांसि भवन्ति । जगती अतिजगती । शक्वरी अतिशक्वरी । अष्टिः अत्यष्टिः । धृतिः अतिधृतिः । ४ ॥ कृतिरिति संज्ञा छन्दसः । प्राविसमभ्युदश्च परा कृतिः तत्संज्ञकानि च छन्दांसि भवन्ति । कृतिः । प्रकृतिः । आकृतिः । विकृतिः । संकृतिः । अभिकृतिः । उत्कृतिः इति । गायत्र्यादीनामेकविंशतेः प्रस्तारः— ॥ ५ ॥ आर्यालक्षणान्याचष्टे । सप्तभिर्गणैः गुरुलघुविन्यासदेहैः[9] गुरुणा चैकेन आर्यायाः अर्धं भवति । किंविशिष्टैः । द्यन्तान्तरादिगुरुभिः द्वौ चान्तश्च अन्तरश्च आदिश्च ते द्यन्तान्तरादयः गुरूच गुरुश्च गुरुश्च गुरुश्च ते गुरवः तैर्द्यन्तान्तरादिगुरुभिः । कीदृशैः । सोदधिलैः । उदधिसंख्याकाश्चत्वारो ला उदधिलः । सह तैर्वतन्त इति सोदधिलैः । अत्र आयार्धे अयुजि विषमे गणे प्रथमतृतीयपञ्चमसप्तमाख्ये जकारो न मध्यगुरुर्न भवतीत्यर्थः ॥ द्यन्तान्तरादि इत्यादिना द्विगुरुत्वादिरूपत्वे प्राप्ते नियमार्थमिदं वचनम् । अयं च षष्ठो गणो जकार एव वेदितव्यो नान्य-[10]रूपः । षष्ठोऽयमिति नियमात् द्विगुरुत्वादिवत्सोदधिलत्वस्य जकारेण बाधायां

---

१ षट्तुर्यैमेकैक० A; Sūtra 3 is dropped in C; २ पृथक् परातितः C; ३ कृतिः dropped in A and B; ४ प्राविषम० A; ५ यः C; ६ विंसंतेच्छन्दसां A; B; ७ निराकाषींद् कर्तु० A; B; ८ I am dropping this. ९ दोहैः A; B; १० नान्योरूपः A.

म्ले लात्पदं द्वितीयात्प्रथमात्परकेऽथ विषययुजि चरमे ॥ षष्ठो लाद्ये[1]षु त्रिषु पादो भवति भवति तु पथ्या ॥ ७ ॥ विपुला तु यान्यथा पादभाक् जकारौ द्वितीयकचतुर्थौ ॥ गुरुमध्यगौ भवेतां भवेत्तदा सर्वतश्चपला[2] ॥ ८ ॥ अर्धे यदग्रिमे लक्षणं भवेत्केवले तु चपलायाः ॥ मुखचपलासौ गदिता शेषे पूर्वोक्तलक्षणिका ॥ ९ ॥ पूर्वार्धे पूर्वसमं; चपलाया लक्षणं

प्राप्तायां प्रतिप्रसवार्थमिदं वचनम् । वाशब्दः पक्षान्तरं द्योतयति । नलघुकौ वा पक्षे षष्ठो गणो वेदितव्यः। प्रस्तारः[3] ॥ ६ ॥ षष्ठ इति वर्तते न्ले चतुर्लघौ षष्ठे गणे 'न्ले लात्पदं द्वितीयात्प्रथमात्परकेथविषय' इत्यस्मिन् 'वि' इत्ययं यो द्वितीयो लघुः तस्मात्पदमारम्भणीयम्। न्ले लात्पदमिति वर्तते। अथानन्तरं परके सप्तमे गणे 'युजि-चर' इत्यस्मिन् न्ले 'यु' इत्येतस्माल्लघोः प्रथमात्पदमारम्भणीयम्। न्ले लात्पदं प्रथमादिति वर्तते। चरमे द्वितीयार्धे विषयाः शब्द(+स्पर्श)रूपरसगन्धभेदेन पञ्च योजनं युक् तैर्युक् संबन्धो यस्य तस्मिन् न्ले लघुचतुष्टयरूपे पञ्चमे गणे 'षष्ठो लाद्येषु त्रि (+षु) पादो भवति भ' एतस्मिन् लात्प्रथमाद्भकारात्पदमार-म्भणीयम्। प्रथमार्धवत् द्वितीयेऽप्यर्धे षष्ठस्य गणस्य द्विरूपतायां[5] प्राप्तायामयमप-वादः। चरमे द्वितीयेऽर्धे षष्ठो गणो लघुरेव भवति रूपान्तरेण नावतिष्ठत इत्यर्थः। प्रथमेषु त्रिषु गणेषु द्वयोरप्यर्धयोः[6] 'न्ले लात्पदं द्वितीयात्' तथा 'षष्ठो लाद्येषु त्रिषु' इत्येतेषु गणेषु पादो यतिर्भवति। पथ्या नाम सा आर्या भवति। तु शब्दः पुनरर्थे ॥ ७ ॥ अन्यथा या[7] पादभाक्सा पुनः विपुला नाम आर्या। 'अन्यथा' इत्यस्यायमर्थः। प्रथम एवार्धे प्रथमेषु त्रिषु गणेषु पादो द्वितीयस्मिन्नेव वार्धे यो[8] वापि भूते (?) लक्षणे प्रथमार्धे त्रिषु गणेषु न विरामः कृतः। द्वितीये तु 'गुरु-मध्यगौ भवेताम्' इत्यत्र कृतः। गुर्वोर्मध्यं गुरुमध्यं तद्गच्छत इति गुरुमध्यगौ। [जकारौ[9] द्वितीयकचतुर्थौ यदा गुरुमध्यगौ भवेतां तदा सर्वतश्चपला सर्वचपला नाम आर्याभेदो भवेत्।] चपलायाः प्रस्तारः ॥ ८ ॥ चपलाया लक्षणं गुरुमध्यगौ द्वितीयकचतुर्थौ गणौ जकारावित्येवंरूपं यस्या अग्रिमे केवले प्रथम एवार्धे भवेदसौ मुखचपला[10] नाम आर्या गदिता। शेषे द्वितीये पूर्वोक्तं यत्सामा-

---

१ लोग्रेन्त्ये D. v. 2; २ श्चफला A; words from भवेतां to चपला in v. 8 bare dropped in C and also in com. ३ Hereafter garphical representation is dropped by me; ४ विवलेत० A; B; ५ द्विरूपायां A; B; ६ प्यर्धये B; ७ या dropped in A; ८ यो चापिभूते A; योचोपिभूते B; ९ Portion within brackets is conjectural. १० मुदिताशेषेचपला. A; B.

निरवशेषम् । पाश्चात्यमर्धमाश्रित्य वर्तते जघनचपलायाः ॥ १० ॥
आर्यायाः[2] पूर्वार्धे यदुक्तमत्रादितो[3] मया लक्ष्म । गीतिं गीतिविधिविदो
वदन्ति संवीक्ष्य तदितरत्रापि ॥ ११ ॥ आर्याद्वितीयदलभवलक्ष्म
प्रतिनियतमवगम्य । उभयत्राप्युपगीतिं वदन्ति यत्यंशकैर्गदितैः[4] ॥ १२ ॥
आहितविपर्ययार्या[5] शकलद्वयजनितरूपा या । उद्गीतिः सोद्गीता
नानायत्यंशभेदतस्तद्वत् ॥ १३ ॥ गुर्वन्ताष्टमगणभागार्या[6] पूर्वार्धसदृशशकं-[7]
लद्वितया । आर्यैरार्यागीतिर्गीता[8] संगीतं[9] गीतिभिर्गीतिविधौ ॥ १४ ॥

न्यलक्षणं तद्विद्यते यस्याः सा तथा । मुखचपला इत्यस्या अभिधानं मुखे प्रारम्भे द्वितीयचतुर्थगणयोर्गुरुमध्यगयोर्जकारस्य संनिधानात् । मुखचपलायाः प्रस्तारः ॥९॥ चपलायाः[11] निरवशेषं सकलं लक्षणं जघनचपलायाः पाश्चात्यं द्वितीय (+मर्ध-) माश्रित्य वर्तते । तत्र द्वितीयचतुर्थौ गणौ गुरुमध्यगौ जकारौ भवत इत्यर्थः । पूर्वार्धे पूर्वेण 'द्व्यन्तान्तरादि' इत्यनेन सामान्यलक्षणेन तुल्यं अर्धम् । प्रस्तारः ॥ १० ॥ मया छन्दस्कृता[12] आदितः प्राक् अत्र आर्यायाः पूर्वार्धे यल्लक्ष्म लक्षणं षष्ठस्य गणस्य द्विरूपत्वं तदितरत्रापि द्वितीयेऽप्यर्धे संवीक्ष्य निरीक्ष्य[13] गीतिविधिज्ञाः गीत्युपगीत्युद्गीत्यार्यागीतिविधानाभिगीतिनो गीतिमार्याविशेषं वदन्ति । प्रस्तारः ॥ ११ ॥ आर्यायाः द्वितीयार्धे भवं यल्लक्ष्म 'षष्ठो ल्' इति तत् उभयत्रापि द्वयोरप्यर्धयोरवगम्य निरीक्ष्य[14] उपगीतिं वदन्ति । कीदृशं तत् । प्रतिनियतं द्वितीय एवार्धे नियोजितम् । आद्येषु त्रिषु पादः इत्यादिकाभिर्यतिभिः सप्तभिर्गणैः द्व्यन्तान्तरादिगुरुरूपैः पूर्वमभिहितैः करणभूतैः ॥ प्रस्तारः ॥ १२ ॥ या एवं प्रकारा सा उद्गीतिरुद्गीता कीर्तिता । कासौ । आह । आहितेत्यादि । आहित उत्पादितो विपर्ययो द्वितीयार्धं प्रथमे कृतं प्रथमार्धं च[15] द्वितीयीकृतं यस्य तथाविधं यत्तदार्याशकलद्वयं[16] तेन जनितं संपादितं रूपं यस्याः सा । तथा तद्वदिति उपगीतिवत् नानायत्यंशभेदात् ॥ प्रस्तारः ॥ १३ ॥ पापेभ्य आरात् याताः दूरादपगताः आर्याः तैरार्यैरेवंविधा आर्यागीतिर्गीता । किंविशिष्टा । प्रागुक्ताभ्यः आर्याभ्यः अस्या विशेषमाह । गुरुरन्तो यस्य तथाविधमष्टमं गणं भजतीति ।

---

१ चपलाशा: A; २ आर्याया: A; ३ मयादितो॰ A; मितरत्र प्रथमतो D. v.49; ४ जत्यं॰ B; C; ५ सकलद्वय A; B; C; ६ गुर्वन्तामष्टम A; ७ सकल A; ८ आर्यैरार्यां॰ A; ९ संगीति A; सद्गीत B; C; १० मध्यमयो॰ A; मगयो॰ B; ११ dropped in A; १२ छन्दस्कृता A; B; १३ निवीक्ष्य A; नियोज्य B; is it निरी॰य=निरीक्ष्य ? १४ नियोक्ष्य A; नियोज्य B; १५ द्वितीयाकृतं A; द्वितीयां॰ B. १६ सकल A; B.

वैतालीयं र्लगैनैधनाः । षड्युक्पादोऽष्टौ समेश्च लः ॥ न समोऽत्र परेण युज्यते । नैताः षट् च निरन्तरा युजोः ॥ १५ ॥ यौवेन्ते शेषपूर्वसाम्याद् । औपच्छन्दसकं वदन्ति सन्तः ॥१६॥ आपातलिका भवतीयं । तन्निधने भवतो भपरौ गौ ॥ १७ ॥ पूर्वः सह पञ्चमेन चेत् । प्राच्यवृत्तिरयुजौ तु

भजो ण्विः । तथा आर्यापूर्वार्धेन षष्ठस्य गणस्योभयरूपत्वेन सदृशं तुल्यं शकेल-द्वितयं यस्याः सा तथा । किंविशिष्टैरार्यैः । गीतिविधौ आर्यागीतिकृतौ संगीता कीर्तिता गीतिः यैस्तादृशैस्तस्या हि द्वितीयमर्धं प्रथमार्धसदृशमिति मनसि कृत्वोक्तम् । गीतिविधौ सं(+गीत)गीतिमिरिति ॥ प्रस्तारः ॥ १४ ॥ आर्या-लक्षणानां विवृतिः समाप्ता ॥ एवमार्यालक्षणान्युक्त्वा संप्रति वैतालीयलक्षणान्या-चष्टे ॥ वैतालीयं नाम मात्रावृत्तं भवति । किं तद्वैतालीयम् । यस्यायुक् प्रथम-तृतीयाख्यः पादः षल्ः षण्मात्रात्मकः समश्च द्वितीयचतुर्थात्मिकाख्यः पादोऽष्ट-मात्रात्मकः । लशब्दो मात्रोपलक्षणार्थः । किंविशिष्टाः । र्लगैनैधनाः । रश्च लुच गु च ते र्लगाः । निधने अवसाने भवा नैधनाः र्लगा नैधना यासां तास्तथोक्ताः । अत्र वैतालीये समो द्वितीयादिर्मात्रात्मक परेण तृतीयादिना न युज्यते मिश्रीभावं नोपयाति । युजोः द्वितीयचतुर्थयोः पादयोरेताः षण्मात्रा निरन्तरा व्यवधानशून्याः लघुरूपा एव न कार्या इत्यर्थः ॥ प्रस्तारः ॥ १५ ॥ साधवः औपच्छन्दसकं नाम वैतालीयभेदं वदन्ति रेफयकारावन्ते यदि । अवशिष्टं कीदृगित्याह । शेषपूर्वसा-म्यादिति । पूर्वं 'षड्युक्पादोऽष्टौ समेश्च लः' इति अनेन साम्यं पूर्वसाम्यं शेषे-स्यावशिष्टस्य पूर्वसाम्यं शेषपूर्वसाम्यं तस्मात् ॥ प्रस्तारः ॥ १६ ॥ शेषपूर्वसा-म्यादिति वर्तते । तेषां च युगयुजां यथाक्रमं द्वितीयचतुर्थप्रथमतृतीयरूपाणां पादानां निधनेऽवसाने भकारात्परौ गुरू भवतः । इयमापातलिका नाम वैतालीय-भेदो भवति । कस्मात् । शेषपूर्वसाम्यात् ॥ प्रस्तारः ॥ १७ ॥ 'न समोऽत्र परेण युज्यते' इति अस्यायमपवादः 'पूर्वः सह पञ्चमेन चेत्' इति । पूर्वश्चतुर्थो मात्रात्मकः पञ्चमेन सह यदि संबन्धमुपैति प्राच्यवृत्तिर्नाम वैतालीयभेदो भवति । अयुजौ तु प्रथमतृतीयपादौ पूर्ववत् वैतालीयवत् भवतः । तत्र हि न समः परेण

---

१ पादेष्टौ A, B; C; but D. v. 54 agrees with com. whose reading is adopted in the text. समे च लः A; D. v. 54; २ योवातिशेषमूर्धसा० A; ३ औपच्छन्दसिकं D. v. 60; ४ सकल A; B; ५ धान्यसून्या A; धान्यस्तन्या B; ६ सिष्टं A; B; ७ गीदृगि० B; ८ शमश्च A; B; ९ सेष A; B; १० सिष्ट A; B; ११ जा A; B; १२ वधाने A; B.

पूर्ववत्[1] ॥ १८ ॥ उदीच्यवृत्तिस्त्वयुग्मयोः पूर्वश्चे[2]ल्लघुकस्तृतीययुक् ॥ १९ ॥ यथास्वमाभ्यामयुग्मयोः[3] । युग्मयोश्च भवति प्रवृत्तकम् ॥ २० ॥ अस्य युग्मजनितापरान्तिका ॥ २१ ॥ तथौजजा चारुहासिनी ॥ २२ ॥ द्विकविहृ[4]तवसुलघुरचलधृतिरिह ॥ २३ ॥ मात्रासमकं ल्नवमं गन्तम्[5] ॥ २४ ॥ अष्टाभ्यो गाथा[6] उपचित्रा ॥ २५ ॥ जो न्लौ[7] च तोयधे[8]र्विश्लोकः ॥ २६ ॥

युज्यते। प्रस्तारः ॥ १८ ॥ अयुग्मयोः प्रथमतृतीययोः पूर्वो द्वितीयः एकमात्रः तृतीयेन योगं संबन्धमुपैति चेत् भवति उदीच्यवृत्तिर्नाम वैतालीयभेदः। प्रस्तारः ॥ १९ ॥ आभ्यां प्राच्यवृत्त्युदीच्यवृत्तिभ्यां करणभूताभ्यां यथास्वं पूर्वः पञ्चमयुगिति युग्मयोर्द्वि(+ती)यचतुर्थयोः द्वितीयस्तृतीययुगितिचायुग्मयोः प्रथमतृतीययोः पादयोः सतोः प्रवृत्तकाख्यो वैतालीयभेदो भवति। प्रस्तारः ॥ २० ॥ अस्य प्रवृत्तकस्य युग्माभ्यां द्वितीयचतुर्थाभ्यां पदाभ्यां जनिता अपरान्ति[9]का नाम वैता[10]लीयभेदो भवति। चतुर्ष्वपि पादेषु चतुर्थोऽस्याः पञ्चमेन युज्यत इत्यर्थः। प्रस्तारः ॥ २१ ॥ तथा तेनैव प्रकारेण प्रवृत्तकस्य ओजाभ्यां प्रथमतृतीयाभ्यां पादाभ्यां जाता चारुहा[11]सिनी नाम वैतालीयभेदो भवति। पादच[12]तुष्टयेऽप्यस्याः द्वितीय[13]स्तृतीयेन युज्यत इत्यर्थः। प्रस्तारः ॥ २२ ॥ वैतालीयविवृतिः समाप्ता ॥ द्विकेन विहृता[14] द्विकविहृताः[14] द्विगुणिताः इत्यर्थः। वसुसंख्याका[15] अष्टौ लघवो वसुलघवः द्विकविहृता वसुलघवो यस्यास्तादृगिह छन्दःशास्त्रेऽचलधृ[16]तिर्नाम वृत्तजातिर्भवति। प्रस्तारः ॥ २३ ॥ द्विकविह(+त) वसुलघुरिति वर्तते। मात्रासमकं नाम वृत्तं भवति। किंविशिष्टं ल्नवमं लघुरेव नवमो यस्य तत्तथा। अचलधृतौ[17] ऋजुरूपा लघवः । इत आरभ्य लघुशब्दो मात्रालक्षणार्थोऽनङ्गक्रीडादीन्वर्जयित्वा द्रष्टव्यः । तथा गन्तं गुरुरेवान्तो यस्य[18] तत्तथा । प्रस्तारः ॥ २४ ॥ मात्रासमकस्य भेदानुपदर्शयति[19]। अष्टाभ्यो मात्राभ्यः परं मात्राः गुर्वादिकाः यदि भवन्ति उपचित्रो[20]नाम वृत्तं भवति। कीदृशी। द्विकाविहृत[21]वसुलघुः। प्रस्तारः ॥ २५ ॥ तोयाधिसंख्याभ्यः चतुर्भ्यो मात्राभ्यः परो जकारो वा नलघुकौ

१ पूर्वम् C; २ पूर्वश्च लघुकः A; ३ यथास्वमाभ्यामयुग्मयोश्च॰ A; ४ विहित A; ५ गतम् A; ६ गाथावुप॰ A; मात्रा उप॰ C; गोल्यावुपचित्रा Narayana on VR. 2. 36; ७ ग्लौ C; ८ तोयधिर्वि॰ A. ९ अपरान्तका A; १० लीयदो B; ११ हासनी A; १२ पदे चतुष्टये B; १३ द्वितीयं तृ॰ A; १४ विहिता A; B; १५ संख्याका A; B; १६ वृत्तिः A; B; १७ वृत्तौ A; १८ यस्या A; B; १९ नुदर्शयति A; २० चित्रमान A., चित्रामान B; २१ विहित B.

तद्द्वितयाद्वानवासिकायाः ॥ २७ ॥ सँश्च द्वितयादुदधेश्चित्रा ॥ २८ ॥
समनन्तरनिगदितलक्षणभाङ् मात्रासमादि-पादाकुलकम् ॥
अविदितवृत्तपरिमापरिगतं मुनिनाभ्यधायि पादाकुलकम् ॥ २९ ॥
द्विघ्नान्यष्टौ दीर्घाण्यर्धे यस्याः सोक्तानङ्गक्रीडा ॥
शकलमपरमपि सलिलनिधिगुणितवसुलघुकसुपरिघटितपदविसृति ॥३०॥

वा विश्लोको नाम वृत्तं भवति । कीदृशः । द्विकाविहृतवसुलघुः । प्रस्तारः ॥ २६ ॥ तद् द्वितयादुदधिद्वितयादष्टाभ्यो मात्राभ्यः परो जकारो नलघुकौ वा वानवासिकायाः भवतः । किंभूतायाः । द्विकविहृतवसुलघोः । प्रस्तारः ॥२७॥ उदधेर्द्वितयादष्टाभ्यो मात्राभ्यः परः सकारश्चकारात् जो न्लौ (+ वा) यदि भवन्ति चित्रानाम वृत्तं भवति । कीदृशी द्विकाविहृतवसुलघुः । प्रस्तारः ॥ २८ ॥ मुनिना भगवता पिङ्गलेन एवंविधं पादाकुलकं नाम वृत्तमभ्यध्यायि उक्तम् । किंभूतम् । समनन्तरेत्यादि । समनन्तरमिदानीमेव निगदितमुक्तं लक्षणं ये भजन्ति मात्रासमकादीनां पादास्तेनाकुलं व्याप्तं अतएव अविदितेत्यादि । परिमाणं परिमा । वृत्तस्य परिमा वृत्तपरिमा । व्याकुलत्वाज्झगिति बुद्धावनुपारोपादविदिता अज्ञाता या सा वृत्तपरिमा तया परिगतं व्याप्तम् । अत्र संग्रहश्लोकाः ।

चित्रा मात्रासमा वाद्यो; विश्लोको वोपचित्रका ।
द्वितीयोऽपि; ततो मात्रासमकं वानवासिका ॥ १ ॥
उपचित्रा च विश्लोकश्चतुर्थाद्दिः कृतश्चिल ।
इति पादाकुलाख्यत्वमब्रवीदस्य पिङ्गलः ॥ २ ॥
दृष्टोदाहरणं छन्दस्कारोक्तमिति कीर्तितम् ।
नियमात्तु; दृश्यन्ते बहुधो ह्यस्य भिदो यतः ॥ ३ ॥

इति । प्रस्तारः ॥ २९ ॥ अनङ्गक्रीडा उक्ता । का इत्याह । यस्या अर्धे अष्टौ दीर्घाणि । किंभूतानि । द्विघ्नानि । द्वाभ्यां हन्यन्ते गुण्यन्ते इति । घञर्थे कविधानमिति कप्रत्ययः । द्विघ्नानि । षोडश गुरूणीत्यर्थः । अपरमपि शकलमर्धं कीदृगित्याह । सलिलनिधीत्यादि । सलिलनिधिगुणिताश्चतु-

१ सश्च द्वितयश्चुदधिस्तु चित्रा A; २ द्विघ्ना० A; ३ दीर्घान्यर्धे A; ४ सकल० A; B; C; ५ उदधिर्द्वि० A; B; ६ रोतादविदिति A; B; ७ या A ; B; ८ स्वह्णि B; ९ सकल० A; B;

२

गुरुकनिधननवकसहितकृतिलघुविरचितशकलभृदतिरुचिरा ।
गीत्यार्याचलधृतिरहिपतेः शिखा-चूलिके त्वनन्तरजे ॥ ३१ ॥
लोऽक्षं (+र) गुरुलघुरहिता गुरवो वर्णा दले गुरवः ॥ ३२ ॥
इति जयदेवच्छन्दसि चतुर्थोऽध्यायः ॥

गुणिताः ये वसुसंख्याका अष्टौ लघवस्तैः सुपरिघटिता सुष्ठु योजिता पदविसृतिः पदप्रसरणं यस्याः सा तथोक्ता । एवं द्वितीयमर्धं द्वात्रिंशता लघुभिः संपद्यते । प्रस्तारः ॥ ३० ॥ अतिरुचिरा नाम वृत्तं भवति । किंविशिष्टा । गुरुकनिधने-त्यादि । गुरुको निधनं यस्य तथाविधो यो नवकस्तेन सहिताः कृतिरिति विंशति-संख्यात्मका ये लघवस्तैर्विरचितं शकलमर्धं बिभर्तीति । क्विप् । सा तथोक्ता । अष्टाविंशत्या लघुभिरन्त्येन गुरुणा च विरचितं दलं बिभर्तीत्यर्थः । जयदेवस्य या अचलधृत्यनङ्गक्रीडातिरुचिरास्ता यथाक्रममहिपतेर्भगवतः पिङ्गलस्य गीत्या-र्याशिखाचूलिका मताः । प्रस्तारः ॥ ३१ ॥ (+अक्षः)रै रहिता लो मात्रा गुरवो भवन्ति । गुरुरहितास्तु वर्णा भवन्ति । लघुरहिताः पुनर्मात्राः दले अर्धे सति गुरवो भवन्ति । पथ्यार्यायाः इदं द्वितीयमर्धम् । मात्राः सप्तविंशतिः अक्ष-राणि च विंशतिस्तै रहिताः शून्याः मात्राः सप्तविंशतिसंख्याः सप्त गुरवो भवन्ति । सप्तभिर्गुरुभिर्विरहिताः शून्याः मात्राः विंशतिर्वर्णा भवन्ति । पारिशेष्याल्ल-घूनां लाभः । यतः सप्त गुरून् पातयित्वा विंशतेर्वर्णेभ्यस्त्रयोदश लघवो भवन्ति तांश्च त्रयोदश लघून् सप्तविंशतेर्मात्राभ्यः पातयित्वा मुच्यन्ते मात्राश्चतुर्दश । तासां दले[18] अर्धे सति द्वितीयेनापि प्रकारेण गुरवो लभ्यन्ते । प्रस्तारः । [ऽ।।।।।।।।ऽ।।ऽऽऽ।ऽ।।ऽ] ॥ ३२ ॥

इति भट्टमुकुलात्मजहर्षटविरचितायां जयदेवच्छन्दोविवृतौ चतुर्थोऽध्यायः ॥

१ लघुकविर० C; लघुकसुविरचितदल० A; B; २ मूलिते C; ३ गुरुरहिताः स्वा मात्रा वर्णा गुरुवर्जिता लघवः A; B; ४ गुरुको निधने B; ५ कृतिगती A; B; ६ विंसति A; B; ७ सकल० A; B; ८ रन्तेन A; B; ९ सिखा A; B; १० वहिता B; ११ प्रनन्मात्राः B; १२ अथ A; B; १३ गुरुरहिताः पथ्या० A; B; १४ विंसति A; B; १५ स्तन्याः B; १६ सप्तिभिः B; १७ त्रयोदस B; १८ दशार्धे A; दसअर्धे B; १९ नापि B;

पञ्चमोऽध्यायः ।

वृत्तम् ॥ १ ॥ सममर्धसमं विषमं च ॥ २ ॥ ग्लौ समान्यनुष्टुभीति ॥ ३ ॥ लगौ प्रमाण्यनन्तरम् ॥ ४ ॥ अन्यदतो हि वितानम् ॥ ५ ॥ नाद्यात्स्नौ योऽम्बुधेर्वक्त्रम् ॥ ६ ॥ युक्पादयोर्जकारेण वक्त्रं पथ्येति संज्ञितम् ॥ ७ ॥ जेनायुजोरुदाहृता विपरीतादिरेषास्मिन् ॥ ८ ॥ वक्त्रं तदेव चपला यद्योजयोर्नकारः स्यात् ॥ ९ ॥ लघुसप्तमयुग्मा या विपुला सा

एवमार्यावैतालीयादिभेदानभिधाय संप्रति समार्धसमविषमवृत्तानि क्रमेणोपदर्शयितुमाह । वृत्तमित्यधिकृतं वेदितव्यमासप्तमाध्यायपरिसमाप्तेः । गुरुलघुनियमात्मकं वृत्तम् ॥ १ ॥

समान्याद्युपचित्रादि सममर्धसमं क्रमात् ।
विषमं चतुरूर्ध्वादि वृत्तं वृत्तविदो विदुः ॥ २ ॥

ग्लौ गुरुलघू इत्येवमव्यवधानेन समानी नाम वृत्तं अनुष्टुभि छन्दसि । प्रस्तारः ॥ ३ ॥ अनुष्टुभीति वर्तते आपदचतुरूर्ध्वात् । लगौ लघुगुरू अविद्यमानमन्तरं यस्मिंस्तथाविधं कृत्वा भवतः प्रमाणीनाम वृत्तं भवति अनुष्टुभि छन्दसि ॥ ४ ॥ अत आभ्यां समानीप्रमाणीभ्यामन्यदन्यादृशं गुरुलघुविन्यासं वितानं नाम वृत्तं भवति अनुष्टुभि छन्दसि ॥ ५ ॥ आद्यात्प्रथमाद्वर्णात् सकारनकारौ न भवतः । अम्बुधेर्वर्णचतुष्टयात्परो यदि यकारो वक्त्रं नाम वृत्तं भवति अनुष्टुभि छन्दसि ॥ ६ ॥ अम्बुधेरिति वर्तते । युक्पादयोर्द्वितीयचतुर्थयोरम्बुधेर्जकारेण वक्त्रं पथ्याशब्देन पूर्वपदेन संज्ञितं भवति । पथ्यावक्त्रं नाम वृत्तं भवतीत्यर्थः अनुष्टुभि छन्दसि । आद्यात्सकारनकारौ सर्वासामनुष्टुभां निवारितौ ॥ ७ ॥ अस्मिन्ननुष्टुप्प्रकरणे अयुजोः प्रथमतृतीययोः अम्बुधेर्जेन एषा पथ्या विपरीतादिरुदाहृता विपरीतपथ्यावक्त्रं नाम वृत्तं भवतीत्यर्थः अनुष्टुभि छन्दसि ॥ ८ ॥ तदेव पूर्वोपक्रान्तं वक्त्रं चपला चपलावक्त्रं नाम वृत्तं भवतीत्यर्थः अनुष्टुभि छन्दसि । ओजयोः प्रथमतृतीययोः पादयोरम्बुधेः परो यदि नकारः स्यात् ॥ ९ ॥ लघुः सप्तमो ययोस्तथाविधौ युग्मौ द्वितीयचतुर्थौ पादौ यस्याः सा एवंप्रकारा मुनेर्भगवतः

---

१ सामान्य० A; B; २ प्रामाण्य० A; B; ३ योऽम्बुधिवक्त्रम् A; ४ यकारेण A; B; C; ५ युज्यो०A; ६ विपरितादिरेवास्मिन् A; ७ मासप्यापरि० A; B; ८ समवसमं क्रमा A; B; ९ Hereafter, even this word will be dropped together with the graphical representation, though both are given in the mss. १० सर्वसामनुष्टुभामानिवारितं A; B;

मता मुनेः ॥ १० ॥ सैतवस्य तु सर्वतः ॥ ११ ॥ भश्चतुर्थात्तद्विपुला ॥ १२ ॥ ततो रश्चेदेवमन्या ॥ १३ ॥ नकारेणापि च तथा ॥ १४ ॥ एवं तकारेणापरा ॥ १५ ॥

प्रथमोऽष्टाक्षरः पादः ।
चतुर्भिरभिवर्धिताः परेऽमुष्मात् ।
क्रमशो यस्य तदेतन्नानाविन्याससंशोभि ।
सललितपदपदवीकं पदचतुरूर्ध्वं बुधाः प्राहुः ॥ १६ ॥

इति निगदितजातौ ।
कृतविषमचरणरचनायाम् ।
द्विगुरुनिधनशकल इह हि युत आङा ।
समुपहितसललितयतियुतिरथ भवति पीडः ॥ १७ ॥

पिङ्गलस्य विपुला मता अनुष्टुभि छन्दसि ॥ १० ॥ सैतवस्य पुनः आचार्यस्य सर्वतः चतुर्ष्वपि पादेषु लघुसप्तमा विपुला मता अनुष्टुभि छन्दसि ॥११॥ चतुर्थाद्वर्णाद्भकारस्तद्विपुला भविपुला भवतीत्यर्थः अनुष्टुभि छन्दसि ॥१२॥ ततश्चतुर्थाद्रेफश्चेदेवं सति अन्या अपरा रविपुला भवतीत्यर्थः अनुष्टुभि छन्दसि ॥ १३ ॥ तथा तेनैव प्रकारेण चतुर्थान्नकारेण विपुला भवति नविपुलेत्यर्थः अनुष्टुभि छन्दसि ॥ १४ ॥ एवमेव चतुर्थात्परेण (+तकारेण) अपरा भवति तविपुलेत्यर्थः अनुष्टुभि छन्दसि ॥ १५ ॥ अनुष्टुभीति निवृत्तम् । बुधा विपश्चित एवंविधं तदेतत् पदचतुरूर्ध्वं नाम वृत्तं प्राहुः कथयन्ति । किंवत् । आह । यस्य प्रथमः पादोऽष्टाक्षरः अमुष्मात्प्रथमाच्च पादात् क्रमशो द्वितीयतृतीयचतुर्थाः पादाः चतुर्भिश्चतुर्भिरभिवर्धिता भवन्ति । किंविशिष्टम् । नानाप्रकारेण पादगतेन विन्यासेन रचनया सम्यगभीक्ष्णं शोभत इति । अन्यच्च । सललितेत्यादि । सह लालित्येन शोभया वर्तते । सललितेति गम्यमानार्थत्वात् भावप्रत्ययलोपः । पदानां पदवी मार्गः पदपदवी । सललिता पदपदवी यस्येति । 'नद्यृतश्च' इति कम् । ॥ १६ ॥ इह शास्त्रे इति अनन्तरोक्तेन प्रकारेण कृता विषमा चरणरचना पादविन्यासो यस्यास्तथाविधायां पदचतुरूर्ध्वलक्षणायां वृत्तजातौ निगदितायां विषयभूतायामथानन्तरमाङा युतः पीडो भवति ।आपीडो

---

१ सेतवस्य A; २ भचतु० A; ३ रभिर्वर्धिताः A; ४ पतपदवीकं A; ५ निदनसकल A; निधनसकल B; C; ६ आडा A; B; C; ७ त dropped in A; ८ सललेति A;

प्रथमकमितरजपरिवृत्तं ।
यदि च भवति तुर्यम् ॥
चरणयुगमपरमपि[1] भवति यथास्वं ।
द्विगुरुनिधनमखिलमिह[2] गदितमिति कलिकाख्या[3] ॥ १८ ॥
द्वितयमपि च यदि[4] परिवृत्तम्[5] ।
चरण इह सललितयतिरथ तृतीयः ॥
तमनु भवति चाद्यो
द्विदशकनिधनजचरणपरिपठितलवली सा ॥ १९ ॥
द्विगुरुनिधनयुगमृतधारा[2] ।
प्रथमकनिधनभवचरणपरिवृत्त्या ॥[2]
प्रविरचितलघुपदनियतसललितयतिशोभा ।
भवति हि चतुरूर्ध्वे ॥ २० ॥

नाम वृत्तं भवतीत्यर्थः । किंभूतः । द्विगुरुनिधनशकलः[6] द्वौ गुरू निधने[7] यस्य तथाविधं शकलं पादचतुष्टयं यस्य स तथोक्तः । नियम एवैषः । अतोऽन्यत्र गुरुर्न कार्य इत्यर्थः । तथा सम्यगुपहिता योजिता यासौ पादसंबन्धिनी यतिर्विरामस्तया युतिर्मिश्रणं यस्य स तथोक्तः ॥ १७ ॥ प्रथमकं तुर्यमाद्यः पादः इतरजेन द्वितीयेन यदि परिवृत्तं भवति प्रथमः पादो यदि द्वितीयत्वं द्वितीयश्च प्रथमत्वं प्राप्नोति । अपरमपि चरणयुगं यथास्वं भवति ध्रौव्येणावतिष्ठते इत्यर्थः । अखिलं पादचतुष्टयमपि द्विगुरुनिधनमिति । एवं सति कलिकाख्या नाम पदचतुरूर्ध्वभेदो भवति । १८ ॥ द्वितीयतृतीयाख्यं पादद्वितयमपि यदि परिवृत्तं भवति द्वितीयः पादः प्रथमत्वं तृतीयश्च द्वितीयत्वं प्राप्त इत्यर्थः । तमनु तृतीयचरणाद् द्वितीयत्वं प्राप्तादनन्तरमाद्यः प्रथमः पादः (+भवति) सा लवली नाम पदचतुरूर्ध्वभेदः । किंभूता । द्विदशकेत्यादि । द्वौ दशकौ यस्य तथाविधो विंशत्यक्षर इत्यर्थः । एवंविधो निधनोत्पन्नश्चरणश्चतुर्थः पादो यस्याः तादृशी परितः समन्तात्पठिता ॥ १९ ॥ पदचतुरूर्ध्वे अमृतधारा नाम वृत्तविशेषः[10] प्रथमकस्य पादस्य निधनभवे चतुर्थे चरणे परिवृत्त्या भवति । किंविशिष्टा । प्रकर्षेण विरचिता प्रसारिता लघुषु पदेषु नियतावश्यंभाविनी सललिता यतिशोभा विरामरम्यता यस्याः सा तथोक्ता । हि शब्दः पादपूरणे । एवमेते चत्वारः

---

१ युग्मपर० A; २ निवन A; ३ कलिकाख्यम् A; ४ यदि dropped in A; ५ परिवृत्तः A; ६ सकलः A; B; ७ निधनो A; B; ८ सकलं A; B; ९ मिस्रणं A; B; १० वृत्तिवि० A;

तरसोदिता सजेसलेषु ।
नसजगुरुकेष्वथैकतः ॥
सत्सु भनजेलगुरूणि ततः ।
सजसा जगौ च भवतीयमुद्गता ॥ २१ ॥
क्रियतेऽथ संप्रति तृतीय—
चरणगतलक्ष्मरूपणम् ॥
नौभगावपि हि सौरभकं
यदि चोद्गतासदृशमेव शेषकम् ॥ २२ ॥
द्वितयं नयोरथ सयोश्च ।
भवति चरणे तृतीयके ॥
प्रसृतपदरचनया ललितं ।
ललितं च नाम तदिहाभिनिश्चितम् ॥ २३ ॥

पदचतुरूर्ध्वभेदा निरूपिताः ॥ २० ॥ अथ अनन्तरमियमुद्गता नाम वृत्तजाति-भवति । किंभूता (+तरसोदिता) वेगेनोदिता । तरसादेः शब्दस्यानर्थक्योपदर्शनायेमं तत्रभवन्तः संग्रहश्लोकमाहुः ।

इदं सलक्ष्यं रचितं सलक्षणं बबन्ध तस्मात्तरसादिकान्ध्वनीन् ।
प्रपूरणं कर्तुमतोऽन्यदस्ति नः प्रयोजनं किंचिदपि स्फुटं यतः ॥ १ ॥

काशावित्याह । यस्या एकतः प्रथमः पादः सज (+स) लेषु, द्वितीयोपि नसजगुरुकेषु सत्सु, तृतीयो भनजलगुरूणि, ततोऽनन्तरं चतुर्थः सजसाजगौ चेति ॥ २१ ॥ अथानन्तरं संप्रतीदानीं तृतीयपादगतं यल्लक्ष्म लक्षणं तन्निरूपणं क्रियते किं तदिति । 'नौभगावपि' इत्येवं सौरभकं नाम वृत्तं भवति । 'भनज (+ ल) गुरूणि' इत्यस्यापवादो नौभगाविति । शेषकं प्रथमतृतीयचतुर्थपादाख्यमुद्गतासदृशमेव भवति रूपान्तरेण नावतिष्ठत इत्यर्थः । २२ ॥ इह छन्दःशास्त्रे तृतीयके चरणे नकारयोः सकारयोश्च द्वितयं भवति तल्ललितं नाम वृत्तमभिनिश्चितम् । कीदृशम् । प्रसृतया चतुर्षु पादेष्वनुगतया पदरचनया ललितं शोभनम् । चकारः उद्गतासदृशमेव शेषकमित्यस्यानुकर्षणार्थः । एवमुद्गता त्रिविधोक्ता ॥ २३ ॥ एवंविधमुपस्थितपूर्वं प्रचुपितं नाम वृत्तमनुगदितं

---

१ सज्य A; २ भनज्य० A; ३ च A; ४ जदि A; ५ रचनाया A; ६ तदिहापि कीर्तितम् A; B; ७ रचितं हि सल० A; B; ८ प्रपूर्ण A; ९ किंदपि A. १० नकर A; B; ११ सेषकः० A; B;

म्सौ[1] ज्भौ गौ च तुरीयमेकतः पृथ[2]गन्यत् ।
त्रितयं सनजरगेषु नौ सयुक्तौ ॥
अथ नयुतननजयाः ।
प्रचुपितमनुगदितमुपस्थितपूर्वम् ॥ २४ ॥
नौ स्नौ नाच्चै परं सकारमाह तृतीये ।
प्रथमात्पृथगपरेण वर्धमानम् ॥
प्रचुपितसदृशकमन्यदिह भ[4]वति शर्कलं ।
प्रतिनियत[5]चरणगतलक्ष्मविधानम् ॥ २५ ॥
[6]तस्मिन्नेव तृतीयके तकार[7]युतौ न्भौ ।
प्रथमे च विरति[8]रार्षभं वदन्ति ॥
तच्छुद्धविराड्विशेषणम् ।
प्रचुपितगणसममपरं त्रि[9]तयं चेत् ॥ २६ ॥

कीर्तितम् । उपस्थितप्र[10]चुपितमित्यर्थः । किंभूतम् । एकत इत्यादि । त्वात्तथिः । एकशब्दः प्राथम्ये । यस्य एकतस्तुरीयं प्रथमतः पादो म्सौ ज्भौ गौ मकारसकारौ जकारभकारौ गुरू च[11] द्वावित्यर्थः । अन्यत् त्रितयं द्वितीयतृतीयचे[12]तुर्थ पादत्रयं पृथक् पृथग्[13]भूतेन लक्षणेनावतिष्ठत इत्यर्थः । कीदृशेन । सनजरगेषु सत्सु द्वितीयः पादः। नौ सयुक्तौ तृतीयः पादः। अथानन्तरं नकारयुक्ता ननजयाश्चतुर्थः पादः । चकारः पूर्वापेक्षया समुच्चये ॥ २४ ॥ वर्धमानं नाम वृत्तकं तृतीये पादे नौ (+ स्नौ), नकाराच्च परं सकारमाह नयुगसननसान्ब्रवीतीत्यर्थः । कीदृशे तृतीये । प्रथामात्प्र[10]चुपिततृतीयपादलक्षणात्पृथग्भूतेनापरे (+ णा) न्येन लक्षणेन लक्षिते । तत्र हि नौ सयुक्ताविति तृतीयपादलक्षणमुक्तम् । अन्यत् श[14]र्कलं प्रथमद्वितीयचेतुर्थाख्यं पादत्रयं प्र[10]चुपितसदृशकं भवति । कुतः । चरणत्रि[15]तयगतं लक्ष्म तस्य विधानं रचना तद्विधानं प्रतिनियतं प्रचुपित [16]एव नियोजितं चरणगतलक्ष्मविधानं यस्येति विशेषणद्वारेण हेतूपन्यासः ॥ २५ ॥ तच्छुद्धविराड्विशेषणमार्षभं वदन्ति शुद्धविराडार्षभमित्यर्थः । किं तत् । आह ।

---

१ स्मौ C; २ प्रथ० A; C; ३ नात्वपरं A; ४ भवति dropped in A; भवति सकलं B; C; ५ नियतवणचरणलक्ष्म A; B; ६ अस्मिन्नेव A; B; ७ तकारपरौ A; B; ८ विरचितार्षभं C; ९ तृतयं C; १० प्रजुपित० B; ११ र A; B; १२ चतुराषाद० A; B; १३ भू is dropped in A; १४ सकलं A; B; १५ तृतीयगतं A; B; १६ एव A; B;

उपचित्रकमर्धमितो भवेत् ।
सौ सलगा भुवि भत्रितयाद्गौ ॥ २७ ॥
भत्रितयाद्गुरुणी द्रुतमध्या
नजसहितौ च गणौ भवतो ज्यौ ॥ २८ ॥
त्रिसकारचितेर्गुरुकं चेत् ।
वेगवतीति च भादथ भौ गौ ॥ २९ ॥
ज्ञेयस्तजरेफतो गकारो
म्सौ ज्गौ भद्रविराड् गसंहितौ स्यात् ॥ ३० ॥
सजकारसंहृतियुतौ स्गौ ।

तस्मिन्नेव पूर्वोपक्रान्ते तृतीयेक पादे तकारेण युक्तौ जकाररेफौ भवतः । वृत्तान्तरेभ्योऽस्य व्यतिरेकं दर्शयति । प्रथमे च विरतिरिति । तनुमध्यादौ हि सर्वत्र वृत्ते अर्धे एव विरामो दृश्यते । इह पुनः प्रथम एव पादेऽर्धवद्विरतिः । अवशिष्टं पादत्रयमर्धत्वमापद्यते । अपरं पादत्रयं प्रचुपितसंबन्धिभिर्मकारादिभिर्गणैः समं तुल्यं भवति चेत् ॥ २६ ॥ विषमवृत्तविवृतिः समाप्ता ॥ एवमुपस्थितप्रचुपितभेदास्तयोऽभिहिताः । संप्रत्यर्धसमानि वृत्तान्युपदर्शयति ।

याजुष्यस्त्रिष्टुभः पङ्क्तेरासुर्यश्चोपचित्रकम् ।
उदाहरणभावेन मतं छन्दोविदामिदम् ॥ १ ॥

इतोऽर्धे भवेत् आअध्यायपरिसमाप्तेरर्धसमानि वृत्तानि भवन्तीत्यर्थः । भुवि प्रस्तारभूमौ प्रथमतृतीययोः पादयोः सौ सलगाः द्वितीयचतुर्थयोश्च भत्रितयाद्गुरू भवतः । उपचित्रकं नाम वृत्तं भवति ॥ २७ ॥ प्रथमतृतीययोर्भकारत्रितयाद्गुरुणी भवतः । तृतीयचतुर्थयोश्च नजसहितौ जकारयकारौ गणौ स्यातां यदि द्रुतमध्या नामवृत्तं भवति ॥ २८ ॥ त्रयाणां सकाराणां समाहारस्त्रिसकारमिति । पात्रादित्वात्स्त्रीत्वाभावः । तस्य चितिर्विनियोजनं तस्याः परं गुरुकं यदि प्रथमतृतीययोः स्यात् । अथ द्वितीयचतुर्थयोर्भकारात्परौ भकारौ गुरू च इत्येवं वेगवती नाम वृत्तं भवति ॥ २९ ॥ तजरेफेभ्यो गकारो गुरुः प्रथमतृतीययोः मकारसकारौ जकारगुरू गसंहितौ गुरुयुतौ द्वितीयचतुर्थयोः भद्रविराण्नाम

---

१ उपचित्रमर्ध० C; २ भत्रित A; ३ तत्रित० A; ४ परं गु A; B; ५ भगव० A; ६ भद्रविरान् गुरुसहितं A; ७ स्जौ C; ८ प्रजुपित B; ९ अतो A; B; १० तृययोः B; ११ तृतयाद् A; B; १२ जकारजकारौ B;

केतुमती भरेफनगगन्ता ॥ ३१ ॥
आख्यानिका तौ जगुरू गुरुश्चेज् ।
जकारपूर्वास्तजगा गयुक्ताः ३२ ॥
जतौ जगौ गस्ततजा गुरू चे-
दाख्यानिकेयं विपरीतपूर्वा ॥ ३३ ॥
त्रिसकारचितेर्भवतो लगौ ।
नभभरैश्च गणैर्हरिणप्लुता ॥ ३४ ॥
ननरलगुरुका नजौ जरौ ।
भवति सदापरवक्त्रमीदृशम् ॥ ३५ ॥
भवति जगति नौ ततः परौ यौ ।
नजसहितैर्जरगैश्च पुष्पिताग्रा ॥ ३६ ॥
द्वौ रजौ तथापरौ जरौ गुरुश्च ।

वृत्तं भवति ॥ ३० ॥ प्रथमतृतीययोः सकारजकारसंहत्या युतौ सकारगुरू केतुमती नाम वृत्तं भवति । कीदृशी । द्वितीयचतुर्थयोर्भकाररेफनकारगुरवो यस्याः सा तथा । अन्यत्र गन्ता गुरुनिधना तयोः कर्मधारयः समासः ॥ ३१ ॥ प्रथमतृतीययोस्तकारौ द्वौ जकारगुरू गुरुश्चेद्भवन्ति द्वितीयचतुर्थयोस्तु जकारपूर्वास्तजगा गुरुणा युक्ताः आख्यानिका नाम वृत्तं भवति ॥ ३२ ॥ प्रथमतृतीययोर्जकारतकारौ जकारगुरू गुरुश्च द्वितीयचतुर्थयोस्ततजा गुरुद्वयं च यदि इयं विपरीतपूर्वा आख्यानिका भवति विपरीताख्यानिकेत्यर्थः । लक्षणद्वयमिदं प्रपञ्चार्थम् । उपजातिभेदेष्वेवान्तर्भावात् ॥ ३३ ॥ प्रथमतृतीययोस्त्रयाणां सकाराणां चयनाद्रचनातः परौ गलौ (r. लगौ) भवतः । द्वितीयचतुर्थयोश्च पादयोः नभभरैर्गणैर्हरिणप्लुता नाम वृत्तं भवति ॥ ३४ ॥ प्रथमतृतीययोः ननरलगुरुका द्वितीयचतुर्थयोश्च नजौ जरौ गणौ भवतः । ईदृशमपरवक्त्रं नाम वृत्तं सदा नित्यमेव भवति ॥ ३५ ॥ प्रथमतृतीययोर्नकारौ ततः परौ रेफयकारौ द्वितीयचतुर्थयोश्च नजसहितैर्नकारजकारयुक्तैर्जकाररेफगुरुभिः पुष्पिताग्रा नाम वृत्तं भवति । इयमौपच्छन्दसिकभेदो लक्षणस्य समानत्वात् ॥ ३६ ॥ प्रथमतृतीययोः

---

१ आख्यानकीयं A; B; २ परौ भवतो A; B; ३ हरिणप्लुतम् D. v. 28; ४ ननरलगुरुता A. D. v. 15; ५ ततश्च रो यो D. v.17; ६ ततः परौ A; B; ७ संहित्या A; ८ जकार dropped in A; ९ कीदृश॰ A; B; १० लक्षणस्य B.

यवध्वनेर्मतुप् स्त्रियां समाभिधेया ॥ ३७ ॥

त्रिकविहृतलघुकदशतयमपगतलघुयुगलमखिलमिदमपरम् ॥
सहगुरुकमुभयमपि समुपहितसललिततलघुपदविसृति भवति शिखा
॥ ३८ ॥ व्यतिहृतिपरिगतयुगयुगभवसकलचरणसमुपचितदलविरचना ।
इयमपि भवति जगति परिकुटिलचरणनिगदनसदृशसमभिधा ॥ ३९ ॥

इति जयदेवच्छन्दसि पञ्चमोऽध्यायः ॥

द्विः रेफजकारौ रेफजकारात्मकः समुदायो द्विर्भवतीत्यर्थः । द्वितीयचतुर्थयोश्च तथा तेन प्रकारेण परौ जकाररेफौ द्विरेव जकाररेफात्मकः समुदायो द्विर्भवतीत्यर्थः । गुरुश्चैको यदि यवध्वनेः यवशब्दात् मतुप् । ततोऽयं स्त्रीप्रत्ययस्तेन सम्यक् आसमन्तात् अभिधेया वाच्या वृत्तजातिर्भवति । यवमतीशब्देनाभिधीयत इत्यर्थः ॥ ३७ ॥ शिखा नामार्धसमभेदो भवति । प्रथमतृतीययोः पादयोरिदं लक्षणं त्रिकविहृतेत्यादि । त्रिकेण विहृतं त्रिकविहृतं लघुकानां दशतयं लघुकदशतयं त्रिकविहृतं लघुकदशतयं यस्य तत्तथोक्तम् । अपगतं भिन्नं त्रिकतो लघुभ्यः लघुयुगलं यस्य तत्तथा । इदमपरं द्वितीयचतुर्थपादलक्षणं अखिलं त्रिकलघुकमेव अमपगतलघुयुगलमित्यर्थः । उभयमपि चरणयुगलमपि गुरुणा सह वर्तते । किं कृत्वा भवति । समुपहितेत्यादि । सम्यगुपहिता योजिता सललिता संज्ञेया लघूनां पदानां विसृतिः प्रसरणं यस्मिंस्तथाविधं कृत्वा ॥ ३८ ॥ जगति इयमपि परितः समन्तात्कुटिलौ यौ चरणौ ताभ्यां निगदनं यस्य तेन सदृशी सम्यगभिधा प्रतिपादनं यस्याः सा तथा । खञ्जशब्दाभिधेयेत्यर्थः । कीदृशी व्यतिहृत्या परिगतौ वैपरीत्येनावस्थितौ यौ युग्मवौ द्वितीयचतुर्थौ अयुग्मवौ च प्रथमतृतीयौ तैः सकलैश्चरणैः सम्यगुपचिता संपादिता दल (+वि)रचना चरणयोर्जना यस्याः सा तथेति ॥ ३९ ॥
(+ इति) भट्टमुकुलात्मजहर्षटविरचितायां जयदेवच्छन्दो विवृतौ पञ्चमोऽध्यायः ॥

---

१ स्त्रियां समाभिधेयम् A; स्त्रियां समाभिधं यम् B; २ पदप्रसृति Com. ३ परिगति A; ४ समुपजनितपदरचना A; B; ५ समाभिधा A; ६ रा dropped in A; ७ तेनै B; तेनैव ? ८ जुगलं A; B; ९ अनुपगत A; B; १० वृसृतिः B; ११ निगदितं A; १२ यज्ञ A; B; १३ नारिथतौ A;

॥ अथ षष्ठोऽध्यायः ॥

त्यौ चेत्तनुमध्या ॥ १ ॥ कुमारललिता ज्सौग् ॥ २ ॥ चित्रपदापि च भौ गौ ॥ ३ ॥ मौ गौ चेत्सा विद्युन्माला ॥ ४ ॥ माणवकं भ्तौ लगुरू ॥ ५ ॥ राजसौ यदि हलमुखी ॥ ६ ॥ भुजगशिशुसृता नौ मः ॥ ७ ॥ भवति नसयैस्तु गुर्वी ॥ ८ ॥ भ्मौ मणिमध्यं सश्च यदा ॥ ९ ॥

गायत्री याजुषी दैवी त्रिष्टुप् चोदाहृतामुना ॥
तकारयकारौ चेत्तनुमध्या नाम वृत्तं भवति ॥ १ ॥

याजुष्युष्णिक् तथा दैवी जगत्यत्राप्युदाहृता ॥ १ ॥
जकारसकारौ गुरुश्चेत्कुमारललितं नाम वृत्तम् ॥ २ ॥

उदाहृतिस्त्रिसूत्रीयं यजुषां स्यादनुष्टुभः ॥
धात्रीयायाश्च गायत्र्या मता [छन्दोविदां तथा ॥ २ ॥]

[भकारौ द्वौ गुरू च] चित्रपदा नाम वृत्तं भवति । अपि चेति निपातसमुदायः पूर्वापेक्षया समुच्चये ॥ ३ ॥ मकारौ द्वौ गुरू च यदि भवन्ति सा विद्युन्माला नाम वृत्तजातिर्भवति ॥ ४ ॥ भकारतकारौ लगुरू च माणवकं नाम वृत्तं भवति ॥ ५ ॥

चतुःसूत्रीयमासुर्या जगत्या यजुषां तथा ।
बृहत्याः संमता नित्यं छन्दोविद् उदाहृतिः ॥ ३ ॥

रेफात्परौ यदि जकारसकारौ भवतः हलमुखी नाम वृत्तजातिर्भवति ॥ ६ ॥ नकारौ द्वौ मकारश्चैको भुजगशिशुसृता नाम वृत्तजातिर्भवति ॥ ७ ॥ नकारसकारयकारैर्गुर्वी नाम वृत्तं भवति । तुशब्दः पुनरर्थे ॥ ८ ॥ भकारमकारौ सकारश्च यदा भवन्ति तदा मणिमध्यं नाम वृत्तं भवति ॥ ९ ॥

---

१ At the beginning of this chapter the following verse is found both in A and B:—

आदिमध्यावसानेषु भजसा यान्ति गौरवम् । यरता लाघवं यान्ति मनौ त्रिगुरुलाघवौ ॥

२ चेत्तन्मध्या A; ३ Vv. 8 and 9 are not found in A and B both. ४ तथापि B; ५ Portion within brackets is dropped by both mss. I have supplied it by conjecture; ६ जयामुखी A; B; ७ श्चेको B; ८ शिशुसृता A; B;

म्सौ ज्गौ शुद्धविरोडितीरिता ॥ १० ॥ ख्यातोयं पणव इति म्नौ य्गौ ॥११॥ जौं मयूरसारिणी ततो गौं ॥१२॥ रुक्मवती भ्मौ स्गाविति विद्यात् ॥१३॥ चेम्पकमाला वान्यमतेन ॥ १४ ॥ त्जौ ज्गौ गिति चेयमुपस्थिता स्यात् ॥ १५ ॥ तौ ज्गौ गुरुश्चेद्भवतीन्द्रवज्रा ॥ १६ ॥ उपेन्द्रवज्रा तु जतौ जगौ गः ॥ १७ ॥ अनन्तरापादितलक्ष्मशोभौ । पादौ भवेतां विविधै-

आर्षुर्या त्रिष्टुभः पङ्क्तेर्याजुष्या अपि संमतम् ।
सूत्राणां पञ्चकमिदमुदाहरणदर्शने ॥ ४ ॥

मकारसकारौ जकारगुरू इति शुद्धविराट् नाम वृत्तजातिरीरिता उक्ता ॥ १० ॥ मकारनकारौ यकारगुरू इत्येवं पणवो नाम वृत्तविशेषः ख्यातः प्रथितः ॥ ११ ॥ रेफजकारौ ततश्च रेफगुरू मयूरसारिणीनाम वृत्तं भवति ॥ १२ ॥ भकारमकारौ सकारगुरू रुक्मवतीति विद्यात् ॥ १३ ॥ एषैव रुक्मवती चम्पकमाला अथवा भवति ॥ १४ ॥

यजुष्यास्त्रिष्टुभः पङ्क्तेरसुराणामथापि च ।
उदाहरणभावेन मता सूत्रत्रयोदशी ॥ ५ ॥

तकारजकारौ जकारगुरू गुरुश्च यदि भवन्ति उपस्थिता नाम वृत्तं भवति ॥ १५ ॥[१०] [तकारौ द्वौ जकारगुरू गुरुश्चेद्भवन्तीन्द्रवज्रा] नाम वृत्तं भवति ॥ १६ ॥ जतौ जगुरू गुरुश्च उपेन्द्रवज्रा नाम वृत्तं भवति ॥ १७ ॥ स्मृतीशैः शास्त्रार्थस्मरणनिपुणैस्ता उपजातयः स्मृताः इत्युक्तं कास्ता इत्याह । यासामिमौ पादौ विविधैर्नानाकारैर्विकल्पैश्चतुर्दशभिर्भेदैः भवेताम् । ते च चतुर्दश भेदाः प्रदर्श्यन्ते । प्रथम एवेन्द्रवज्रायाः पादो[११] द्वितीय एव वा तृतीय एव वा चतुर्थ ए(+ व) वेति चत्वारो भेदाः । प्रथमद्वितीयौ प्रथमतृतीयौ प्रथमचतुर्थाविति त्रयो भेदाः । द्वितीयतृतीयौ द्वितीयचतुर्थौ तृतीयचतुर्थावित्यन्येऽपि त्रयो भेदाः । प्रथमद्वितीयतृतीयाः चतुर्थ[? प्रथम]द्वितीयचतुर्थाः

---

१ विराड्मुदीरिता A; विराडुदीरिता B; २ V. 40 given below is found between v 13 and v. 14 in both A and B; ३ चेद्रमसाङ्ग; ४ जो गुरू चेत् D. v. 34 ५ This line is dropped here in A and B; but the whole stanza of 4 lines is repeated, along with v. 41, between v. 27 and 28; ६ आयुर्या B; ७ रीतिता B; ८ Both A and B add ततश्च after गुरू once more. ९ एवैक A; एवैक B; १० Portion within the brackets supplied by conjecture; ११ पादौ A; B;

विकल्पैः ॥ यासामिमौ अन्ययतिप्रपञ्चौ । स्मृताः स्मृतीशैरुपजातयस्ताः ॥ १८ ॥ भौ तु भगौ गिति दोधकमेतत् ॥ १९ ॥ म्तौ तगौ गश्चेच्छालिनी वेदलोकैः ॥ २० ॥ वातोर्मी म्भौ गदिता त्गौ गुरुश्च ॥ २१ ॥ म्भौ न्लौ गन्ता भ्रमरविलसिता ॥ २२ ॥ नौ रलौ गुरुयुता रथोद्धता ॥ २३ ॥ स्वागता रनभगैर्गुरुकान्ता ॥ २४ ॥ ननसगगिति च भवेद् वृन्ता ॥ २५ ॥

प्रथम [r. द्वितीय] तृतीयचतुर्थाः पादाश्चेत्येवं चतुर्दश भेदाः ।अत्र संग्रह श्लोकाः ।

आद्यो द्वितीयोऽथ तृतीय एव चतुर्थ एवेति भिदश्चतस्रः
आद्यो द्वितीयेन तृतीयकेन चतुर्थकेनेति भिदोऽपि तिस्रः ॥ ६ ॥
द्वितीयकाद्यः सतृतीयको वा सतुर्यको वेति भिदोद्वयं च ।
तृतीयकस्तुर्ययुतो भिदेका पूर्वो द्वितीयाद्वितृतीयकाभ्याम् ॥ ७ ॥
सार्धं तृतीयां[r. द्वितीयां]द्विचतुर्थकाभ्यां ततस्तृतीयाद्विचतुर्थकाभ्याम् ।
तिस्रो भिदोऽथानुभवेद्भिदेका द्वितीयकस्तुर्यतृतीययुक्तः ॥ ८ ॥
स्यादिन्द्रवज्रावृतमप्युपेन्द्रवज्राथ पादे[10] चरणेषु तस्मात् ।
दशोपजातेश्चतुरोऽथ भेदान् प्राहुः कवीन्द्रा निजकाव्यबन्धे ॥ ९ ॥

कीदृशौ पादौ । अनन्तरं पूर्वमिन्द्रवज्रोपेन्द्रवज्राभ्यामापादिता जनिता लक्ष्मशोभा लक्षणलक्ष्मीर्ययोस्तौ तथोक्तौ । अन्यच्च । अन्यैः[11] श्रवणपेयो यतिप्रपञ्चो[12] विरतिविस्तारो ययोस्तौ[13] तथोक्तौ ॥१८॥ भकारौ द्वौ भगुरू गुरुश्च इत्येतद्दोधकं नाम वृत्तं भवति ॥ १९ ॥ मकारतकारौ तकारगुरू गुरुश्च शालिनी नाम वृत्तं भवति। वेदलोकैश्चतुर्भिः सप्तभिश्च विरामैः[14] ॥ २० ॥ मकारभकारौ तकारगुरू गुरुश्च वातोर्मी वृत्तजातिर्गदिता कीर्तिता ॥ २१ ॥ मकारभकारौ नकारलघू भ्रमरविलसिता वृत्तजातिर्भवति । कीदृशी । गन्ता गुरुनिधना ॥ २२ ॥ रेफनकारौ रलौ च रथोद्धता वृत्तजातिर्भवति । कीदृशी । गुरुयुता ॥ २३ ॥ रनभगुरुभिः स्वागता भवति । कीदृशी । गुरुकान्ता गुरुकनिधना ॥ २४ ॥ नकारयुगं सकारगुरू गुरुश्च यदि भवन्ति इत्येवं वृत्तानाम वृत्तजातिर्भवेत् ॥ २५ ॥

१ म्त्तौ गौ चेत् D. v. 30; २ गुरुश्चेत् A: ३ मो भ्नौ ङगान्ता D. v. 25; ४ रो नरौ लगयुता D. v. 31; ५ गुरुणा च A; B; गुरुतोन्ते D. v. 19; ६ Between v. 24 and v. 25, A and B give v. 41 as given below. ७ आद्यो A; B; ८ काद्यः A; B; ९ वृत्तमेप्यु A; B; १० पादे च चर० A; B; ११ अन्यः श्रवण० A; B; १२ यदिप्रपञ्चैर्वि० B; १३ जयोस्तौ A; B; १४ विरामैः A; B;

ननरलगिति चैव भद्रिका ॥ २६ ॥ इयेन्युदीरिता रजौ रलौ गुरुः ॥ २७ ॥ वदन्ति वंशस्थमिदं जतौ जरौ ॥ २८ ॥ तादिन्द्रवंशा जरसंहिता मता ॥ २९ ॥ द्रुतविलम्बितमाह नभौ भरौ ॥ ३० ॥ वसुजलधिविरामौ नौ पुटा म्यौ ॥ ३१ ॥ षट्तु जससजसा जलोद्धतगतिः ॥ ३२ ॥ अथ तोटकमब्धिसकारचितम् ॥ ३३ ॥ भुजङ्गप्रयातं चतुर्भिर्यकारैः ॥ ३४ ॥ कीर्तितैषा चतूरेफिका स्रग्विणी ॥ ३५ ॥ प्रमिताक्षरा सजयुतावथ सौ ॥ ३६ ॥ मौ यौ पञ्चाश्वैर्वैश्वदेवीति नाम्ना ॥ ३७ ॥

नयुगं रलघू गुरुश्च इत्येतेन लक्षणान्तरेण भद्रिका नाम वृत्तजातिर्भवति ॥ २६ ॥ रजौ रलौ गुरुः श्ये[10]नी वृत्तजातिरुदीरिता ॥ २७ ॥

> सुभद्रादशकैर्नोष्णिग् भ्रात्रीयानेन याजुषी ।
> जगती सामनी चापि गायत्री समुदाहृता ॥ १० ॥

जतौ जरौ इदं वंशस्थं नाम वृत्तमुश[11]न्ति कथयन्ति ॥ २८ ॥ तकारौ द्वौ इंद्रवंशा[12] नाम वृत्तजातिर्भवति । कीदृशी । जकाररेफयुक्ता ॥ २९ ॥ द्रुतविलम्बितं नाम वृत्तं कर्तृ स्वलक्षणं नभौ भरौ आह ब्रवीति ॥ ३० ॥ नकारौ द्वौ मकारयकारौ पुटाख्या वृत्तजातिर्भवति । कीदृशी । वसुजलधिविरामा अष्टभिश्चतुर्भिश्च विरामो यस्या सा तथा ॥३१॥ जसजसाः जलोद्धतगतिर्वृत्तजातिर्भवति । षट् यदि षट्के षट्के विरामोऽस्या भवतीत्यर्थः ॥ ३२ ॥ अथानन्तरमब्धिसंख्याकैश्चतुर्भिः सकारैश्चितं रचितं तोटकं नाम वृत्तं भवति ॥ ३३ ॥ चतुर्भिः यकारैर्भुजङ्गप्रयातं भवति ॥३४॥ चत्वारो रेफा विद्यन्ते यस्याः सा एषा स्रग्विणी कीर्तिता ॥३५॥ सजयुतौ सकारौ द्वौ भवतः प्रमिताक्षरा वृत्तजातिर्भवति॥३६॥ द्वौ मकारौ यकारौ च द्वौ इत्येवं नाम्ना संज्ञया[13] वैश्वदेवी[14] वृत्तजातिर्भवति । कीदृशी । पञ्चाश्वा[15] पञ्च अश्वाश्च यस्याः सा तथा । पञ्चसप्तविरामेत्यर्थः ॥३७॥

---

१ Between v. 26 and v. 27 A and B give v. 42 as given below; २ सेन्यु० A; B; C; but see com. स्येनी=श्येनी; ३ Between v. 27 and v. 28 A and B give v. 41, 18 (both repeated) and v. 43 as given below; ४ संहितौ A; ५ Both A and B give v. 33 as given below betwden v. 29 and v 30; ६ मन्न A; B; ७ पुटो C; ८ Both A and B give vv. 44, 45 46 and 38 respectively as given below, between v. 32 and v. 33; ९ इत्येवन A; B; १० स्येनी B; ११ उसन्ति B; १२ वंसा B; १३ संज्ञाय A; B; १४ वैस्वदेवी B; १५ पञ्चास्वा B;

म्भौ स्मौ ख्याता जलधरमालाब्ध्यङ्गैः ॥ ३८ ॥ इति नवमालिनी नजयुतौ भ्यौ ॥ ३९ ॥ [म्भौ स्गौ चेत्सा भवति हि मत्ता ॥ ४० ॥ उपस्थितमिदं ज्सौ तौ गुरुश्चेत् ॥ ४१ ॥ पञ्चरसैः श्रीभेतनगौश्च ॥ ४२ ॥ चन्द्रवर्त्म रनभासविरचितम् ॥ ४३ ॥ गदितमिदं ततो[1] नौ म्रौ नामतः ॥ ४४ ॥ त्यौ त्याविति निर्दिष्टा पुष्पविचित्रा ॥ ४५ ॥ भवति ननभरैश्चलनेत्रिका ॥ ४६ ॥]

॥ इति जयदेवच्छन्दसि षष्ठोऽध्यायः[2] ॥ ६ ॥

मकारभकारौ सकारमकारौ जलधरमाला वृत्तजातिः ख्याता कीर्तिता । अब्ध्यङ्गैश्चतुर्भिरष्टभिश्च विरामैरित्यर्थः ॥ ३८ ॥ नययुतौ भकारयकारौ नवमालिनी वृत्तजातिर्भवति ॥ ३९ ॥ [इति भट्टमुकुलात्मजहर्षटविरचितायां जयदेवच्छन्दोविवृतौ] षष्ठोऽध्यायः ॥

---

१ गदिवमिततो A; B; the adopted reading is conjectural. २ Thus in brief, both in point of order and extent AB represent a text tradition which differs from that of C in this chapter. The latter i. e. C drops 7 metres (vv. 40-46) in all and adds (vv. 8-9). On the other hand, AB repeat 2 definitions (vv. 18, 41). The order of metres in the AB tradition is as follows 1-7; 10-13; 40; 14-24; 41; 25-26; 42, 27; 41; 18; 43; 28-29; 33; 30-32; 44-46; 38; 34-37; 39.

अथ सप्तमोऽध्यायः ।

म्नौ ज्रौ गस्त्रिकदशकौ प्रहर्षिणी[1] स्यात् ॥ १ ॥ जभौ सजौ गिति रुचिरा चतुर्ग्रहैः ॥ २ ॥ म्तौ य्सौ गन्तं सैव यतिर्मत्तमयूरम् ॥ ३ ॥ म्तौ न्सौ गौ पञ्चग्रहविरतिरसंबाधा ॥ ४ ॥ मुनियतिरपराजिता ननरस्लगैः ॥ ५ ॥ प्रहरणकलिता च ननभनलगैः ॥ ६ ॥ त्भौ जौ वसन्ततिलकं[2] गुरुकद्वयं चेत् ॥ ७ ॥ गुरुनिधनमनुलघुरिह[3] शशिकला ॥ ८ ॥ स्रगियमपि[4] च रसनवकविरमणा ॥ ९ ॥ वसुमुनियतिरिति

चैतुःसूत्रीयमासुयां उदाहृतिर (+ नु) ष्टुभः ॥

मकारनकारौ जकाररेफौ गुरुश्च प्रहर्षिणी वृत्तजातिर्भवेत् । त्रिकदशकौ विरामौ यती ॥ १ ॥ जभौ सजौ गुरुश्च इति रुचिरा वृत्तजातिर्भवति । चतुर्भि-र्ग्रहैश्चतुर्भिर्नवभिर्विरामैः ॥ २ ॥ मकारतकारयकारसकारा मत्तमयूरं नाम वृत्तं भवति । कीदृशम् । गन्तं गुरुनिधनम् । सैव यतिश्चतुर्ग्रहैरिति ॥ ३ ॥

उदाहृतिश्चतुःसूत्री मता सामासुरोष्णिहः ॥ १ ॥

मकारतकारौ नका(+सका)रौ गुरू च असंबाधा नाम वृत्तजातिर्भवति । कीदृशी । पञ्चसु ग्रहेषु च नवसु विरतिर्यस्याः सा तथा ॥ ४ ॥ ननरसल्गैर-पराजितानाम वृत्तजातिर्भवति । कीदृशी । मुनियतिः सप्ताक्षरविरामा ॥ ५ ॥ ननभनलगैः प्रहरणकलिता वृत्तजातिर्भवति । चकारः पूर्वापेक्षया समुच्चये ॥ ६ ॥ तकारभकारौ जकारौ द्वौ गुरुकद्वयं यदि भवन्ति वसन्ततिलकं नाम वृत्तं भवति ॥ ७ ॥

चतुःसूत्रीयमासुर्या गायत्र्याः स्यादुदाहृतिः ॥

इह छन्दःशास्त्रे शशिकला नाम वृत्तजातिर्भवति । कीदृशी । गुरुनिधने-त्यादि । गुरु निधनमन्तो येषां ते गुरुनिधनाः । मनवश्चतुर्दश तत्सं-ख्याका लघवो मनुलघवः गुरुनिधना मनुलघवो यस्याः सा तथोक्ता ॥ ८ ॥ इयमपि एषैव शशिकला स्रङ्नाम वृत्तजातिर्भवति । रसनवकेत्यादि । षट्सु नवके च विरमणं यस्याः सा तथोक्ता शशिकला । तस्यै इयानेव विशेषः ॥ ९ ॥ मणिगुणनिकरो नाम शशिकलाभेदो वृत्तविशेषो भवति । कीदृशः । वसुमुनि-

---

१ दशकैः प्रहर्षणीयम् D. v. 22; २ वसन्ततिलका A; ३ निवन० A; ४ श्रगिय० A; ५ सूत्रत्रयीय० ? ६ मकारतकारौ नकारोष्णिहः मकारतकारौ नकारौ गुरुश्च A; मकारतकारौ नकारौ गुरुश्च B; ७ पञ्चसु A.

मणिगुणनिकरः ॥ १० ॥ वसुमुनिविरतिश्चेन्मालिनी नौ मयौ यः ॥ ११ ॥ भ्रत्रिनगं[2] मुनेः खमृषभगजविलसितम् ॥ १२ ॥ यमौ न्सौ भ्लौ[3] गन्ता रसहरविरामा शिखरिणी[4] ॥ १३ ॥ वसुग्रहयुता जसौ जसयलाश्च पृथ्वी[5] गुरुः ॥ १४ ॥ दिङ्मुनि वंशपत्रपतितं भरनभनलगैः ॥ १५ ॥ भवति हरिणी न्सौ म्रौ[6] स्लौ गो रसोदधिसप्तकैः ॥ १६ ॥ मन्दाक्रान्ता मभनततगा गः समुद्रर्तुलोकैः ॥ १७ ॥ नजभजजा[7] लगौ च यदि नर्कुटकं तु तदा ॥ १८ ॥[8] म्तौ न्यौ यौ ज्ञेया कुसुमितलतावेल्लिता-

---

यतिः अष्टसप्तविराम इत्यर्थः । शशिकलासदृश एव शेषः[9] । शशिकला त्रिविधा प्रतिपादिता ॥ १० ॥ नकारौ द्वौ मकारयकारौ यकारश्च यदि भवन्ति मालिनी नाम वृत्तं भवति । कीदृशी । वसुमुनिविरतिः अष्टसप्तविरामेत्यर्थः ॥ ११ ॥

उदाहृतिरिदं सूत्रं धातुर्धाम्नोरनुष्टुभः[10] ॥ २ ॥

भकाररेफाभ्यां परे त्रयो नकाराः गुरुश्च ऋषभगजविलसितं नाम वृत्तं भवति । मुनेः खं सप्तभ्यो विरमणमित्यर्थः ॥ १२ ॥

सूत्राणि (+च) षडत्यष्टेरिमानि स्युरुदाहृतिः ॥

यकारमकारौ नकारसकारौ भकारलघू शिखरिणी[11] नाम वृत्तजातिर्भवति । कीदृशी । गन्ता गुरुनिधना । अन्यच्च रसहरविरामा षडेकादशयतिरित्यर्थः ॥१३॥ जसौ जसयला गुरुश्च पृथ्वी नाम वृत्तजातिर्भवति । कीदृशी वसुग्रहयुता अष्टनवकविरामेत्यर्थः ॥ १४ ॥ भरनभनलगैर्वंशपत्रपतितं नाम वृत्तं भवति । कीदृशम् । दिङ्मुनि दिशो मुनयश्च यस्य तत्तथा । दशसप्तविरमणमित्यर्थः ॥ १५ ॥ नकारसकारौ[12] मकाररेफौ सकारलघू गुरुश्च हरिणी नाम वृत्तं भवति। रसोदधिसप्तकैः षट्चतुःसप्तभिर्विरामैः ॥ १६ ॥ मभनततगा गुरुश्च मन्दाक्रान्ता नाम वृत्तजातिर्भवति । समुद्रर्तुलोकैः चतुःषट्सप्तभिर्विरामैः ॥ १७ ॥ नजभजजाः लघुगुरू च यदि भवन्ति तदा नर्कुटकं नाम वृत्तं भवति ॥ १८ ॥

---

१ वरति० A; २ भत्रिनगैः A; भ्रत्रिनगैः B; ३ भो ल्वन्ता D. v. 8; ४ A and B give v. 18 as given below between v. 13 and v. 14; ५ प्रथ्वी A; ६ म्रौ श्लौ B; C; ७ नजभजाजो A; ८ Both A and B give v. 35 as given below between v. 17 and v. 18; ९ शेषा A; B; १० धात्रिसाम्नीमनुष्टुभः A; B; ११ सिख० B; १२ सकारो B.

क्षर्तुलोकैः ॥ १९ ॥ यमौ न्सौ रौ गश्चेद् द्विरसविरतिर्मेघविस्फूर्जिताश्वैः ॥ २० ॥ म्सौ ज्सौ तौ गुरुकं च सूर्यर्तुरगैः शार्दूलविक्रीडितम् ॥ २१ ॥ म्रौ भ्नौ य्भौ ल्गौ मुनिभ्यः स्वररसविरतिः ख्याता सुवदना ॥ २२ ॥ वृत्तमेतदीदृशं तु नामतस्त्रिशो रजौ गुरुर्लघुश्च ॥ २३ ॥ म्रौ भ्नौ याश्च त्रयः स्युः स्वरमुनितुरगैः स्रग्धरा स्याद्विरामैः ॥ २४ ॥ विद्धि

गायत्र्याः स्यादृचां साम्नां बृहत्या इदमुदाहृतिः ॥ ३ ॥

मकारतकारौ नकारयकारौ तथा यकारौ द्वौ च कुसुमितलतावेल्लिता नाम वृत्तजातिर्भवति । अक्षर्तुलोकैः । अक्षाणीन्द्रियाणि । पञ्चषट्सप्तभिर्विरामैरित्यर्थः ॥१९॥

छन्दसोऽतिधृतेः सूत्रद्वयं त्विदमुदाहृतौ ॥

यमौ नकारसकारौ रेफौ द्वौ गुरुश्च यदि मेघविस्फूर्जिता वृत्तजातिर्भवति । कीदृशी । द्विः रसाः द्विरसाः । गतार्थत्वात्सुचो लोपः । तेषु षट्सु षट्सु विरतिर्यस्याः सा तथा । अश्वैः सप्तभिश्च विरामैः ॥ २० ॥ मकारसकारौ जकारसकारौ तकारौ द्वौ गुरुकं च शार्दूलविक्रीडितं नाम वृत्तं भवति । सूर्यचतुरैः द्वादशसप्तभिर्विरामैः ॥ २१ ॥

धात्रीयायाः बृहत्याः स्यात्साम्नां पङ्क्तेरथापि च ।
उदाहरणभावेन द्वितयं सूत्रयोरिदम् ॥ ४ ॥

मकाररेफौ भकारनकारौ यकारभकारौ लघुगुरू च सुवदना वृत्तजातिः ख्याता[12] कीर्तिता[12] । कीदृशी । मुनिभ्यः स्वररसविरतिः सप्तसु यतेरनन्तरं सप्तषड्विरतिः ॥ २२ ॥ त्रिशः[13] त्रीन् वारान् रेफजकारौ गुरुर्लघुश्च नाम (+तः) ईदृशमेतत् वृत्तं भवति सुवदनेव भवतीत्यर्थः । तस्या एवेदमपरं लक्षणम् ॥२३॥

ऋचां स्यादुष्णिहः सूत्रमिदं मतमुदाहृतिः ॥

मकाररेफौ भकारनकारौ यकाराश्च त्रयो भवेयुः स्रग्धरा नाम वृत्तं भवति । स्वरमुनितुरगैः स्वरा मुनयस्तुरगाश्च प्रत्येकं सप्तसंख्यास्तैर्विरामैः ॥ २४ ॥

सामनी[15] त्रिष्टुभेतेन[15] सूत्रेण समुदाहृता[16] ॥ ५ ॥

भरौ नरौ नरनगाः इदं मद्रकं नाम वृत्तं विद्धि जानीहि[17] । कीदृशम् । दशो-

---

१ सूर्यचतुरैः C and Com.; २ ह्जौ C; ३ मुनिव्योमगरस० D. v. 6; ४ त्रिधा A; B; ५ भगधरा A; ६ दिः रसाः २ A; द्विः रसाः द्विः रसाः B; ७ षड्सु षड्सु B; ८ असवै B; ९ सार्दूल० B १० वृत्तजातिः A; ११ द्वादश च सप्त B; १२ भवति A; १३ त्रिशः B; १४ सतमु० A; B; १५सामरी त्रिष्टुभेतेन B; १६ स is dropped in A; १७ विजानीहि for the two words in A.

भरौ नरौ नरनगा दशोष्णगुविरामि मद्रकमिदम् ॥ २५ ॥ इरतपनौ नजौ भजयुतौ भजौ भलगुरूणि चाश्वललितम् ॥ २६ ॥ मौ त्नौ नौ न्लौ मत्ताक्रीडं वसुविषयदिगिति भवति गुरुयुतम् ॥ २७ ॥ भ्तौ नसभा भ्नौ शरमुनितपनैर्येन युतापि[1] च भवति हि तन्वी ॥ २८ ॥ क्रौञ्चपदा भ्मौ स्भौ नचतुष्कं गुरु च शरविषयवसुमुनिविरतिः ॥ २९ ॥ मौ[2] त्नौ नौ रः सलाः प्राहुर्वसुमदनदहनमुनिभिर्भुजङ्गविजृम्भितम् ॥३०॥

ष्णगुविरामि दश च उष्णगवश्च दशोष्णगवौ (दश+) द्वादशेत्यर्थः । तत्र विरामो दशोष्णगुविरामः स विद्यते यस्य तत् तथोक्तम् ॥ २५ ॥

उभे सूत्रे इमे स्यातां विकृतेः समुदाहृतौ[3] ॥

नजौ भजयुतौ भजौ भलगुरूणि चाश्वललितं[4] नाम वृत्तं भवति । इरतपनौ यदि एकादशद्वादशविरतिः ॥ २६ ॥ मकारौ द्वौ तकारनकारौ नकारौ च द्वौ नकारो लघुश्च इत्येवं मत्ताक्रीडं नाम वृत्तं भवति । कीदृक् । गुरुयुतम् । तथा वसुविषयदिक् वसवो विषया दिशश्च[5] यस्य तत्तथोक्तम् । अष्टसु पञ्चसु दशसु[6] च विरतिरस्येत्यर्थः ॥ २७ ॥

ऋचामनुष्टुप् पङ्क्तिश्च धात्रीया सामनी तथा ॥ ६ ॥

जगती यति-गायत्री सूत्रेणोदाहृतामुना ॥

भकारतकारौ नकारसकारभकारास्तथा भकारनकारौ तन्वी वृत्तजातिर्भवति । कीदृशी । येन युता । अपिशब्दः पूर्वापेक्षया समुच्चये[7] । चशब्दः पादपूरणार्थः । हिशब्दो वाक्यालङ्कारे । शरमुनितपनैः पञ्चसप्त[8]द्वादशभिर्विरामैः ॥ २८ ॥

उदाहृतिमभिकृतेरिदं सूत्रं बुधा विदुः ॥ ७ ॥

भकारमकारौ सकारभकारौ नकाराणां चतुष्कं गुरु च क्रौञ्चपदा वृत्तजातिर्भवति । कीदृशी । शरविषयवसुमुनिविरतिः[9] पञ्चपञ्चाष्टसप्तविरामेत्यर्थः ॥ २९ ॥

आर्पादितानि[10] वृत्वाया वृवाऋचामिमे (?) ।

उभे सूत्रे भवेतां पाथ्युदाहरणमुत्कृतेः ॥ ८ ॥

मकारौ द्वौ तकारनकारौ नकारौ च द्वौ रेफसकारौ लघुगुरू इत्येते कर्तारो भुजङ्गविजृम्भितं नाम वृत्तं प्राहुः[11] कथयन्ति । वसुमदनदहनमुनिभिः

---

१ युतौ ननु भवति हि० A; २ मौ तो ना रः D. v. 47; ३ सकृत A; B; ४ चास्व० A; B; ४ विसश्च A; B; ५ दसशु A; B; ६ यदि A; B; ७ समुच्चयो शब्दः A; ८ सर A; B; ९ शस A; १० अपारितानि A; ११ प्राहुः dropped in A;

म्नौ नाः पञ्च सगाविति च नवरसवृषगतिविरमणमपवाहाख्यम् ॥ ३१ ॥ प्रथमक इह दण्डकश्चण्डवृष्टिप्रयातो भवेन्नद्वयेनाथ रैः सप्तभिः ॥३२॥ प्रतिपदमिह रेफवृध्द्या स्युरर्णोर्णवव्यालजीमूतलीलाकरोद्दामशङ्खादयः ॥३३॥ प्रचित इह कविभिर्वर्णितोऽस्मादिहोपात्तशेषत्रिकैरुत्तरैर्नद्वयाद्यैः ॥ ३४ ॥ [नजभजजेषु गौ यदि वदन्ति च वाणिनीं ताम् ॥३५॥ विषमाँक्षरपादं वा पादैरसमं दशधर्मवत् । तन्त्रेस्मिन्यदसिद्धं गाथेति तत्पण्डितैर्ज्ञेयम् ॥३६॥ माण्डूकी चित्रा वा सद्भिः कीर्तिता मौ मयौ यः ॥ ३७ ॥]

॥ इति जयदेवच्छन्दसि सप्तमोऽध्यायः ॥ ७ ॥

अष्टैकादशसप्तभिर्विरामैः ॥ ३० ॥ मकारनकारौ नकाराश्च पञ्च सकारो गुरुद्वयं च इत्येवमपवाहाख्यं नाम वृत्तं भवति । कीदृशं नवरसवृषगतिविरमणं नवषडेकादशविरमणमित्यर्थः ॥ छन्दोऽधिकारस्य पूर्णो विधिः ॥ ३१ ॥ इह छन्दःशास्त्रे नद्वयेनाथानन्तरं रेफैश्च सप्तभिः प्रथमक आद्यश्चण्डवृष्टिप्रयातो नाम दण्डको भवेत् । ॥ ३२ ॥ नद्वयेनाथ रैः सप्तभिरिति वर्तते । प्रतिपदं स्थाने स्थाने रेफवृध्द्या सप्तानां रेफाणामधिकेनाधिकेन रेफेण अर्ण-अर्णव-व्याल-जीमूतलीला-कर-उद्दाम-शङ्ख-इत्येवंसंज्ञका दण्डका भवन्ति । आदिशब्दः प्रकारे ॥ ३३ ॥ नद्वयेनेति वर्तते । इह दण्डकप्रकरणे कविभिः प्रचितो नाम दण्डको वर्णितः कैः करणभूतैः अस्मात्पूर्वोपक्रान्तचण्डवृष्टिप्रयाताख्यदण्डकादुपात्ताः परिगृहीताः रेफवर्जिता ये शेषा मकारादयस्त्रिकास्तैरुत्तरैः परैः । कीदृशैः नद्वयाद्यैः नद्वयमाद्यं येषां तैस्तथोक्तैः । केचित्तु व्याचक्षते ' नद्वयादुत्तरैर्यकारैः' इति । लक्षणे ह्यस्मिन्नकारद्वयादुत्तरे यकाराः सप्त दृश्यन्ते । महाकाव्येषु मकारादिरचितप्रचितदण्डकोदाहरणमन्वेष्टव्यम् । एतेषां मात्रावृत्तादीनां ग्रन्थगौरवभयादुदाहरणानि न प्रदर्शितानि । सुमतिभिः महाकाव्येभ्यो विचार्याणि ॥ ३४ ॥

[इति भट्टमुकुलकात्मजहर्षटविरचितायां जयदेवच्छन्दोविवृतौ] सप्तमोऽध्यायः ।

---

१ नवरसरसशरविरमण० A; B; २ दण्डश्चण्ड A; ३ नः द्वयेना० A; ४ जीमूल B; ५ संखादयः A; B; संख्यादयः C; Com. ६ इति A; B; D. v. 61; ७ A and B give vv. 36-37 after v. 34. ८ अष्टौकादश B; ९ णद्वये A; १० संख्येत्येवं B; संख्या इत्येवं A; ११ नाम दण्डिको A; नामको वर्णितः B; १२ चण्डवृष्ट० A; १३ परिगृहीतरेफ० B; १४ तेस्त० B; १५ सुमतीभिः B; १६ महाकाव्येभ्यो A; B;

॥ अथ अष्टमोऽध्यायः ॥

प्रस्तारो नष्टमुद्दिष्टमेकद्वित्रिलघुक्रिया ।
संख्या चैवाध्वयोगश्च षड्विधं छन्द उच्यते ॥ १ ॥
सर्वत्रैव च्छन्दसि संस्थाप्यादौ समस्तगुरु वृत्तम् ।
आद्यस्य तत्र गुरुणो लघु कृत्वाधः समं शेषम् ॥ २ ॥
विधिमेतमेव कुर्याद्भूयोऽप्यार्दि च पूरयेद् गुरुभिः ।
इति यावत्सर्वलघु प्रस्तारे वृत्तविधिरेषः ॥ ३ ॥

एवं मात्रावृत्तसमार्धसमविषमवृत्तानि प्रतिपाद्य संप्रति प्रस्तारादीन् श्लोकेनोद्दिशति । छन्दः षड्विधमुच्यते । कथम् । आह । प्रस्तारः, नष्टं, उद्दिष्टं, एकद्वित्रिलघुक्रिया, संख्या चैव अध्वयोगश्चेत्येवम् । एते प्रस्तारादयः आक्षिप्तस्वसंबन्धोपाध्यक्षरादिवृत्ता द्रष्टव्याः । अन्यथा छन्द इति वाचोयुक्तिरसंबद्धा स्यात् । अक्षरकोशात्मकं छन्द इति ह्युच्यते । तथा च तत्रभवन्त आहुः । प्रस्तारादौ क्रियाभेदे च्छन्दोवृत्तोपचारकीति ॥ १ ॥ सर्वत्रैव विश्वस्मिन्नेव एकद्व्यक्षरादिरूपे छन्दसि आदौ पूर्वं समस्तानि गुरूणि यस्य तादृशं वृत्तं गुरुसमुदायस्वभावं संस्थाप्य विन्यस्य अनन्तरं तत्र वृत्ते यदाद्यं प्रथमगुरु तस्याधोऽधुने[7] (?) लघु कृत्वा विन्यस्य शेषं पूर्वापेक्षितया समं संस्थाप्य एतमेव विधिमाद्यस्य गुरुणोऽधो लघुकरणं समं [10] शेषमित्येवंरूपं भूयोऽपि पुनः

---

१ षडेते प्रत्ययाः स्मृताः A; B; २ In place of vv. 2-12 both A and B contain the following four stanzas, colophon and the scribe's autograph:- गुर्वादौ वर्णसमं गुरोरधो लघुस्ततो ह्युपरि तुल्यम् । लघुतुल्यगुरूणि न्यसेत् लब्धेकं शेषमुपरि समम् ॥ २ ॥ नष्टैकं छित्वार्धे लघूनि विद्याद्गुरूणि तत्सैके । स्थानद्विगुणैरङ्कैर्लघुमिश्रैः सैकमुद्दिष्टम् ॥३॥ एकादीन्येकोत्तरकान्वर्णसमान्क्षिपेदुपर्युपरि । मुक्त्वाद्यादेकैकमेकद्व्यादि लघु विद्यात् ॥४॥ सार्धं संकलिता संख्या द्वि(+ क)गुणरूपवर्जिताध्वानम् । षट्प्रत्ययसंक्षेपः प्रोक्तस्त्वथ विस्तरं वक्ष्ये ॥५॥ इति जयदेवच्छन्दसि अष्टमोऽध्यायः समाप्तः । संवत् ११९० मार्गशुदि १४ सोमदिने श्रीसर्वदेवाचार्याय शिष्यस्य देवचन्द्रस्यार्थे पं० श्रीधरेण जयदेवच्छन्दमूलसूत्रमलेखि ॥ पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः । षष्ठं गुरु विजानीयादेतच्छ्लोकस्य लक्षणम् ॥ १ ॥ ३ सेर्व C; ४ वाचाबद्ध A; B; ५ कोसात्मकं B; ६ क्रियाभेदे छन्दोवृत्तौ० ? ७ तुने लघु B; ८ समे A; B; ९ गुरुणोमे A; B; १० सेष० B;

नष्टे यावतिथं स्याद्वृत्तं संस्थापयेत्तमेवाङ्कम् ।
अर्धेनावच्छिन्द्यात्समं हि कृत्वेतरत्सैकम् ॥ ४ ॥
एवं हि क्रियमाणे सैके गुर्वक्षराणि लभ्यन्ते ।
इतरत्र लघून्येवं प्रनष्टमुत्पादयेद्वृत्तम् ॥ ५ ॥
उद्दिष्टं कतिथमिदं वृत्तं संस्थापयेदुपरि तस्य ।
स्थानद्विगुणानङ्कानेकादीनक्षरक्रमशः ॥ ६ ॥
ये सन्त्युपरि लघूनि तेषां तैर्मिश्रितैस्तु यो राशिः ।
भवति गतैस्तावद्भिः प्रस्तारविधौ तु तद्वृत्तम् ॥ ७ ॥

पुनः कुर्यात् आदिं च गुरुभिः पूरयेत् तावद्विन्यस्येद्यावत्सर्वे लघवो भवन्ति। एष प्रस्तारे वृत्तविधिः वृत्तानां प्रस्तारे एष विधिः। एवं प्रस्तरणीयानि वृत्तानि। एकद्वित्रिचतुरक्षरवृत्तानां प्रस्तारः प्रदर्श्यते। एकैकाक्षरस्य तावत् [S]। द्व्यक्षरस्य [SS, ।S, S।, ।।]। त्र्यक्षरस्य [SSS, ।SS, S।S, ।।S, SS।, ।S।, S।।, ।।।]। चतुरक्षरस्य [SSSS, ।SSS, S।SS, ।।SS, SS।S, ।S।S, S।।S, ।।।S, SSS।, ।SS।, S।S।, ।।S।, SS।।, ।S।।, S।।।, ।।।।]। एवमेकद्वित्रिचतुरक्षरवृत्तानां प्रस्तारः प्रदर्शितः। अनयैव दिशा पञ्चाद्यक्षराणि वृत्तानि प्रस्तरणीयानि ॥ २ ॥ ३ ॥ यावतां पूरणं यावतिथमिति 'डेटिवतोरिथुक्[1] (पा० ५-२-५३) इत्यनेन थुगागमः। यावतिथं द्वितीयं तृतीयं वा वृत्तं नष्टं स्यात्तमेव द्वित्रि[2]प्रत्यायकमङ्कं संस्थापयेत् उल्लिखेत्। समं द्विचतुरादिप्रत्यायकमङ्कमर्धेनावच्छिन्द्यात्। इतरमेकत्र्यादिप्रत्यायकमङ्कं सैकं कृत्वा अर्धेनावच्छिन्द्यात्। एवं हि क्रियमाणे सैके अर्धेनाव[3]च्छिद्यमाने अङ्के गुरुण्यक्षराणि लभ्यन्ते। इतरत्र समे द्विचतुरादिप्रत्यायकेऽर्धेनावच्छिद्यमाने लघूनि लभ्यन्ते। एवं चानया युक्त्या प्रनष्टं वृत्तमुत्पादयेत् ॥ ४ ॥ ५ ॥ कतीनां पूरणं कतिथमिति डेटिषट्कतिकतिपयचतुरां थुक् (पा० ५-२-५१) इति थुगागमः। [5]कतिथं किंसंख्याकमिदं वृत्तमित्युद्दिष्टं प्रस्तीर्योपदर्शितं यत्तस्योप[6]रि अक्षरक्रमेण स्थाने स्थाने एकादीनङ्कान्संस्थापयेत्। तेषामक्षराणां मध्ये यानि लघ्व[7]क्षराणि

---

१ तुति० A; B; २ द्वितप्र० A; B; ३ नार्धं छिद्य० B; ४ तुति० A; B; ५ कथिये B;
६ Portion beginning with रि अक्षर and ending with मक्षराणां is dropped in A;
७ लघूक्षराणि B;

वृत्ताक्षराणि यावन्त्येकेनाधिकतराणि तावन्ति ।
ऊर्ध्वक्रमेण रूपाण्यादौ विन्यस्य तेषां तु ॥ ८ ॥
आद्यं क्षिपेद्द्वितीये द्वे च तृतीयेऽथ तान्यपि चतुर्थे ।
एवं यावदुपान्त्यं कुर्यात्त्वेवं हि भूयोऽपि ॥ ९ ॥
यदधो भवन्त्युपान्त्यात्तत्प्रभृति पुनः क्रमान्निवर्तन्ते ।
एकद्वित्रिलघूनि प्रथमाद् गुरुगो भवन्त्येव ॥ १० ॥

तदुपरि येऽङ्काः सन्ति तैर्मिश्रितैः[1] पिण्डीकृतैर्यो राशिः[2] पिण्डीकरणमङ्कानां भवति गतैस्तावद्भिः प्रस्तारविधौ तद्वृत्तं भवति यथा—षडक्षरस्य वृत्तस्य तनुमध्या कतिथं वृत्तं भवतीति पर्यनुयोगे सत्युच्यते । तनुमध्याया द्वौ लघू विद्येते तदुपरिवर्तिनावङ्कौ[3] चतुरष्टकौ[3] मिश्रीकृत्य[4] द्वादश भवन्ति तैरपगतैः त्रयोदशी[5] वृत्तजातिस्तनुमध्या संपद्यते ॥ ६ ॥ ७ ॥ यावन्तीति 'यत्तदेतेभ्यः परिमाणे वतुप्' (पा० ५-२-३९) । यावन्ति यत्परिमाणानि वृत्ताक्षराणि तावन्ति तत्परिमाणान्यथ एकेनाक्षरेणाधिकतराणि कार्याणि । आदौ प्रथमं तेषां वृत्ताक्षराणामूर्ध्वक्रमेण रूपाण्यङ्कान्[6] विन्यस्यानन्तरमाद्यमेकमङ्के द्वितीये एकस्मिन् अङ्के निक्षिपेत् तेन सहैकीकुर्यादित्यर्थः । एवं तद्वदेव उपान्त्यमन्त्यसमीपं यावत्कुर्यात् । एवं भूयः पुनः पुनरपि । उपान्त्यादन्त्यसमीपादधोऽधो यद्भवति तत्तत्प्रभृति ततस्तत आरभ्य क्रमात्क्रमान्निवर्तन्ते रूपाणि न मिश्रीकार्याणीत्यर्थः । एवं स्थिते सति[7] प्रथमात्प्रथमाद्गुरुणोनन्तरमेकद्वित्रिलघूनि भवन्ति । यच्च तत्प्रथमं तत्सर्वगुर्वात्मकम् । लघुशब्द उपलक्षणार्थः । तेन अधस्तनादेकस्मात् ऊर्ध्वक्रमेण एकाद्वित्रिगुरूणि भवन्ति । अधस्तनं तु सर्वलघुरूपम् । प्रथमाधस्तनयोश्च वृत्तयोः यथाक्रमं सर्वगुरुरूपता सर्वलघुरूपता च प्रस्तारविधावुपदर्शिता । षडक्षरस्य वृत्तस्योर्ध्वक्रमेण केवलानां मिश्रीभूतानां च रूपाणां प्रस्तारः । अयं ऊर्ध्वक्रमेण केवलानां मिश्रीभूतानामप्यङ्कानां प्रस्तारः समुपदर्शितः । एवं प्रारम्भे वृत्तं सर्वगुरु; अन्ते च सर्वलघु; मध्ये षडेकलघूनि द्विलघूनि पञ्चदश त्रिलघूनि विंशतिः । तथा षडेकगुरूणि, द्विगुरूणि पञ्चदश; त्रिगुरूणि विंश-[8]

---

१ मिश्रितैः B; २ राशिः A; B; ३ वङ्काचतुष्टाककौ A; B; ४ मिश्री B; ५ त्रयोदसी B; ६ रूपान्यङ्कान् A; B; ७ स्यति B; ८ विंशतिश्च B.

एष्वेवं पिण्डितेषु च संख्या प्रस्तारविरचिता भवति ।
उद्दिष्टविधानाङ्कैः सैकैर्मिश्रीभवन्त्यथवा ॥ ११ ॥
द्वाभ्यां समाहता संख्या रूपेणैकेन वर्जिता ।
छिन्नवृत्ताङ्गुलव्याप्तिरध्वयोगः प्रकीर्तितः ॥ १२ ॥

॥ इति जयदेवच्छन्दसि अष्टमोऽध्यायः ॥

तिश्च वृत्तस्य षडक्षरस्य भवन्ति । क्व तर्हि तानि दृश्यन्ते इत्याशङ्क्यायमुप- दर्श्यते[2] प्रस्तारः[3] ॥ ॥ ८ ॥ ९ ॥ १० ॥ पूर्वोदाहृतस्यैव षडक्षरस्य वृत्तस्य एष्वेव[4] एकद्वित्रिलघुप्रदर्शनोपयोगिष्वङ्केषु एकषट्पञ्चदशविंशतिपञ्चषडेकाख्येषु पिण्डितेषु मिश्रीकृतेषु[5] सत्सु चतुःषष्ट्याख्या संख्या भवति कीदृशी । प्रस्ता- रेण गुरुलघुविन्यासेन विरचिता । अथवा उद्दिष्टविधानाङ्कैः एकद्विचतुरष्टषो- डशद्वात्रिंशद्रूपैः सैकैः एकाधिकैः मिश्रैः[5] पिण्डीकृतैः सैव चतुःषष्ट्याख्या संख्या भवति ॥ ११ ॥ षडक्षरस्य वृत्तस्य चतुःषष्ट्याख्या संख्या द्वाभ्यां समाहता द्विगुणिता अष्टाविंशं[6] शतमित्यर्थः । एकेन रूपेणाङ्केन वर्जिता संख्या[7] शतं[8] सप्तविंशत्यधिकमित्यर्थः । एवंविधोऽध्वयोगः अध्वसंबन्धः प्रकीर्तितः । कीदृशः । छिन्नवृत्तं गुरुलघुसमुदायो यस्याः तादृशी अङ्गुलमानेन व्याप्तिरङ्गु- लव्याप्तिः यस्य स तथोक्त इति सिद्धम् ॥ १२ ॥

[इति] भट्टमुकुलकात्मजहर्षटविरचितायां जयदेवच्छन्दोविवृतावष्टमोऽ- ध्यायः ॥ समाप्तं जयदेवच्छन्दोविवरणम् ।

---

१ त्यासंख्या B; २ उपदर्शति A; उपदर्शते B; ३ Graphical representation of the Prastāra of the Chandas with 6 letters given in the mss. is dropped. ४ वृ dropped in A; ५ मिश्रैः B; ६ अष्टाविंशतमित्यर्थः A; ७ संख्या B; ८ शतं B.

अथ जयकीर्तिकृतं छन्दोनुशासनम्

प्रथमोऽधिकारः†

श्रीवर्धमानमानम्य छन्दसां पूर्वमक्षरम् ।
लक्ष्यलक्षणमावीक्ष्य वक्ष्ये छन्दोऽनुशासनम् ॥ १ ॥
छन्दःशास्त्रं वहित्रं तद्विविक्षोः काव्यसागरम् ।
छन्दोभाग् वाङ्मयं सर्वं न किंचिच्छन्दसा विना ॥ २ ॥
नागरऋकारवक्रो गुरुर्द्विमात्रो गसंज्ञको ज्ञेयः ।
लघुरेकमात्रिकः स्यादृजुरूर्ध्वाङ्गुलनिभो लसंज्ञश्च ॥ ३ ॥
दीर्घो गुरुः प्लुतोऽपि ह्रस्वो लघुरेष वा गुरुः पादान्ते ।
संयोगविसर्गानुस्वारव्यञ्जनपरो गुरुः स्याद् ह्रस्वः ॥ ४ ॥
संयोगपरोऽपि जातु वर्णः
शैथिल्याल्लघुतामुपैति तस्मात् ।
भाषाविषयेऽन्यथा जगद्वा—
ण्येदोदौ तु गुरू लघू च दृष्टौ ॥ ५ ॥
मयरसतजभनवर्णा भूतोयानलमरुद्भभोऽर्केन्दुदिवः ।
वृत्तगणाः क्रमशोऽष्टौ प्रस्तारे विद्धि मध्यमच्छन्दसि तान् ॥ ६ ॥
गुरोरधस्ताल्लघुमादितः क्षिपेत्
परं लिखेदूर्ध्वसमं पुनस्तथा ।
पाश्चात्यखण्डं गुरुणा प्रपूरयेत्
यावद्गणः सर्वलघुत्वमाप्यते ॥ ७ ॥
सर्वगुरुर्मगणः क्षितिरादिलघुर्यः पयोगणो ज्ञेयः ।
मध्यलघू रोऽग्निः स्यादन्तगुरुः सो मरुन्नाम्ना ॥ ८ ॥
अन्तलघुस्तगणः खं मध्यगुरुर्जगण उच्यते सूर्यः ।
आदिगुरुर्भश्चन्द्रः सर्वलनः स्वर्गिकाः सर्वेऽपि ॥ ९ ॥
वाग्विरामो यतिः स्यात्संस्थाप्यते श्रुतिसुन्दरम् ।
पादान्ते सूचितस्थाने युक्पादान्ते विशेषतः ॥ १० ॥

---

† Obvious mistakes of the scribe are corrected; the Avagraha is regularly marked though the scribe does not do so. The same is true of Sandhis.

सन्धिविकारः समभर इत्येकोऽर्थस्तथेष्यतेऽत्र विरामः ।
लुप्तविभक्तिकपदमिति समासपदमुच्यते यथा तत्र यतिः ॥ ११ ॥
सञ्चारित्राण्यघकुलहराण्यर्हतोऽन्यत्र न स्युः
तत्रैवाप्तप्रवचनपदार्थाश्च युक्त्या घटन्ते ।
तस्मात्तन्निश्चितमिति विनेयाः श्रयन्त्यात्मवन्तो
यत्युक्तोदाहरणमिदमित्यादिरस्ति प्रयोगः ॥ १२ ॥
वाञ्छन्ति यतिं पिङ्गलवसिष्ठकौण्डिन्यकपिलकम्बलमुनयः ।
नेच्छन्ति भरतकोहलमाण्डव्याश्वतरसैतवाद्याः केचित् ॥ १३ ॥
पृथग्विधानाद्रचनाविशेषः
फलं कवेर्लक्षणमाद्यमेव ।
प्राग्वद्यतिर्नाम च नान्यथात्र
लोकप्रसिद्धौ न कुतो विवादः ॥ १४ ॥
उक्तमेकाक्षरं छन्दोऽत्युक्तं तद्द्व्यक्षरं तथा ।
मध्यमं त्र्यक्षरं छन्दः प्रतिष्ठा चतुरक्षरी ॥ १५ ॥
सुप्रतिष्ठा पञ्चाक्षरी गायत्री तु षडक्षरी ।
उष्णिक् सप्ताक्षरी ज्ञेयानुष्टुबष्टाक्षरी ततः ॥ १६ ॥
बृहती नवाक्षरी स्यात्पङ्क्तिस्तु दशाक्षरी ततस्त्रिष्टुप् ।
एकादशाक्षरीत्यपि शेषाश्चैकैकवृध्या स्युः ॥ १७ ॥
जगती तथातिजगती शक्वर्यतिशक्वरी ततश्चाष्टिः ।
अत्यष्टिर्धृतिरतिधृतिरतः कृतिः प्रकृतिराकृतिर्विकृतिश्च ॥ १८ ॥
संकृतिरभिकृतिरुत्कृतिरिति षड्विंशतिरनुक्रमाच्छन्दांसि ।
वृत्तानीह भवन्ति हि षड्विंशति तत्परं तु मालावृत्तम् ॥ १९ ॥
वृत्तं जातिरिति द्वेधा पद्यं तत्तु चतुष्पदी ।
गणबद्धं तथा वृत्तं जातिर्मात्रागणाश्रिता ॥ २० ॥
वृत्तं सममर्धसमं विषमं मालाख्यमिति चतुर्धा; जातिः ।
आर्या मात्रासमकं वैतालीयं द्विपद्यपीति चतुर्धा ॥ २१ ॥
संस्कृतवाच्यार्याद्याः प्राकृतविषये तु गलितकाद्या बहुधा ।
कर्णाटकेऽक्षराद्या विषये × ‡ × शीर्षकादिजातय उदिताः ॥ २२ ॥

‡ One long or two short letters are missing.

दण्डकाश्चण्डवृष्टयाद्याः पादांशनियमोदिताः ।
अपादनियमाश्चोक्ता गणधा गद्यदण्डकाः ॥ २३ ॥
स्वच्छन्दःसंज्ञा रघटा मात्राक्षरसमोदिताः ।
पादद्वन्द्वसमाकीर्णा सुश्रव्या सैव पद्धतिः ॥ २४ ॥
पादा(r. दोऽ)क्षरमात्रानियमोदितपिण्डोऽथ पादवत्पद्यं स्यात् ।
पादद्वितीयवर्णः पादं पादं य एति सोऽनुप्रासः ॥ २५ ॥
गद्यं हृद्यमपादोक्तिसमासपदसंचितम् ।
ततोऽन्यच्चूर्णिरित्युक्ता वचनं वाक्यबन्धुरम् ॥ २६ ॥
सममेकेन द्वाभ्यामर्धसमं दृश्यते चतुर्भिः पादैः ।
विषमं जातिश्च तथा प्रस्तारप्रत्यये यथा तद्व्याप्तिः ॥ २७ ॥
एकद्वित्र्यादिसंख्यार्थं चन्द्रनेत्रपुरादिकम् ।
छन्दोऽर्थं गृह्यते लोकान्नाप्रयुक्तं प्रयुज्यते ॥ २८ ॥
॥ इति जयकीर्तिकृतौ छन्दोऽनुशासने संज्ञाधिकारः प्रथमः ॥

द्वितीयोऽधिकारः

योऽर्हन्सोऽव्यात् ॥ १ ॥ उक्ते गे श्रीः ॥ २ ॥ लि नु स्त्रिहि ॥ ३ ॥ विध्यत्युक्ते । गौ चेत्पद्मम् ॥ ४ ॥ लगौ यदा । तदा सुखम् ॥ ५ ॥ ग्ले तु यत्र । जातु जन्तु ॥ ६ ॥ लिलि सति । वलिरिति ॥ ७ ॥ मे मध्ये धीमन्तः । श्यामाङ्गीं तामाहुः ॥८ ॥ वनं चेन्मनोज्ञं । मनोहृज्जनानाम् ॥ ९ ॥ रे सुधीर्भासते । सा सुधी धीमताम् ॥ १० ॥ पवने प्रवरं । प्रविदुः प्रवराः ॥ ११ ॥ तेनैव सेनेति । केनाप्यमानीह ॥ १२ ॥ रवौ तु रुधीह । सुविद्धि सुवस्तु ॥ १३ ॥ यद्यविभोद्य च । हृद्यमिहोद्यति ॥ १४ ॥ नगणयुगथ । दृगिति जगति ॥१५ ॥ प्रातिष्ठेयी । गीतिर्माद्गः ॥ १६ ॥ यगौ वृद्धिः ॥ १७ ॥ रादूगि चर्द्धिः ॥ १८ ॥ सुमतिः स्गौ ॥ १९ ॥ तारा तगौ ॥ २० ॥ जगौ जया ॥ २१ ॥ भ्गौ सुमुखी ॥२२॥ मधु नगौ ॥ २३ ॥ वल्ली माल्लि ॥ २४ ॥ यलौ सद्म ॥ २५ ॥ वर्त्म राल्लि ॥ २६ ॥ कदली स्लि ॥ २७ ॥ ताल्लि त्रपु ॥ २८ ॥ जपा जलि ॥ २९ ॥ भाल्लि जतु ॥ ३० ॥ नलि दधि ॥ ३१ ॥ सुप्रतिष्ठायाम् ।

राद्गुरू प्रीतिः ॥ ३२ ॥ किंच भगौ गः । काञ्चनमाला ॥ ३३ ॥ राज्गौ धृतिः ॥ ३४ ॥ सती जगौ गः ॥ ३५ ॥ शर्म भलगाः ॥ ३६ ॥ नन्दा तलगौ ॥ ३७ ॥ सलगौ रमा ॥ ३८ ॥ तिष्ठद्गु ताङ्गौ ॥ ३९ ॥ सुदती साङ्गौ ॥ ४० ॥ नलगि धृतिः ॥ ४१ ॥ गायत्र्यां तटी म्यौ ॥ ४२ ॥ मौ चेत्सावित्री स्यात् ॥ ४३ ॥ त्यौ चेत्तनुमध्या ॥ ४४ ॥ कामललिता भ्यौ ॥ ४५ ॥ कनकलता न्यौ ॥ ४६ ॥ मात्सश्चेन्मुकुलम् ॥ ४७ ॥ मणिरुचिर्नरौ ॥ ४८ ॥ यदि सौ कुमुदम् ॥ ४९ ॥ यदा यौ द्रुतं स्यात् ॥ ५० ॥ हंसमाला रगौ ॥ ५१ ॥ उष्णिहि भजग्धुनी ॥ ५२ ॥ भौ गपरौ कलिका ॥ ५३ ॥ भौ गश्चेद्गान्धर्वी स्यात् ॥ ५४ ॥ तात् स्गौ भ्रमरमाला ॥ ५५ ॥ कुमारललिता ज्सौग् ॥ ५६ ॥ माद् भो गश्चेत्सरलम् ॥ ५७ ॥ गोमिनीह राज्गौ ॥ ५८ ॥ चित्रमिह भनगैः ॥ ५९ ॥ ननगिह लटहः ॥ ६० ॥ भ्सौ गिह मदलेखा ॥६१॥ आनुष्टुभि ताज्लगाः ॥ ६२ ॥ म्रौ ल्गौ चेद्वक्ष्यते क्षमा ॥ ६३ ॥ मौ गौ चेत्सा विद्युन्माला ॥ ६४ ॥ प्रमाणिका जरौ लगौ ॥ ६५ ॥ रात् ज्गालैः समान्यमानि ॥ ६६ ॥ भौ च गुरू च वितानम् ॥ ६७ ॥ चित्रपदा कथितैतत् ॥६८॥ माणवकं भात्तलगाः ॥ ६९ ॥ नाराचकं तरौ लगौ ॥ ७० ॥ तौ गौ यदा केतुमाला ॥ ७१ ॥ नरलगैः सुमालती ॥ ७२ ॥ बृहत्यां बृहत्यं त्रयो याः ॥७३॥ मात् त्यौ स्तश्चेत् सुन्दरलेखा ॥ ७४ ॥ बृहतीजमक्षि सजसैः ॥ ७५ ॥ राज्सौ खलु हलमुखी ॥७६॥ जतौयदा चारुहासिनी ॥७७॥ भुजगशिशुसृतं नौ मः ॥७८ ॥ विद्युदयमत्र भजसैः ॥ ७९ ॥ भौ रपरौ तदनूत्सुकम् ॥ ८० ॥ भद्रिका भवति राज्रौ ॥ ८१ ॥ ननरयुतमुपच्युतम् ॥ ८२ ॥ गाथा मात्सयुगे कथिता ॥ ८३ ॥ पङ्क्तौ शुद्धविराण् मसौ जगौ ॥ ८४ ॥ मान्यौगः पणवकमाह ब्रः ॥ ८५ ॥ रुक्मवतीयं भाति भमसौः ॥ ८६ ॥ मत्ता माद्भः सगुरुपरश्चेत् ॥ ८७ ॥ त्यौ स्गाविति चेत्सा मदिराक्षी ॥ ८८ ॥ भत्रितयाद्गिति चित्रगतिः ॥ ८९ ॥ रेफसद्वयगैर्मणिरङ्गः ॥ ९० ॥ भौ मगुरू यदि बन्धूकाख्यम् ॥९१॥ स्यान्मयूरसारिणी

रजौ गौं ॥ ९२ ॥ मौक्तिकं रयौ चेज्जगोत्तरौ ॥ ९३॥ नजनगाधृत्स्वरित-गतिः ॥ ९४ ॥ हंसक्रीडा भभभा गयुताः ॥ ९५ ॥ त्रिष्टुप्छन्दसि मात्सजौ मणि गौं ॥ ९६ ॥ दोधकमत्र तु भत्रितयाद्गौ ॥ ९७ ॥ स्वागता यदि रनौ भगुरू गः ॥ ९८ ॥ रान्नरौ लगयुतौ रथोद्धता ॥ ९९ ॥ विश्रामोऽब्धौ शालिनी मेन तौ गौ ॥ १०० ॥ मात् भ्नौ ल्गौ चेत् भ्रमर-विलसितम् ॥ १०१ ॥ श्रेणिरभ्यभाणि राज्जरौ लगौ ॥ १०२ ॥ ताज्जौ गुरुणैवमुपस्थिता स्यात् ॥ १०३ ॥ ननरलगयुतैव भद्रिका ॥ १०४ ॥ सभरल्गैरपरान्तिका भवेत् ॥ १०५ ॥ द्विनगणसगयुगभाग् वृन्ता ॥१०६॥ अच्युतं रससल्गुरुणोच्यते॥१०७॥ तौ तश्च गौ चेल्लयग्राहिसंज्ञा ॥१०८॥ सान्द्रपदं भात्तनगगिषौ खम् ॥ १०९ ॥ स्यान्मोटकमत्र तजौ जलगाः ॥ ११० ॥ वातोर्मी माङ्गतगा गेन युक्ता ॥१११ ॥ वातोर्मी माङ्भगाश्च सुरूपा ॥ ११२ ॥ म्सौ ज्गौ गो रसखं सदैकरूपम् ॥ ११३ ॥ नयभग-गाश्चेच्छ्रीः पतिता च ॥ ११४ ॥ तौ जेन गौ चेदियमिन्द्रवज्रा ॥११५॥ उपेन्द्रवज्रा जतजा गुरू चेत् ॥ ११६ ॥

> उपेन्द्रवज्रास्फुरदिन्द्रवज्रा-
> पादौ विमिश्रौ यदि तौ भवेताम् ।
> नानाविकल्पैरुपजातिरेषा
> प्रकल्पितार्यैः क्वचिदिन्द्रमाला ॥११७॥

जगत्यां चतुर्यं भुजङ्गप्रयातम् ॥११८॥ कामावतारस्तकारैश्चतुर्भिस्तु ॥११९॥ रैश्चतुर्भिर्मता वाग्विदैः स्रग्विणी ॥ १२० ॥ इह तोटकमाह चतुःसचितम् ॥ १२१ ॥ चतुर्जगणं यदि मौक्तिकदाम ॥१२२॥ द्रुतविलम्बितमत्र नभौ भरौ ॥ १२३ ॥ मौ यौ पञ्चाश्वैर्विश्रमो वैश्वदेवी ॥ १२४ ॥ प्रमिताक्षरा सजगणौ यदि सौ ॥ १२५ ॥ माङ्श्च स्मौ जलधरमालाब्धौ (r. ब्धौ) खम् ॥१२६॥ ज्सतौ जसजसा जलोद्धतगतिः ॥१२७॥ स्फुट-मुरगयतिर्नौम्यौ पुटं स्यात् ॥ १२८ ॥ अथ नवमालिनी यदि नजौ भ्यौ ॥ १२९ ॥ प्रमुदितवदनाथ नौ रौ च चेत् ॥ १३० ॥ चन्द्रवर्त्म भवतीह

रनभसैः ॥ १३१ ॥ नभजयश्चै मुखरं कलहंसा ॥ १३२ ॥ नभभरै-र्भवति मत्तकोकिलम् ॥ १३३ ॥ ऋतुविरतिर्न्यौ गजललिता न्यौ ॥१३४॥ ललितपदा भरतस्य नजौ ज्यौ ॥ १३५ ॥ मादभ्रौ यः खं पुरधाम्नि पुण्डरीकम् ॥ १३६ ॥ शिविका सयौ स्यौ च महेन्द्रस्रजा ॥ १३७ ॥ त्यौ त्यौ मणिमाला क्वाप्यब्जविचित्रा ॥ १३८ ॥ वरतनुरत्र नजौ जरौ तु चेत् ॥ १३९ ॥ भात्तनसैः स्यात् रतिरिषुविरतिः ॥ १४० ॥ भवति ननरयैस्तु कामदत्ता ॥ १४१ ॥ गतियतिर्द्रुतपदा न्भजयैः स्यात् ॥ १४२ ॥ वदन्ति वंशस्थमिदं जतौ जरौ ॥ १४३ ॥ स्यादिन्द्रवंशा यदि तौ जरौ गणौ ॥ १४४ ॥

यत्रेन्द्रवंशाचरणो युनक्ति चे—
द्वंशस्थपादेन सहेत्यनेकधा ।
करम्बजातिर्भवतीह सा क्वचित्
कुलालचक्रं क्व च वंशमालिका ॥ १४५ ॥

ज्ञाता श्रुतिर्गतियतिभाक्तभौ स्यौ ॥ १४६ ॥ कृतोद्यतिः स्मृतिरिति जाद्रसौ यः ॥ १४७ ॥

श्रुत्यंह्रिणा स्मृतिचरणो यथास्वं
नियुक्ति चेदिह बहुभिर्विकल्पैः ।
यदा समार्द्धसमनियामतोऽन्यत्
सिंहप्लुतं मुनिदमसागरोक्तम् ॥ १४८ ॥

अतिजगत्यां नतौ तौ गुरुः कौमुदी ॥१४९॥ म्नौ ज्रौ गः पुरविरतिः प्रहर्षिणी स्यात् ॥ १५० ॥ विश्रामौब्धौ (r. मोब्धौ) मत्तमयूरं मतयाः स्गौ १५१ ॥ कुटजं वदन्ति कवयः सजसस्गैः ॥ १५२ ॥ यमौ रौ गः षष्ठे विश्रमश्चन्द्रिका स्यात् ॥ १५३ ॥ लक्ष्मीर्भवेत्तभसजैर्गैर्यतिः श्रुतौ ॥ १५४ ॥ नजनसगैरपि मदललिता स्यात् ॥ १५५ ॥ नजसजगैर्भवति मञ्जुभाषिणी ॥ १५६ ॥ भ्रमरी सजौ च ससगाश्च यदि स्युः ॥१५७॥ मणिकुण्डलं स्यौ सजगान्वितौ यदा ॥ १५८ ॥ सजसा जगाविति जया-थ नन्दिनी ॥ १५९ ॥ नजजरगैरचलं क्वचित्सुवक्त्रा ॥ १६० ॥ गन्त-

भकारचतुष्कयुताङ्गरुचिः ॥ १६१ ॥ नलिनमनलयति नौ सजौ गुरुः ॥ १६२ ॥ जभौ सजौ गिति रुचिराब्धिविश्रमा ॥ १६३ ॥ वेदोद्यति-स्तभसजगै रुचिस्तदा ॥ १६४ ॥

पादौ यदा रुचिरुचिरोद्भवाविमौ
विमिश्रितौ यदि भवतः कवीच्छया ।
समाक्षरं गणविपरीतलक्षणं
छन्दश्रितौ भवति तदा प्रकीर्णकम् ॥ १६५ ॥

शक्वर्यां म्रौ च तौ गौ चन्द्रशालाद्रियत्याम् ॥१६६॥ हंसश्यामा मभनयगग-भाक् खं चाब्धौ ॥ १६७ ॥ भाद्भवति हि लक्ष्मीः सात् ततौ गौ च रुद्रा ॥ १६८ ॥ भाद्धुर्वसन्ततिलकां तभजा जगौ गः ॥ १६९ ॥ यदि मुनिविरति-र्नौ च तौ गौ वसन्तः ॥ १७० ॥ प्रथिता सजस्यलगभाक् तराक्षैर्यतिः ॥१७१॥ यतियतिरपराजिता ननरस्लगाः ॥१७२॥ प्रहरणकलिका ननभन-लघुगैः ॥ १७३ ॥ सजनलैगाः शरविरतिः सुदर्शना ॥ १७४ ॥ मणिक-टिकं स्फुटं नजभजैः सलगैः ॥ १७५ ॥ मात् त्नौ स्गौ गश्चेद्व्रतविरति-रसंबाधा ॥ १७६ ॥ रविमितलघुगुरुयुगमुपचित्रम् ॥ १७७ ॥ दुर्दुरकं भगणद्वयेन रसौ लगौ ॥ १७८ ॥ भाज्जसनगा यदि गुरुर्वनमयूरः ॥ १७९ ॥ शोभते वनलता रनभा भगुरू गः ॥ १८० ॥ सभसा ज्गौ गिति गतिविश्रमा सुनन्दा ॥ १८१ ॥ अतिशक्वरीज ऋषभः सजसाः सयौ चेत् ॥ १८२ ॥ लसति वसुविरामा मालिनी नौ मयौ यः ॥ १८३ ॥ निधनगुरुमनुलघुरिति शशिकला ॥ १८४ ॥ स्रगिति भवति रसविरति-रथ च सा ॥ १८५ ॥ + णियतियुगपि च मणिगुणनिकरा ॥ १८६ ॥ इयमपि गतिगतियतिरिह रुचिरा ॥ १८७ ॥ मौ मौ मोऽब्धौ त्रि-र्विश्रामं ज्योतिः केषां मित्रं स्यात् ॥ १८८ ॥ नजभजरा भवन्ति यदि वसुकेसरम् ॥ १८९ ॥ राज्जरौ जरौ यदा महोत्सवो गतागतम् ॥ १९० ॥ सुन्दरं त्विह रनौ भभरा मणिभूषणम् ॥ १९१ ॥ नजजभैररविन्दकं कलभाषिणी ॥ १९२ ॥ मण्डूकीयं तुर्येऽवद्यं विश्रमो मौ मयौ यः

॥ १९३ ॥ मयूरललितं भवति जात् सनभयाश्चेत् ॥ १९४ ॥ चन्द्रलेखा-छन्दुकृच्छेदा रसौ तौ मयुक्तौ चेत् ॥ १९५ ॥ खं पुरे रनभमा रयुता रमणीयकम् ॥ १९६ ॥ सजना नयौ विषमयतिरबनिरेला ॥ १९७ ॥ अष्टिभवा भचतुष्कसगैः स्मरशरमाला ॥ १९८ ॥ पद्ममुखीह भपञ्चकगैः सुजनावसथम् ॥ १९९ ॥ गतियतिर्नभजजाञ्जिति मङ्गलमङ्गना ॥ २०० ॥ कमलदलाभिषुविरति नौ नजसगा गश्चेत् ॥ २०१ ॥ भ्रत्रिनगै-र्मुनेः खमृषभगजविलसितम् ॥२०२॥ जरौ जरौ जगाविदं वदन्ति पञ्चचा-मरम् ॥२०३॥ नजभजरा भवन्ति गुरुणेति वाणिनी स्यात् ॥२०४॥ जयानन्दं यान्नौ सुललितमृतुछित्सरौ गः ॥ २०५ ॥ नयनयसाद्गः खरख(r. क)-रखं चेद् भुवि कान्तम् ॥ २०६ ॥ नजरभभा गुरुश्च चिन्तामणिरिन्दुमुखी ॥ २०७ ॥ भाति हि भामिनी भरनभद्वयगैर्भुवने ॥२०८॥ ऋतुच्छेदोऽत्यष्टौ यमनसभलाद्गः शिखरिणी ॥२०९॥ मन्दाक्रान्ता गतिऋतुयतिर्मोद्भनौ तौ च गौ चेत् ॥ २१० ॥ नसमरसलाद्गु(r.द्गु)च्छेन्दोऽङ्गे गतौ च हरि-ण्यसौ ॥ २११ ॥ जसौ जसयला गुरुर्वसुयतिश्च पृथ्वी मता ॥ २१२ ॥ दिग्यति वंशपत्रपतितं भरनभनलगैः ॥ २१३ ॥ नजभजजाल्गि वर्कित-मिदं भुवि नर्कुटकम् ॥ २१४ ॥ स्वररसविश्रमो यदि तदेव हि कोकि-लकम् ॥ २१५ ॥ शरविरतिरिषुनगणगगिति वसुधारा ॥ २१६ ॥ दशखं त्वतिशायिनी ससौ जभजगा गुरुश्चेत् ॥ २१७ ॥ धृतौ मुक्तामाला यमनसतसैर्द्वैर्न्यर्तुविरतिः ॥ २१८ ॥ मात्नौ यौ यश्चेत्कुसुमितलतावे-ल्लिता खं शराङ्कैः ॥ २१९ ॥ मालिकोत्तरमालिका रसजा ज्भरैश्च गतागता ॥ २२० ॥ सतनौर्यो (r. ना यौ) यः शररसयतिर्भाति मन्दारमाला ॥ २२१ ॥ धूर्जटिविश्रमणं मणिमाला भाद्भौ मभसयुतौ ॥ २२२ ॥ गतिनिधियतिरिति नौ यदि सौ त्यौ पङ्कजमुक्ता ॥ २२३ ॥ भवति च बरवा द्वयं नौ च रौ रौ च केषां निशा ॥ २२४ ॥ सुरभिः पुरशरयोर्य-तिरिवि साभजनभसाः ॥ २२५ ॥ अतिधृतौ नमराः सजौ जगुरू ववा तरलं स्मृतम् ॥ २२६ ॥ यमौ न्सौ रौग् रम्भा रसरसयतिर्मेघवित्फूर्जिता

वा ॥२२७॥ भानूयद्यति मात्सजौ सततगाः शार्दूलविक्रीडितम् ॥ २२८ ॥ दिग्विरामि रसौ सतजा ज्गौ शार्ङ्गि भवेच्च गतागतम् ॥ २२९ ॥ जसौ त्रिरसु(r. नु)कौ गुरुश्च रसयोर्यतिश्च रतिलीला ॥ २३० ॥ कृत्यां भूभृत्कुभृत्त्वं मरभनयभला गश्चेत्सुवदना ॥ २३१ ॥ वृत्तनाम वृत्तमत्र वर्तते यदा त्रिधा रजौ गलौ च ॥ २३२ ॥ सभरान्मौ यलगाश्चयोदशयतिर्मत्तेभविक्रीडितम् ॥ २३३ ॥ कामलता भरौ नभभरा ल्गिति चोत्पलमालिका क्वचित् ॥ २३४ ॥ भत्रितयाद्धरसाल्लगुरू यदि भासते भुवि भासुरम् ॥ २३५ ॥ नभभमाः ससला गिति मुद्रा रुद्रयतिः क्वचिदुज्ज्वलम् ॥ २३६ ॥ रात्सपञ्चकमन्तलगं पुटभेदम(क ?)-मत्र गतागतम् ॥ २३७ ॥ म्रौ भ्नौ यौ यः प्रकृत्यां स्वरगिरिविरतिः स्रग्धरा नाम वृत्तम् ॥ २३८ ॥ नजभजजञ्जि चित्रलतिका सति चम्पकमालिका क्वचित् ॥ २३९ ॥ नगणजकारचतुष्कभरैरपि रञ्जिता वनमञ्जरी ॥ २४० ॥ ललितगतिरिनवनधिखे तात्रिनाख्यातायदामान्द्रीता ? ॥ २४१ ॥ नं गणं त्रिरिह रं गणं त्विति तरङ्गपूर्वपदमालिका ॥२४२॥ पद्मसद्म रसान्नजनभरं हरविरतिश्च गतागतम् ॥ २४३ ॥ आकृतिनाम्नि मद्रकमिदं हरिद्यति भरौ नरौ नरनगाः ॥ २४४ ॥ सततान्नः सश्च रौ गः फणितुरगयतिः स्यान्महास्रग्धराख्या ॥ २४५ ॥ सप्तभिरन्तगभैर्भवतीति गतागतमत्र लताकुसुमम् ॥ २४६ ॥ नगणतो भजगणौ त्रिधा गुरुपरौ यदा मदनसायकः ॥ २४७ ॥ अथ विकृतौ नजौ भजभजा भलौग्हरयतिस्तदाश्वललितम् ॥ २४८ ॥ नगणजषट्कयलाद्रिति हंसगतिश्च महातरुणीत(द ?)यितम् ॥ २४९ ॥ मत्ताक्रीडं मौ त्नौ नौ न्लौ गुरुरपि च विषधरशरविरमणम् ॥ २५० ॥ चित्रकं क्व च रनौ त्रिधा रलगमत्र भात्युरुतरङ्गमालिका ॥ २५१ ॥ शङ्खाख्यमिदं भगवद्रदिवं तगणाज्जगणाः षडतो लगुरू ॥ २५२ ॥ संकृतिनाम्नि भ्रतनगविरतिर्भात्तनसं भभनयमपि तन्वी ॥ २५३ ॥ इह ललितलता स्वरगिरिविरतिर्नभनजननयशोभा ॥ २५४ ॥ हंसपदं स्याद्वाश्च गणाः स्युर्भ्रतशरवसुयति मसभननान्यौ ॥ २५५ ॥ अथ महामदनसायको नगणतस्त्रिधा भजगणौ

रनैवनौ ॥ २५६ ॥ अमिकृतिभवमिति गतिन-स-पुरभग् हंसलयं भुजगाद्रियतिः ॥ २५७ ॥ क्रौञ्चपदं भास्किच मसौ भ्नौ त्रिनगणगुरु शरशरवसुयतयः ॥ २५८ ॥ मत्तेभाख्यं मौ मौ मात् त्यौ मश्चान्ते गः स्यादिश्रामोऽब्धौ चतुरस्मिन्बाणेऽप्येवम् ॥ २५९ ॥ उत्कृत्यां मौ त्नौ नौ रः स्लौ गुरुरपि फणिहरविरतिर्भुजङ्गविजृम्भितम् ॥ २६० ॥ मामाः षड्भ (r. ट्स) गयुगमपि निधिरसरसाविरमणमिदमपवाहाख्यम् ॥२६१॥ वसुवसुयतिरथ गुरुयुगपरवसुनयुगिति वनलतिका स्यात् ॥ २६२ ॥ नयनयनान्नत्रयमपि गौ चेद्रसरसवसुयतिरिति मकरन्दम् ॥ २६३ ॥ मनुविरतिर्नजौ भजगणत्रितयं भजला गुरुर्यदि सुधाकलशः ॥२६४॥ मालावृत्तं गतिवसुवसुयति मभरसमितनस-विकसितकुसुमम् ॥२६५॥ मालावृत्तं मालावृत्तेष्वथ वसुधूर्जटियत्तन्वी(r. त्तं धी ?)तं ख्यातं मौ तनभा मौ भ्मौ ॥२६६॥ गतिनगणभनभनसकलितं त्रिपदललितं तदनुयतिमिलितम् ॥ २६७ ॥ नसभनतजाङ्गी तसयभृदुपाङ्गी लसतीति तदङ्गविरतिस्त्रिभङ्गी ॥ २६८ ॥ ननभनजननैर्नलगाभिह चेन्मुनिगिरिवसुयतिरिति मणिकिरणः ॥ २६९ ॥ त्रिवसुगयतिरथ नवनगणलगिह सुविहितगतिरिति भवति कला ॥ २७० ॥ वृत्तललितं ललितनृत्तमपि सुन्दरलयात्तवरनं भजसना भजसना भ्यौ ॥ २७१ ॥ नगणदशकमपि सगुरु सयति यदि सुगमरति लसति जगति लहरिका ॥ २७२ ॥ त्रिभनननुपरि च विदुर्भयुतयगणमवनेर्भवति ललितपदगर्भमिह चक्रे ॥ २७३ ॥ चित्रलयमतिनिबिडमत्र भुवि भननगणवत्त्रिरिदमिह बुध परत्र भनगुरुभाक् ॥ २७४ ॥ तरणिमितनगणलघुगुरव इह दिशि ककुभि हरिति खलु विरतिरिति भुवि ललितलविका ॥ २७५ ॥

प्रायोऽक्षरसमान्याहुः क्वचिन्मात्रासमानि च ।

मालावृत्तानि पादेषु नात्याशब्द्य(?)क्षरात्किल ॥ २७६ ॥

इति जयकीर्तिकृतौ छन्दोऽनुशासने समवृत्ताधिकारो द्वितीयः ।

तृतीयोऽधिकारः ।

अथातोऽर्धसमं वक्ष्ये यत्प्रयोगानुसारि तत् ।
तदक्षरसमं हीनमधिकं चेति दृश्यते ॥ १ ॥
उपचित्रकमर्धसमेष्विदं
सौ सलगा यदि भौ भगुरू गः ॥ २ ॥
यत्र रुक्भार(?)गणत्रितयाद्गौ
नजजयमप्यनु सा द्रुतमध्या ॥ ३ ॥
सह सत्रितयेन गुरुश्चेत्
भत्रितयेन च वेगवती गौ ॥ ४ ॥
ताज्भौ गुरुणाथ मात्सजौ गौ
भद्रैर्भद्रविराट् स्वभाणि वृत्तम् ॥ ५ ॥
सजसा भवन्ति गुरुणाथ
केतुमती भरौ यदि नगौ गः ॥ ६ ॥
आख्यानकी तौ जगणेन गौ चेत्
तथा जतौ जेन गुरुद्वयान्तौ ॥ ७ ॥
जतौ जगौ गस्ततजा गुरू चे—
दाख्यानकी स्याद्विपरीतपूर्वा ॥ ८ ॥
राज्जगौ जरौ लगौ
यदा तदा प्रवर्तकम् ॥ ९ ॥
लगपार–सकारगणैस्त्रिभि—
र्नभभरैस्तु गणैर्हरिणीप्लुता ॥ १० ॥
यदि ननरलगा नजौ जरौ
तदपरवक्त्रमकारि सूरिभिः ॥ ११ ॥
नगणयुगरयेण पुष्पिताग्रा
नजजरगैर्विदिता जिनव्रतांशैः ॥ १२ ॥
साभिधा यवध्वनेर्मतो (r. तुप्) स्त्रियां हि
रजौ रजौ पुनर्जरौ जरौ च गश्चेत् ॥ १३ ॥

स्यादिह मानिनी दिशि यतिर्भरनभनलगाः ॥
नजभजना गणाः ससहिता यदि हरविरतिः ॥ १४ ॥
ससजा गुरुसंयुतास्ततः
सभरा ल्गौ च विबोधिता भवेत् ॥ १५ ॥
ससजा गुरुयुग्मसंयुताः स्युः
सभरा यश्च सुबोधिता प्रिया वा ॥ १६ ॥
भाति नरां भगणाभ्यां तल्गै—
र्नजनसगैरपि विलसितलीला ॥ १७ ॥
पुरमितनगणयमथ मौ गः ।
क्षान्तिः प्रोक्ता चूडेयम् ॥ १८ ॥
विषधरविरमणमुदधिनगणसा
यतियतिरुरुगी ननभनलघुगा ॥ १९ ॥
आमलकी भचतुष्टयमत्र तु ।
भत्रयगा गिति सैव च चुक्षा ॥ २० ॥
जतौ जरौ शंखनिधिस्तु तौ जरौ ।
श्रीपाल्यकीर्तीशमते सुनन्दिनी ॥ २१ ॥
तौ ज्मौ तथा पद्मनिधिर्जतौ जरौ ।
स्वयम्भुदेवेशमते तु नन्दिनी ॥ २२ ॥
भामा भवेद्भुवि गतिभाग्विरामा ।
तभौ यदा सयमथ जाङ्कसौ यः ॥ २३ ॥
तथोदिता यतिरिह जाङ्कसौ यः ।
ताङ्कः सयावपि विपरीतभामा ॥ २४ ॥
चूडामणिस्तद्वयजा गुरू चेत् ।
प्रज्ञामहोदयमता तभजा जगौ गः ॥ २५ ॥
सलिलनिधिगुणितधरणिधरलघुरधिगतगुरुरयमसमचरणः ।
तदितर इति गुरुपरशिखिविहितलघुदशतययुतिरघटि स खलुशिखा ॥२६॥
व्यतिहृतपरिगतयमयमभवनिखिलचरणसमुपजनितपदरचना ।

इयमिति भवति हि भुवि परिकुटिलचलननिगदनसदृशसमभिधा* ॥२७॥
इति जयकीर्तिकृतौ छन्दोऽनुशासने अर्धसमवृत्ताधिकारस्तृतीयः ॥

चतुर्थोऽधिकारः ।

अथातो विषमं वक्ष्ये यत्प्रयोगानुसारि तत् ।
तत् त्रिधा लक्षणे दृष्टं समानोनाधिकाक्षरम् ॥ १ ॥
चतुरक्षरतो यश्चेन्नो चेदाद्यक्षरात्स्नौ तु ।
वक्त्रवद्विषमाणं तद्वक्त्रमानुष्टुभं भाति ॥ २ ॥
ओजयोर्यगणेनाब्धेर्युग्मयोर्जगणेन च ।
श्लोकेषु कथ्यते पथ्या श्रोत्रपथ्या यतस्ततः ॥ ३ ॥
जगणोऽब्धेर्यदौजयोर्यगणो युग्मयोश्चेत्थम् ।
विपरीतोक्तलक्षणाद्विपरीतादि पथ्या स्यात् ॥ ४ ॥
अब्धेरयुग्मचरणे नश्चेद्युग्मे यकारश्चेत् ।
यस्यां सापि तु चपलानुष्टुब्मध्ये भवत्येवम् ॥ ५ ॥
वक्त्रवद्विषमः पादः समे लघुश्चेत्सप्तमे ।
अनुष्टुब्विपुलास्वेवं पिङ्गलाचार्यविपुला ॥ ६ ॥
श्रुतिकान्तं लघौ सति प्रतिपादं तु सप्तमे ।
सुतरामत्र विबुधैर्मता सैतवविपुला ॥ ७ ॥
भवेद्यदाब्धेः परतो भकारः सर्वत्र तदा ।
भकारसंज्ञां विपुलां भणन्त्यनुष्टुब्निपुणाः ॥ ८ ॥
परतोऽब्धेर्यत्र रेफे परितः पादेषु दृष्टे ।
विपुलानां रेफसंज्ञा विपुला भवेत्तदानीम् ॥ ९ ॥
नकारोऽब्धेर्यदि भवेद्विषमांह्रौ युजि तथा ।
स्फुटं नकारविपुला विपुलाज्ञैरिति मता ॥ १० ॥
सर्वतश्चतुर्भ्यः परो यद्यसौ तकारो भवेत् ।
विपुलासु जातिष्वतस्तकारसंज्ञां तां विदुः ॥ ११ ॥
यकारोऽब्धेरयुक्पादे यदि कश्चिद्युजि गणः ।
कश्चिदोजे जो युज्येवं संकीर्णविपुला द्विधा ॥ १२ ॥

---

* The ms. adds the words खंजा नाम hereafter.

यौ प्रथमे हि वक्त्रादौ नाद्यात्स्नाविति वारितौ ।
तौ क्वचिदपि दृश्येते लक्ष्येषु श्रुतिसुन्दरम् ॥ १३ ॥
द्वात्रिंशदक्षरो ग्रन्थः सोनुष्टुप् श्लोक इत्यपि ।
श्लोकस्तु गद्यते पद्यं पुण्यश्लोकैर्मनीषिभिः ॥ १४ ॥
प्रोक्तमनुष्टुभि वक्त्रं पथ्या विपरीतपथ्यया चपला ।
पिङ्गलसैतवविपुला भरनतविपुलाश्च संकीर्णाः ॥ १५ ॥
प्रथमोऽयमष्टवर्णो ।
द्वादशवर्णो द्वितीयकः पादः स्यात् ।
षोडशवर्णोऽथ तृतीयो विंशत्यक्षरस्तुर्यो ।
यस्य तदेतत्पदचतुरूर्ध्वं नानागति त्रयोदशधा ॥ १६ ॥
तदनु सह तथा या ।
भवति यतिभृदियमिति पीडा ।
द्विगुरुपरकलघुमयचरणचतुष्का ।
क्वचिदघटि पदरुचिरिह लिपिमितिरजनि तद्वेत् ॥ १७ ॥
प्रत्यादिरियमपि च ।
पीडा प्रतिचरणमुभयगुरु ॥
पूर्वत्र भवति समुपरिगलघुविसृति ।
सा क्वाप्यनुपदरुचिरुचितलिपिपरिमितिरिति च ॥ १८ ॥
पादाक्षरमितिरस्याः ।
प्राग्वद् भवति समुपपदपीडा ॥
आद्यन्तगुरुयुगसकललघुचरणासौ ।
क्वाप्येवमतिपदरुचिरतिरुचिरमृदुपदवृत्तिः ॥ १९ ॥
प्रथमशकल इह विपरीतौ ।
यदि पदरुचिपादौ ॥
चरणयुगमपरमपि भवति यथास्वं ।
प्रतिचरणकलितयतिरति पदरुचिकलिकासौ ॥ २० ॥
भूयोऽपि सदनुपदरुचिकलि-
काल्येयमिति भवति ॥

पौरस्त्यचरणयुगमिह खलु विचलति ।
पाश्चात्यचरणयुगमचलितमतिशयितमघटि ॥ २१ ॥
आदौ व्यतिहृतमतिपदरुच्याः ।
पादौ यदि विपरीतौ ॥
पादद्वितयमितरदिह भवति यथास्वं ।
स्यादित्यपि सुरुचिरयतिरतिपदरुचिकलिकाख्या ॥ २२ ॥
अपसरति पदरुचिविलम्बं ।
क्रमयुगलमथ न खलु चलति चतुर्थम् ॥
प्रथम इह तृतीयो ।
यदि भवति विकृतगतिरिति पदरुचिलवली स्यात् ॥ २३ ॥
स्यादेवमनुपदरुचिलवलि-
काख्या प्रतिचरणनियतगुरुलघुरपि ॥
पादन्यसनमिह तु ।
तद्वत्समनुभवति जगति सुनिचितपदविसृति ॥ २४ ॥
मध्यांह्रियुगलमतिपदरुच्याः ।
पूर्वं भवति; चरमचरण इह यथास्वम् ॥
आद्यंह्रिरथ तृतीयः ।
पद्येष्वियमपि च सयतिरतिपदरुचिलवली स्यात् ॥ २५ ॥
यदि भवति गदितपदरुच्याः ।
प्रथमतरचरण इह स खलु चतुर्थः ॥
त्रिचरणमुपसरति च पदरुचियुगमृतधारा ।
जितसदमृतधारा ॥ २६ ॥
आद्यंह्रिरनुपदरुचिवदिह ।
तुर्यो यदि भवति नियतगुरुलघुतति ॥
अन्यत्र चरणमघटि तदनुपदरुचियुगमृत- ।
धारेयमिति भवति ॥ २७ ॥
पादः प्रथम इह यदि तुरीयः ।
पादत्रयमनुसरति तदतिपदरुच्याः ॥

पादैरसमगतिभिरतिपदरुचियुगममृतधारा ।
पादद्वकविभिरुक्ता ॥ २८ ॥
पदचतुरूर्ध्वो पीडा प्रत्यापीडा च भवति संपीडा ॥
कलिका लवली चामृतधारा तिस्रः पृथक् पृथक् त्रिधास्ताः ॥ २९ ॥
ओजपादेऽनुष्टुभो येय (९) मा जगत्या विवर्धिता ॥ ८ ॥
सा विजातिगाथा जम्बुककथा (११) पश्यत्यादिवदुच्यते (८) ॥ ३० ॥
अनुष्टुब् विषमाख्यानां षड्भिः पादैर्यथोदितैः ।
जातिगाथा भवत्येवमेनां तु च्छान्दसीं विदुः ॥
' दश धर्मं न जानन्ती ' त्यादेरादिप्रयोगतः ॥ ३१ ॥
यथा— दश धर्मं न जानन्ति धृतराष्ट्र निबोध तान् ।
मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ।
त्वरमाणश्च भीरुश्च लुब्धः कामी त्वमी दश ॥३२॥ इयं षट्पदगाथा ।
सजसा लघुः प्रथमकेऽथ ।
नसजगुरुका द्वितीयके ॥
भ्नौ च जलगिति तृतीयतरे ।
यदि तुर्यके सजससजागिद्दोद्गता ॥ ३३ ॥
प्रथमद्वितीयकतुरीय— ।
चरणनियमोऽत्र पूर्ववत् ॥
स्यात्तृतीयचरणे रनभं ।
गुरुणेति सौरभकमुद्गतोद्गतम् ॥ ३४ ॥
नगणद्वयं सयुगलं च ।
यदि पदि तृतीयके तथा ॥
विषममपि ललितमित्यभवत् ।
मृदुपादलालिततयोद्गतादिके ॥ ३५ ॥
अथ (+तत् ?)तृतीयचरणे तु ।
नभजलघुगं प्रवर्तते ॥
जगति कीर्तिरनुवर्तिगतिः ।
कविचारुकीर्तिमुनिना प्रकीर्तिता ॥ ३६ ॥

म्सौ ज्भौ गौ प्रथमे; द्वितीयके सनजा गौं ।
द्विनसं तदनु तृतीयके, चतुर्थे ॥
त्रिगुणितनगणजयाः ।
प्रचुपितमिदमुदितमुपस्थितपूर्वम् ॥ ३७ ॥
यस्यैतस्य तृतीयपादके द्विनसं द्विः ।
नितरां तदिह विविद्धि वर्धमानम् ॥
प्रचुपितनियमसमानमितरदपि सकलं ।
समुदितमृदुपदपदवीकमितीदम् ॥ ३८ ॥
यद्येवं तजरास्तृतीयके पदि तस्य ।
प्रथमे यतिरपि चार्षभं पुरस्तात् ॥
स्याच्छुद्धविराडिदं यदि ।
प्रचुपितनियमनियमितापरलक्ष्मा ॥ ३९ ॥
जातिविजाती गाथा तथोद्गता सौरभकसुललिते कीर्तिः ।
भवतीत्युपस्थितप्रचुपितकमतो वर्धमानमपि शुद्धविराद् ॥ ४० ॥
इति जयकीर्तिकृतौ छन्दोऽनुशासने विषमवृत्ताधिकारश्चतुर्थः ॥

पञ्चमोऽधिकारः ।

द्विगुरुस्तथान्तगुरुरादिगुरुश्च चतुर्लघुश्च मध्यगुरुः ।
इति पञ्चार्यादिगणाः प्रस्तारेऽत्र नु गुरोरधो लघुकौ द्वौ ॥ १ ॥
सप्त चतुर्मात्रगणा गुरुणार्यार्द्धद्वये न चायुजि जः ।
जः षष्ठो न्लगणो वा लघुरपरे त्रिगणविषमांह्रिः ॥ २ ॥
पादौ प्रथमतृतीयौ द्वादशमात्रौ द्वितीय आर्यायाः ।
अष्टादशमात्रोऽसौ चतुर्थकः पञ्चदशमात्रः ॥ ३ ॥
आर्यौजपादनिधने यस्यां पथ्योभयत्र, पूर्वार्धे ।
यस्यां तु पूर्वपथ्या पराधयस्यां च परपथ्या ॥ ४ ॥
विपुला स्यादार्याविषमपादयुगनिधनयत्यतिक्रमणात् ।
न्लाणं प्रत्यार्यादिविरामनियामं प्रवक्ष्यामः ॥ ५ ॥
न्ले पञ्चमे चतुर्थगणान्ते पदमिह हि वसति तदनु तथा ।

षष्ठे षष्ठगणादौ सप्तमके न्ले च षष्ठान्ते ॥ ६ ॥
गुरुमध्यगौ भवन्तौ गणौ जकारौ द्वितीयकचतुर्थौ ।
स्यातां तथा यदार्यादलद्वये सर्वचपला स्यात् ॥ ७ ॥
जगणौ द्वितीयतुर्यौ तथोदितावुभयपार्श्वगुरुयुक्तौ ।
पूर्वार्धे यस्याः सा मुखचपला शेषमार्यावत् ॥ ८ ॥
पूर्वार्धमिहार्यावत् पश्चार्धे पूर्वपरगुरुश्लिष्टौ ।
इष्टौ द्वितीयतुर्यौ यदा तु जौ जघनचपला स्यात् ॥ ९ ॥
गुर्वन्तसप्तगणभागार्यापूर्वार्धलक्षणं सकलम् ।
यद्युभयार्धे यस्याः प्रवर्तते सा नु गीतिरिति गीता ॥ १० ॥
योऽयमिह षष्ठलघुभागार्यापरदलगतो नियमः ।
सकलः शकलयुगे चेद्यस्यास्तामाहुरुपगीतिम् ॥ ११ ॥
षष्ठलघुभाग्यदार्यापरदलनियमोऽत्र पूर्वार्धे ।
गुरुपरसप्तगणार्याप्राग्वन्नियमः परे यदोद्गीतिः ॥ १२ ॥
सर्वचतुर्मात्रगणो गुर्वन्ताष्टमगणोभयार्धः स्कन्धः ।
पूर्वत्रिगणौजांहिः सर्वत्रायुजि न जो; न्लजौ वा षष्ठः ॥ १३ ॥
सर्वलघुः स्कन्धोऽसौ गुर्वन्ताष्टमगणत्वतो नास्ति भृशम् ।
सर्वगुरुर्नास्ति तथा पूर्वमतान्नियतषष्ठजन्लगणत्वात् ॥ १४ ॥
त्रिंशद्गाश्चत्वारो लास्ते स्कन्धस्य वर्णका न्यूनाश्चेत् ।
वर्धन्ते चेद्गाभ्यां लाः षष्टिस्तत्कलाश्चतुःषष्टिः स्युः ॥ १५ ॥
स्फुरति स तु नियतगुरुपरपुरहतलघुदशकघटितसयशकलयुगः ।
सुरुचिरयतियुतमृदुपदविरचितगतिचरणविसृतिरिति बुधगदितः १६
आर्यागीतेरर्धेनार्यार्धं किंचनपि कथमपि सह चेत् ।
आर्याविदैः प्रणीतेत्यार्यैः संकीर्णजातिरियम् ॥ १७ ॥
स्कन्धस्य षष्ठधामन्यभितश्चैको लू यदोपस्कन्धः ।
उत्स्कन्धः पौरस्त्ये पाश्चात्यार्धे तदावस्कन्धः ॥ १८ ॥
गीतिस्तु रिपुच्छन्दः सप्तमरगणे तृतीयके ललिता ।
तदुभयरि भद्रिका स्यात्षष्ठं तु विमुच्य रबहुला विचित्रा ॥ १९ ॥
सुगतचतुर्गतिमात्रगणांहि प्रगणितभलान्तगणनिधनदलम् ।

नगणविकल्पितजगणतुंपदं जगणेन नौअधाम ध्रुवकम् ॥ २० ॥
तदीयविषमास्पदेऽपि यदा जगणोऽथ षष्ठोऽन्यथा तथा वा ।
तदा तथा स्कन्धकेऽपिदू+रिपुच्छन्दआदि विरूढसंज्ञाम् ॥ २१ ॥
गाथार्यादिदलादार्यांशयुगे पूर्ववत्पराधें तद्गणयुगवृध्या ।
उद्ग्व्यवसमुपाधिपरा मालागाथा ततोऽप्यधिका ॥२२ ॥
आर्या पथ्यात्रितयं विपुला चपलात्रयं तथा गीतिः ।
उपगीतिश्चोद्गीतिश्चार्यागीतिरपि सैव च स्कन्धः ॥ २३ ॥
संकीर्णचतुष्कमुपस्कन्धश्चोत्स्कन्ध इत्यवस्कन्धः ।
गतिभेदरिपुच्छन्दो ध्रुवकमतस्तत्र सप्तविधगाथाश्च ॥ २४ ॥
प्रतिचरणकयतियुगचलधृतिरथ ।
गतिहतगतिलघुरतिमृदुगतिरिति ॥
सममपि सममिति न तु भुवि समघटि ।
समजनि पृथगिह लसमकसमितिषु ॥ २५ ॥
मात्रासमकेषु वदन्ति चतु—
र्मात्रोक्तचतुर्गणमार्यजनाः ।
मात्रासमकं गपरांशान्तं
मात्रा नवमीह तु लघ्वी स्यात् ॥ २६ ॥
भगणो भवति तृतीयगणोत्रा-
मुक्तः पूर्ववदेव सुनेत्रा ।
यदि पूर्गण(?) मुनिनेत्युपचित्रा ।
सोक्तांह्वाविति षोडशमात्रा ॥ २७ ॥
चतसृभ्य एव मात्राभ्यो जो ।
न्लौ वान्यदिह तथा विश्लोकः ॥
काव्यं हि तेन पुण्यश्लोकाः ।
प्रज्ञामहोदयाः कथयन्ति ॥ २८ ॥
मात्राभ्योऽष्टाभ्य एव यस्या ।
जो न्लौ वा पूर्ववदिह शेषम् ॥
सविशेषाद्वानवासिकेति ।
प्रवदन्ति विशेषवादिनस्ताम् ॥ २९ ॥

मात्राभ्य इमौ चतसृभ्यः सौ।
यत्राभिहितावितरत्प्राग्वत् ॥
मात्रासमजातिषु सा कथिता।
चित्रांशविरामविचित्रतया ॥ ३० ॥
कैश्चिन्मात्रासमकादीनां।
पादैर्मिश्रैर्द्वित्रिचतुर्णाम् ॥
पादाकुलकं कविपादैस्तद्।
व्यापादितं चतुष्पद्येवम् ॥ ३१ ॥
अप्रतिपादितपादैर्गन्तैः।
प्रतिपादितपादैरपि सार्धम् ॥
प्रोक्तं पिङ्गलपादाकुलकं।
तिलकं सुचतुष्षष्टिकलानाम् ॥ ३२ ॥
यस्याः पूर्वार्धेऽष्टौ दीर्घा द्विः स्युः स्यात् सानङ्गक्रीडा।
तदपरशकलक इह जलनिधिहृतसदुदितवसुपरिमितसुलघव इति ॥३३॥
गुरुपरनिधियुतकृतिमितलघुसुरुचिरदलयुगयुगतिरुचिरा।
गुरुतरकविजनविरचितकृतिषु च वरपदगतिरियमवगता ॥ ३४ ॥
मात्रासमकाचलधृत्युपचित्रावानवासिकाविश्लोकाः।
चित्रापादाकुलकानङ्गक्रीडाह्वयातिरुचिरा गदिताः ॥ ३५ ॥
अचलधृतिर्गीत्यार्यानङ्गक्रीडा शिखा भवेन्नाम्ना।
अतिरुचिरा तत्र तु चूलिका मता पिङ्ग (+ल) स्य मते ॥ ३६ ॥
अचलधृतिः समवृत्तं स्यादतिरुचिरार्धसममनङ्गक्रीडा।
विषमामिह तत्किमित्यभ्यधायि कविभिः कलासमके ॥ ३७ ॥
॥ इति जयकीर्तिकृतौ छन्दोऽनुशासने आर्याजातिमात्रासमक-
जात्यधिकारः पञ्चमः ॥

षष्ठोऽधिकारः ।

वैतालीयादीनां षण्मात्रगणोऽष्टधाष्टलः षोडशधा ।
त्रिचतुर्गुरुतः प्रस्तारोऽत्रापि गुरोरधो लघू द्वौ द्वौ स्तः ॥ १ ॥
विषमे पदि षट् समेऽष्ट वै ।
वैतालीयकला रलम्पराः ।
असमात्र लघुस्थिति नं चेत् ।
लघवः षण्न निरन्तराः समे ॥ २ ॥
मात्रानियमोऽत्र पूर्ववत्स्यात् ।
औपच्छन्दसिकं तथा रयान्तम् ।
मात्रागणलक्षणद्वयेन ।
व्यापाद्यन्त इमे विचित्रपादाः ॥ ३ ॥
सूत्रविदोक्तं प्रतिपादं ।
यत्र परौ भगणेन गकारौ ।
सात्र मतापातलिका स्यु-
र्मात्रा वैतालीयवदस्याः ॥ ४ ॥
वैतालीयसमांह्रिलक्षणं ।
प्रतिपादं खलु यत्र वर्तते ।
तत्समवैतालीयनामकं ।
संदृश्यं छन्दोऽनुशासने ॥ ५ ॥
विषमांह्रिगतं यदत्र तद् ।
वैतालीयस्य लक्षणम् ।
परितो विषमाभिधानभृद् ।
वैतालीयं तदुच्यते ॥ ६ ॥
औपच्छन्दसिकस्य लक्षणं यत् ।
समपादोदितमत्र वर्तते चेत् ।
प्रतिपादं तन्नाम तत्समौप-
च्छन्दसिकं छन्दोविदैः प्रणीतम् ॥ ७ ॥

ओजांह्रिगतं तथा यदौप-
च्छन्दसिकाख्यस्य लक्षणं चेत् ।
अभितो विषमाभिधानकौप-
च्छन्दसिकं छन्दसीह दृष्टम् ॥ ८ ॥
आपातलिकाजातिसमांह्रि-
प्रणियतलक्षणमष्टकलाद्यम् ।
यत्र यदा भगुरुद्वितयान्तं ।
प्रत्यंह्रि समापातलिका सा ॥ ९ ॥
आपातलिकाविषमांह्रि-
प्रणिहितलक्ष्मण्यभितोऽस्मिन् ।
षण्मात्राद्यादि[+ ग]युग्मे ।
सति विषमापातलिका स्यात् ॥ १० ॥
समयोर्यदि पादयोर्गुरौ ।
तुर्यपञ्चमकलासमागमे ॥
वैतालीयोक्तयोर्यदा ।
प्राच्यवृत्तिरिति नाम वर्तते ॥ ११ ॥
उदीच्यवृत्तिर्भवेद्यदा ।
वैतालीयगतौजपादयोः ।
गुरौ सतीह प्रयुक्तयो—
र्द्वैतीयीकतृतीयमात्रयोः ॥ १२ ॥
उदीच्यवृत्त्योजलक्षणं ।
प्राच्यवृत्तिसमपादलक्षणम् ।
यथास्वमत्रेति चेत्स्मृतं ।
वृत्तजातिनिपुणैः प्रवर्तकम् ॥ १३ ॥
यत्प्रवर्तकसमांह्रिलक्षणं ।
लक्ष्यतेंह्रिषु चतुर्षु केवलम् ।
ललितजातिषु निशातबुद्धय—
स्तामुशन्ति बहुधापरान्तिकम् ॥ १४ ॥

प्रवर्तकौजांह्रिलक्षणं ।
प्रवर्तते चेन्निरन्तरम् ।
प्रवर्तकैश्छन्दसामसौ ।
प्रवर्तिता चारुहासिनी ॥ १५ ॥
यदि चौपच्छन्दसाख्यजातौ ।
प्राच्यवृत्तिनियमो भवेद्यथास्त्रम् ।
विदितौपच्छन्दसाभिधान—
प्राच्यवृत्तिरियमुच्यते विधिज्ञैः ॥ १६ ॥
उदीच्यवृत्तीयलक्षणं चे—
दौपच्छन्दसिके यथास्वमित्थम् ।
तदोच्यतेऽसौ कलाप्रवीणै—
रौपच्छन्दसिकाद्युदीच्यवृत्तिः ॥ १७ ॥
प्रवर्तकीयं यथास्वमौप—
च्छन्दसेऽत्र यदभाणि लक्षणं तत् ।
प्रवर्तयत्यंशमेतदौप—
च्छन्दसप्रजनितं प्रवर्तकाख्यम् ॥ १८ ॥
सुन्दरं सयतिलक्षणं यदौप—
च्छन्दसप्रकटितापरान्तिकोक्तम् ।
छन्दसीह जयकीर्तिनाम्नि चौप—
च्छन्दसप्रजनितापरान्तिका स्यात् ॥ १९ ॥
उपागतं चारुहासिनीभा—
गुपेत्युपच्छन्दसीह तच्चेत् ।
विपच्यते चारुलक्षणं तत् ।
प्रपञ्चतश्चारुहासिनीयम् ॥ २० ॥
आपातलिकाह्वयजातौ ।
प्राच्यवृत्तिगदितिर्यदि यस्याम् ।

सापि तदापातलिकाख्य—
प्राच्यवृत्तिरभवद्गवृत्त्या ॥ २१ ॥
उदीच्यवृत्तेर्नियमोऽसौ ।
यदि तु भवत्यापातलिकायाम् ।
उदीच्यवृत्तिस्त्विति नाम्ना ।
गदितापातलिकादिरभिज्ञैः ॥ २२ ॥
उदीरितापातलिकायां ।
यत्प्रवर्तकमतं परिदृष्टम् ॥
यदा तदापातलिकादिः ।
स्यात्प्रवर्तकमिहार्धसमाभम् ॥ २३ ॥
आपरान्तिकमिदं खलु लक्ष्म ।
प्रापितं यदि तदा तलिकायाम् ॥
सापरा तदभिधा तलिकादिः ।
श्रीपुराणकविपुंगवगीता ॥ २४ ॥
प्रचोदितापातलिकायां ।
स चेद्विधिश्चार्वभिधायाः ।
सुविन्मतापातलिकादिः ।
सुचारुहासिन्यपि चेत् ॥ २५ ॥
अयुजोर्लघवोऽष्ट दश युजो—
र्लौ जो वा गुरुणा तदन्तयोः ।
र्लगणे तु तदादिलघुयति—
र्न विषमलघुतोऽत्रेति मागधी ॥ २६ ॥
तोयधिमात्रगणत्रितयाद्—
गो यदि नात्र जकारगणः ।
स्थायितृतीयपदाङ्घ्रियुगे सति ।
सोऽयमभाणि गुणोगुणिभिः ॥ २७ ॥
षट्कलतश्चतुष्कलगणाः पञ्चैव गुरुस्तरास्तथा ।

ओ म्लगणोऽथवा द्वितीये षष्ठे च न चेतरत्र जः ॥
म्ले सति तत्र कररसस्थाने प्रथमलघौ तु यतिरसौ ।
स्याद् द्विपदीति षट्कलगणे ल्न समोऽत्र परेण युज्यते ॥ २८ ॥

प्राक्तनलक्षणद्विपदिकानियमः सकलः स वर्ततेऽस्मिन् ।
व्यत्क्रमतोऽधिके सति गुरौ प्रतिपादमितीदमञ्जनालम् ॥
षष्ठगणान्तलघुविहीना चेत्प्रथमद्विपदिकासौ ।
निष्ठितशेषलक्षणयुता भवतीति हि कामलेखा ॥ २९ ॥

ऊहितोक्तितो गलांशसप्तकं निरन्तरं ।
गो हि नैधने नकारसप्तकं यदाथवा ॥
व्याहितं तदुभयमिश्रसप्तकं तदा तथो—
त्साहमाहुरुत्सवं च गोग्रहादिके बुधाः ॥ ३० ॥
महोत्सवो जकारतः सगोत्सवांशषट्कये ।

* * * * *

जकारतो ग्लयुग्मकं नकारगणविकल्पितं ।
स्वकारि गुरुपरं यदा प्रकाश्यते तदा रमा ॥ ३१ ॥

उत्सवांह्रिपूर्वकं यदा रमांह्रिकोत्तरं रमांह्रियुगलकोत्तरम् ।
प्रोत्समान्तरिततदंह्रिकोत्सवांह्रिनैधनं रमांह्रिरिति च नैधनम् ॥
यत्सुमोदयज्जनं रमैकपाददलपरं तथोत्सवादि वा परम् ।
त(+त्स)मीरितं लयानुगामि यमकवत्तरं विचित्रगति लयोत्तरम् ॥३२॥

नगणयुगलतोऽथ रैः सप्तभिर्दण्डकश्चण्डवृष्टिप्रपातस्तथैकोत्तरम् ।
प्रतिचरणरवृद्धयोऽर्णार्णवव्यालजीमूतलीलाकरोद्दामशङ्खादयः ॥
प्रचित इति नयुग्मतो यैस्तथान्यैरमिश्रीकृतैस्तत्प्रमाणैर्यदोत्पद्यते ।
शरगिरिगतिलोकलऽवादिकाश्चण्डवाताब्दसिंहाह्वयास्तेऽन्विता-
शोत्तराः ॥ ३३ ॥

चण्डवृष्ट्यादिकादौ लघूक्तौ नियामोऽत्र यो वर्जयित्वेति तं पण्डितैः
अव्यरेफादिभिर्दण्डकांशैस्तथा केवलैर्ये कृताः ।
दण्डका वृत्तशब्दादिका वृत्तवत्ते हि पादोक्तलक्ष्मेतरा दण्डका
ये तु ते मयपूर्वाश्च मालादिकास्तेऽथवानेकधा ॥

यस्तथोत्सवोक्तगणमयो गुरूत्तरः स चोत्सवाभिधानदण्डको
महार्हदादिदेवतास्तवे स्मृतः ।
जगणेतराङ्घिमात्रागणोऽत्र भृशमयुजि धाम्नि भवति जगणोऽथवा
न्लगण एष निधने गुरुश्च तु हि चित्रदण्डकः ॥ ३४ ॥
वैतालीयमतः समवैतालीयं च विषमवैतालीयम् ।
औपच्छन्दसिकापातलिके च तथा त्रिधा त्रिधा नवधेति ॥ ३५ ॥
तत्त्रिपञ्चकं प्राच्यवृत्तिसंज्ञाप्युदीच्यवृत्तिश्च ।
सार्धं प्रवर्त्तकेनापरान्तिका चारुहासिनीति जिनमिताः ॥ ३६ ॥
मागधिका गुणजातिर्द्विपदीत्रयमुत्सवद्वितयमपि च रमा ।
पञ्चलयोत्तरविधयोऽपि चण्डवृष्ट्यादिदण्डका गणधोक्ताः ॥ ३७ ॥
इति जयकीर्तिकृतौ छन्दोऽनुशासने मिश्राधिकारः षष्ठः ॥

सप्तमोऽधिकारः ।

वक्ष्येऽक्षरत्रिपद्येलाक्षरिकाषट्पदीचतुष्पदिकाः ।
छन्दोऽवतंससंज्ञा मदनवतीगीतिकादिमपि कर्णाटे ॥ १ ॥
रलधा रतिमदनशरा द्वित्रिचतुर्गादयोऽङ्घिवसुनृपसंख्याः ।
प्रस्तारे पूर्वगुरोरधो लघू द्वौ परस्य चैकैकलघुः ॥ २ ॥
द्वित्रिचतुर्वर्णा गाद्यास्त्रिचतुःपञ्चवर्णका लादिगणाः ।
क्रमशो रलधेषु भवन्त्येकैकलघुर्न वर्ततेऽत्र गणादौ ॥ ३ ॥
अङ्गजगणयुगाद् बाणगणे ।
सङ्गते प्रतिपादमल्पाक्षरम् ॥
शृङ्गारपिण्डादिकाव्येषु तत् ।
सङ्गीतं कर्णाटके प्रसिद्धम् ॥ ४ ॥
यदि तु रतिगणः पादादौ पादमध्ये ।
मदनगणयुगं पादान्ते बाणगणम् ॥
तदिदमन्तराक्षरमक्षरज्ञा (r. ज्ञैर्) गीतं ।
विदितमार्हते कर्णाटेश्वरकथादौ ॥ ५ ॥
प्रथमे रतिरेव मन्मथः स्याद्‌द्वितीये तृतीयेऽ- ।
प्यथ चतुर्थे बाणगणस्तु पञ्चमस्थान एव ॥

प्रथितं लक्षणमिति यस्य तन्मध्यमाक्षराख्यं ।
प्रथितं कर्णाटमालतीमाधवप्रभृतिकाव्ये ॥ ६ ॥
रतिपतिगणयुग्माद्रतितः स्मरयुग्मं रतिरपि (add च पुनः) ।
प्रतिपादं वर्तते यस्मिंस्तत्समानाक्षरं नाम ॥
श्रुतिकान्तमक्षरदक्षैरादृतमसगाख्यकविना ।
प्रतिपादितं ननु कर्णाटकुमारसंभवकाव्ये ॥ ७ ॥
आदौ रतिगणो मध्येऽत्र स्मरगणपञ्चकमन्ते तु बाणगणः ।
पादेष्विह रतिर्वा द्वितीये तुर्ये च स्थाने तन्महाक्षराख्यम् ॥
पादादिप्रभृतीति केवलं स्मरगणषट्कयं बाणान्तं केचिदाहुः ।
पादे पादेऽत्र प्रतिगणमपि यतिर्लक्ष्यते सर्वेषामक्षराणाम् ॥ ८ ॥
करकराङ्घिधञ्यंश— ।
चरणा दिप्रसरतिः ॥
स्मरमयी लादिगिरिहरांशा चान्त— ॥
विरमणाच्चित्रा त्रिपदिका ॥ ९ ॥
सर्वलक्षणमत्र ।
पूर्ववद्धरधाम्नि ॥
गुर्वादिबाणगणभाग् विचित्रा स्यात् ॥
पूर्वे कर्णाटच्छन्दोमते ॥ १० ॥
मात्राभिर्द्वाषष्ट्या ।
चित्रा स्यादित्येवम् ॥
मात्रा वर्धन्ते क्वचिदस्या न्यूनास्ताः ॥
सूत्रं पूर्वोक्तं किममूभिः ॥ ११ ॥
ऋतुहतगिरिपरि— ।
मितलघुरियमथ ॥
यतियुतिरखिलगुरुरिह न भवति ॥
यतिपतिगदितमत इति ॥ १२ ॥
सर्वलघुर्न चेत् ।
सर्वथा त्रिपदिका ॥

सर्वगुरुस्तु न भवेद् गिरीशयो—।
गुर्वादिलगणप्रतिषेधात् ॥ १३ ॥
त्रिपदी तृतीयांह्रा— ।
वपमुञ्चत्येलेति ॥
सुपठिता गेयविद्जनैः[१] ॥ १४ ॥
मदनाद्याः शरगणान्ताः ।
यदि चरणाश्चत्वारः ॥
गदिताश्चेच्चतुष्पदिका ।
विदितासौ चूडामणौ ॥ १५ ॥
कन्दर्पगणतो रतिगणचतुष्कं चेत् ।
छन्दसि जयकीर्तेरादिवराहाख्या ॥
छन्दोऽवतंसनामेति चतुष्पदिका ।
संदृष्टासौ कुमारसंभवादौ ॥ १६ ॥
स्मरगणः परितोऽत्र । शरगणः पुरषष्ठ— ।
चरणान्तयोस्तदन्ते विरामः ॥
करकरपुरगणाः । द्विरिहत्याश्चरणाश्चेत् ।
स्फुरति षट्चरणवत् षट्पदिका[२] ॥ १७ ॥
स्मररतिपूर्वं स्मररतिमध्यं स्मरयुगगुरुनिधनम् ।
चरणचतुष्कं स्थिरतरचतुरुत्तरशतमात्रमिदम् ॥
करिवसुमात्राविरमणयुक् चेत् स्फुरति तदाक्षरिका ।
गुरुपरजगणेतरगतिमात्राधरगणभागथवा ॥ १८ ॥

---

१ पञ्च कामा रतिश्चैका कामोऽन्ते चरणत्रये ।
प्रत्येकं तासु चेदेताश्छन्दस्वत्योऽखिला मताः ॥ १२५ ॥
गणादेर्न्यूनताधिक्यादेलाभासा इमा मताः ॥ १२६ ॥
—संगीतरत्नाकर (Adyar Ed. 1944) IV·

२ षष्ठस्तृतीयस्त्रिगण पृथग् द्विद्विगणाः परे ।
चत्वारश्चरणा बाणप्रान्तौ षष्ठतृतीयकौ ॥ २७२ ॥
शेषास्तु मान्मथगणा यस्यां सा षट्पदी मता ।
कर्णाटभाषया तालवर्जिता नादमुक्तिका ॥ २७३ ॥
—संगीतरत्नाकर (Adyar Ed. 1944) IV·

प्रथमक इह गुरुपरकृतिपरिमितलघुविरते— ।
प्यथ पादा रतिगणपरगतिमदनगणाः स्युः ॥
प्रथितपदावलयस्तैश्चेदिति मदनवती ।
प्रथितयतिः प्रतिचरणं द्वाविंशतिमात्रा ॥ १९ ॥
रगणो द्वितीये षष्ठे च ।
लगणो धगणो वान्यत्र पञ्चस्वर्धयोश्च ॥
त्रिगणोऽयुक् समपादोऽब्धिगणो ।
निगदिता गीतिकालंकारे प्रभुसेनीयैः ॥ २० ॥
आदिर्गुरुपूर्वश्चेत्पादो गुरुपूर्वकास्तथान्ये जातौ ।
पादो लघुपूर्वश्चेदादिः शेषास्तथैव भाषाविषये ॥ २१ ॥
किमेतावन्ति पद्यानि चेहानुक्तान्यनेकधा ।
सन्ति षट्प्रत्यये तानि दृश्यन्ते सूचितानि च ॥ २२ ॥
इति जयकीर्तिकृतौ छन्दोऽनुशासने कर्णाटविषयभाषाजात्यधिकारः
सप्तमः ॥

अष्टमोऽधिकारः ।

गणानां प्रत्ययानां च मुख्यः प्रस्तार एव सः ।
तस्मात्प्रस्तारसूत्रं तद्ध्येकं सर्वत्र दृश्यते ॥ १ ॥
गुरोरधस्ताल्लघुमादितः क्षिपेत्परं लिखेदूर्ध्वसमं पुनस्तथा ।
पाश्चात्यखण्डं गुरुणा प्रपूरयेद्यावत्पदं सर्वलघुत्वमाप्यते ॥ २ ॥
विन्यस्य सर्वगुर्वेकद्विचतुष्कान्समार्धसमविषमांह्रीन् ।
प्रस्तारयेत्पृथक्पृथगिति क्रमात् वृत्तविधिरयं प्रस्तारः ॥ ३ ॥
एकैकेनान्तरिता प्रस्तारप्रथमपङ्क्तिरिह गुरुलघुना ।
तत्तद्द्विगुणितगलतः क्रमाद्द्वितीयादिपङ्क्तयोऽन्तरिताः स्युः ॥४॥
अर्धसमप्रस्तारे संदृश्यन्ते समार्धसमवृत्तानि ।
विषमप्रस्तारेऽत्र तु समार्धसमविषमवृत्तरूपाण्यखिलम् ॥ ५ ॥
जातीनामपि चतुरः पादान्विन्यस्य संभवत्सर्वगुरून् ।
प्रस्तारयेदिति प्राग्गणसंभवमपि लघुप्रयोगं ज्ञात्वा ॥ ६ ॥
पृच्छकवृत्तमिताङ्कं दलयेल्लघु समदले लिखेद्गुरु विषमे ।
सैकत्वाच्छन्दोमिति जनयेदिति नष्टवृत्तरूपकमङ्कात् ॥ ७ ॥

रूपितवृत्तप्रतिगलमेकादिद्विगुणिताः स्युरुपरि तदङ्कान् ।
लगतान्सैकान्युक्त्वा तावतिथं वृत्तमिति वदेत्प्रस्तारे ॥ ८ ॥
छन्दोवर्णानेकाधिकरूपानुत्क्रमाभिधाया (+धस्ता)त् ।
तत्तदुपर्युपरि तथा क्षिपेदिति पुनः पुनर्जह्मेकैकम् ॥ ९ ॥
आद्यन्त(r. न्ते) सर्वलगे एकादिलघूनि मध्यवृत्तान्येषु ।
पिण्डीकृतेषु संख्या सैकोद्दिष्टाङ्कपिण्डिता वा संख्या ॥ १० ॥
छन्दोऽक्षरे समदले शून्यं न्यस्य विषमे तथा रूपम् ।
रूपे तद्द्विगुणं खे वर्गः समवृत्तसंख्या स्यात् ॥ ११ ॥
ज्ञातसमवृत्तसंख्या तत्तद्गुणतोऽर्धसमकसंख्या मूलात् ।
तत्तद्गुणात्समूलार्धसममितेर्विषमवृत्तमितिरपमूला ॥ १२ ॥
पञ्चविधवृत्तसंख्या स्थाने स्वाक्षरहते द्वितीयादिदले ।
दलिततृतीयचतुर्थे सार्धान्ते वृत्तवर्णगुरुलघुमात्रा ॥ १३ ॥
जात्यंह्रिचतुष्के प्रतिगणं क्षिपेत्तत्र संभवद्गणसंख्याम् ।
गुण (+ये) दन्योन्यं तत्संख्या स्यात्सर्वजातिसंख्येति मता ॥ १४ ॥
आर्याथ सप्तपञ्चाशन्मात्रा स्कन्धकश्चतुःषष्टिकलः ।
तद्वन्मात्रासमकं सद्वादशशतकला द्विपदिकेत्यादेः ॥ १५ ॥
जातेर्मात्रापिण्डे स्वाक्षररहिते कृते स्थिता गुरवः स्युः ।
गुरुरहितेऽक्षरसंख्या लघुरहितेऽर्धीकृते तु गुरुसंख्या स्यात् ॥१६॥
छन्दःसंख्या हता द्वाभ्यामेकरूपविवर्जिता ।
छिन्नवृत्ताङ्गुलव्याप्तिरध्वयोगो भवेदिति ॥ १७ ॥
प्रस्तारो नष्टमुद्दिष्टमेकद्व्यादिलघुक्रिया ।
संख्यानमध्वयोगश्चेत्युक्तं प्रत्ययषट्कयम् ॥ १८ ॥
माण्डव्यपिङ्गलजनाश्रयसैतवाख्य-
श्रीपादपूज्यजयदेवबुधादिकानाम् ।
छन्दांसि वीक्ष्य विविधानपि सत्प्रयोगान्
छन्दोऽनुशासनमिदं जयकीर्तिनोक्तम् ॥ १९ ॥

इति जयकीर्तिकृतौ छन्दोऽनुशासने (प्रस्तारादिप्रत्ययाधिकारः) ॥
संवत् ११९२ आषाढशुदि १० शनौ लिखितम् ।

अथ भट्टकेदारविरचितः वृत्तरत्नाकरः ।

प्रथमोऽध्यायः ।

सुखसंतानसिद्ध्यर्थं नत्वा ब्रह्माच्युतार्चितम् ।
गौरीविनायकोपेतं शंकरं लोकशंकरम् ॥ १ ॥
वेदार्थशैवशास्त्रज्ञः पव्वेकोऽभूद् द्विजोत्तमः ।
तस्य पुत्रोऽस्ति केदारः शिवपादार्चने रतः ॥ २ ॥
तेनेदं क्रियते छन्दो लक्ष्यलक्षणसंयुतम् ।
वृत्तरत्नाकरं नाम बालानां सुखसिद्धये ॥ ३ ॥
पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा ।
मात्रावर्णविभेदेन छन्दस्तदिह कथ्यते ॥ ४ ॥
षडध्यायनिबद्धस्य छन्दसोऽस्य परिस्फुटम् ।
प्रमाणमिति विज्ञेयं षट्त्रिंशदधिकं शतम् ॥ ५ ॥
म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥ ६ ॥
सर्वगुर्मो मुखान्तलौ यरावन्तगलौ सतौ ।
ग्मध्याद्यौ ज्भौ त्रिलो नोऽष्टौ भवन्त्यत्र गणास्त्रिकाः ॥ ७ ॥
ज्ञेयाः सर्वान्तमध्यादिगुरवोऽत्र चतुष्कलाः ।
गणाश्चतुर्लघूपेताः पञ्चार्यादिषु संस्थिताः ॥ ८ ॥
सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः ।
वा पादान्ते त्वसौ ग्वक्रो ज्ञेयोऽन्यो मात्रिको लृजुः ॥ ९ ॥

---

2 a. वेदान्तशैव ० Rm; वेदार्थसर्व ० Ss (v. l.). 2 b. पव्येको Nr; पठ्येको Rm; पिव्वेको Sk, Su (c). 3 d. - सुखबुद्धये Bb, Pb, Rm, Sk, Sm, Su (b). 4 c. - वर्ण विभागेन Br. 5 c. प्रमाणमपि ० Ba, Br, Jn, Pa, Rm, Va. Sts 5 is dropped by Sa. 8 a. -सर्वादिमध्यान्त Rm, Su (b). 8 d. पथ्यार्या ० Rm. 9 c. वा पदान्ते ० Br, Su (b); वा पादान्तस्‍ ० Bb, Sk, Su (c). 9 d. -मातृको ० Ba, Bb, Jn, Su (a, b).

पदादाविह वर्णस्य संयोगः क्रमसंज्ञकः ।
पुरःस्थितेन तेन स्याल्लघुतापि क्वचिद् गुरोः* ॥ १० ॥
अब्धिभूतरसादीनां ज्ञेयाः संज्ञास्तु लोकतः ।
ज्ञेयः पादश्चतुर्थांशो यतिर्विच्छेदसंज्ञिता ॥ ११ ॥
युक्समं विषमं चायुक् स्थानं सद्भिर्निगद्यते ।
सममर्धसमं वृत्तं विषमं च तथापरम् ॥ १२ ॥
अंह्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः ।
तच्छन्दःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते ॥ १३ ॥
प्रथमांह्रिसमो यस्य तृतीयश्चरणो भवेत् ।
द्वितीयस्तुर्यवद्-वृत्तं तदर्धसममुच्यते ॥ १४ ॥
यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् ।
तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः ॥ १५ ॥
आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्धितैः ।
पृथक्छन्दो भवेत्पादैर्यावत् षड्विंशतिं गतैः ॥ १६ ॥
तदूर्ध्वं चण्डवृष्ट्यादिदण्डकाः परिकीर्तिताः ।
शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः ॥ १७ ॥
उक्तात्युक्ता तथा मध्या प्रतिष्ठान्या सुपूर्विका ।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ॥ १८ ॥

---

* १०. १ तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि ।
अल्पव्ययेन सुन्दरि ग्राम्यजनो मिष्टमश्नाति ॥
[1 b पिच्छलानि Ba, Bb, Pa, Sk, Sm, Ss, Su (b). 1 d मृष्टम॰ Sd, Su (b, c).

---

10 a. पादादाविह ० Ba, Bb, Br, Nr, Pa, Pb, Rm, Sd, Sk, Sm, Su (a), Ss, Vs. Jn notices पदादौ but rejects it; Br notices पदादौ and prefers it but does not adopt it. 10 b. - क्रमसंज्ञितः Rm. 10 c. परस्थितेन ० Rm. 11 b. ज्ञेया संज्ञाश्च ० Sm, Su (b); ज्ञेयाः संख्यास्तु ० Rm. 11 d. - संज्ञका Sm (b), Su (b), Vs; - संज्ञिका Ba, Bb, Jn, Pa, Sk, Sm (a); - संज्ञितः Nr; - संज्ञकः Rm. 12 d. - ततः परम् Jn; - त्रिधा मतम् Rm. 13 a—14 a. अंघ्रयो ० प्रथमांघ्रि ० Ba, Nr, Pa, Pb, Rm, Sm, Vs. 16 d. - षड्विंशकं ० Su (c). - गतम् Bb, Nr, Pa, Pb, Rm, Sm, Ss, Su (a), Vs. 18 b. - प्रतिष्ठा सुप्रतिष्ठिता Rm.

त्रिष्टुप् च जगती चैव तथातिजगती मता ।
शक्वरी सातिपूर्वा स्यादष्टयत्यष्टी ततः स्मृते ॥ १९ ॥
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः ।
विकृतिः संकृतिश्चापि तथाभिकृतिरुत्कृतिः ॥ २० ॥
इत्युक्ताश्छन्दसां संज्ञाः क्रमशो वच्मि सांप्रतम् ।
लक्षणं सर्ववृत्तानां मात्रावृत्तानुपूर्वकम् ॥ २१ ॥
॥ इति भट्टकेदारविरचिते वृत्तरत्नाकराख्ये छन्दसि संज्ञाविधानो नाम प्रथमोऽध्यायः ॥ १ ॥ [ग्रं० श्लो० २१.]

द्वितीयोऽध्यायः ।

लक्ष्मैतत्सप्तगणा गोपेता भवति नेह विषमे जः ।
षष्ठोऽयं च नलघु वा प्रथमेऽर्धे नियतमार्यायाः ॥ १ ॥
षष्ठे द्वितीयलात्परके न्ले मुखलाच्च स यदि पदनियमः ।
चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः ॥ २ ॥
त्रिष्वंशकेषु पादो दलयोराद्येषु दृश्यते यस्याः ।
पथ्येति नाम तस्याश्छन्दोविद्भिः समाख्यातम् ॥ ३ ॥
संलङ्घ्य गणत्रयमादिमं शकलयोर्द्वयोर्भवति पादः ।
यस्यास्तां पिङ्गलनागो विपुलामिति समाख्याति ॥ ४ ॥
उभयार्धयोर्जकारौ द्वितीयतुर्यौ गमध्यगौ यस्याः ।
चपलेति नाम तस्याः प्रकीर्तितं नागराजेन ॥ ५ ॥
आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः ।
शेषे पूर्वजलक्ष्मा मुखचपला सोदिता मुनिना ॥ ६ ॥
प्राक्प्रतिपादितमर्धे प्रथमे, प्रथमेतरे तु चपलायाः ।
लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला ॥ ७ ॥

---

20 c. चैव (for चापि) Br, Rm. 20 d. तथातिकृति॰ Br, Nr, Rm, Vs.

1 c. -यं नलघू वा Ba, Br, Nr, Pa, Pb, Sd, Wa, Wb, Wc, Wg; -यं नलघु वा Bb; -यं नगणो वा Vs. 2 b. -सयतिपद० Ba, Bb, Br, Jn, Nr, Pa, Pb, Rm, Sd, Vs, Wa. 3 d. प्रकीर्तितं नागराजेन Br, Nr, Pb, Wa, Wc. 4 a. उल्लंघ्य० Br, Pa, Pb, Rm, Wa, Wc. 5 a. दलयोर्द्वयोर्ज० Ba. 7 b. च (for तु) Br, Pa, Wa. 7 c. -थोक्ता Pa.

आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः ।
दलयोः कृतयतिशोभां तां गीतिं गीतवान् भुजङ्गेशः ॥ ८ ॥
आर्याद्वितीयकेऽर्धे यद्गदितं लक्षणं तत्स्यात् ।
यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते ॥ ९ ॥
आर्याशकलद्वितयं व्यत्ययरचितं भवेद्यस्याः ।
सोद्गीतिः किल गदिता तद्वद्यत्यंशभेदसंयुक्ता ॥ १० ॥
आर्यापूर्वार्धं यदि गुरुणैकेनाधिकेन निधने युक्तम् ।
इतरत्तद्वन्निखिलं यदीयमुदितैवमार्यागीतिः ॥ ११ ॥
षड् विषमेऽष्टौ समे कला— ।
स्ताश्च समे स्युर्नो निरन्तराः ॥
न समात्र पराश्रिता कला ।
वैतालीयेऽन्ते रलौ गुरुः ॥ १२ ॥
पर्यन्ते यौ तथैव शेष— ।
मौपच्छन्दसिकं सुधीभिरुक्तम् ॥ १३ ॥
आपातलिका कथितेयं ।
भाद्गुरुकावथ पूर्ववदन्यत् ॥ १४ ॥
तृतीययुग् दक्षिणान्तिका ।
समस्तपादेषु द्वितीयलः ॥ १५ ॥
उदीच्यवृत्तिर्द्वितीयलः ।
सहितोऽग्र्येण भवेदयुग्मयोः ॥ १६ ॥

---

9 a. -केऽर्धे Su. 9 b. यद्गीतं लक्षणं० Wg. 10 c. कथिता (for गदिता) Br, Rm, Sk, Sm, Wa. 11 d. भवति यदीयमुदितेयमा० Br, Wa, Wb, Wg; भवति यदीयमर्धमुदितार्या० Nr; दलं यदीयमुदितेयमा० Rm, Sd, Sm (b); दलं यदीयमुदितैवमा० Sk, Ss, Vs; यदीयमर्धमुदितैवमा० Pa, Wc; यदीयमर्धमुदितेयमा० Pb; यदीयमुदिता किलेयमा० Ba; यदीयमुदितेयमा० Jn. Note that according to Jn, Sm and Su, this line contains only 17 Mātrās as against 20 acc. to others. 12 a. षड् विषमे समेऽष्टौ कलाः Wa. 12 b. षट् च समे स्युर्नो० Rm, Wa, Wc, Wg. 12 c. -परेण युज्यते Bb. 13 ab. -शेषं चौप० Bb, Sm (a), Su (b); -शेषं त्वौप० Ss; शेषं ह्यौप० Ba, Br, Pa, Vs. 16 b. सहितोऽग्रेण० All Mss. except Su.

पूर्वेण युतोऽथ पञ्चमः ।
प्राच्यवृत्तिरुदितेति युग्मयोः ॥ १७ ॥
यदा समावोजयुग्मकौ ।
पूर्वयोर्भवति तत्प्रवृत्तकम् ॥ १८ ॥
अस्य युग्मरचितापरान्तिका ॥ १९ ॥
अयुग्भवा चारुहासिनी ॥ २० ॥
वक्त्रं नाद्यान्नसौ स्यातामब्धेर्योऽनुष्टुभि ख्यातम् ॥ २१ ॥
युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितम् ॥ २२ ॥
ओजयोर्जेन वारिधेस्तदेव विपरीतादि ॥ २३ ॥
चपलावक्त्रमयुजोर्नकारश्चेत्पयोराशेः ॥ २४ ॥
यस्यां लः सप्तमो युग्मे सा युग्मविपुला मता ॥ २५ ॥
सैतवस्याखिलेष्वपि ॥ २६ ॥
भेनाब्धितो भाद्विपुला ॥ २७ ॥
इत्थमन्या रश्चतुर्थात् ॥ २८ ॥
नोऽम्बुधेश्चेन्नविपुला ॥ २९ ॥
तोऽब्धेस्तपूर्वान्या भवेत् * ॥ ३० ॥
द्विकगुणितवसुलघुरचलधृतिरिति ॥ ३१ ॥
मात्रासमकं नवमो ल्‌ गन्तम् ॥ ३२ ॥
जो न्लावथाम्बुधेर्विश्लोकः ॥ ३३ ॥
तद्युगलाद्वानवासिका स्यात् ॥ ३४ ॥
बाणाष्टनवसु यदि लश्चित्रा ॥ ३५ ॥

---

* ३०. १ अम्भोनिधेर्मस्तत्पूर्वा Ba, Jn.

---

17 b. -रुदितैव० Rm, Wr. 20. अयुग्मयुक्० Br, Wa. 23 a. अयुजोर्जेन० Rm, Sk, Ss, Wr. 30. तोऽम्बुधेस्तपूर्वा भवेत् Wb. 29 and 30. dropped in Sd. 31. द्विगुणित ... रिति च (ह Pa, Wc) Br, Nr, Pa, Pb, Wa, Wo; द्विकगुणित ... रिह Rm. 32. -लान्त्यः Rm; -लान्तम् Nr, Pa. 33. जो न्लावथ जलधेर्विश्लोकः Br (v. l.), Sn (b). 35. पञ्चाष्टनवसु० Va.

अष्टाभ्योऽथ गलावुपचित्रा ॥ ३६ ॥
यदतीतकृतविविधलक्ष्मयुतै —
र्मात्रासमादिपादैः कलितम् ॥
अनियतवृत्तपरिमाणसहितं
प्रथितं जगत्सु पादाकुलकम् ॥ ३७ ॥
वृत्तस्य लो विना वर्णैर्गा वर्णा गुरुभिस्तथा ।
गुरवो लैर्दले नित्यं प्रमाणमिति निश्चितम् ॥ ३८ ॥
शिखिगुणितदशलघुरचित---
मपगतलघुयुगलमपरमिदमखिलम् ।
सगुरु शकलयुगलकमपि
सुपरिघटितललितपदनिचिति भवति शिखा ॥ ३९ ॥
विनिमयविहितशकलयुगललघु —
ललितपदविततिरचितगणनिचया ।
श्रुतिसुखकृदियमपि जगति
जशिर उपगतवति भ्नि सति भवति खजा ॥ ४० ॥
अष्टावर्धे गा ह्यभ्यस्ता
यस्याः सानङ्गक्रीडोक्ता ।
दलमपरमपि वसुगुणितसलिलनिधि--
लघुकविरचितपदविततिं भवति ॥ ४१ ॥
त्रिगुणनवलघुरवसितिगुरुरिति
दलयुगकृततनुरतिरुचिरा ॥ ४२ ॥
॥ इति भट्टकेदारविरचिते वृत्तरत्नाकराख्ये छन्दसि मात्रावृत्ता-
धिकारो नाम द्वितीयोऽध्यायः ॥ २ ॥ [ग्रं० श्लो० ३२, अ० ८]

---

36. अष्टाभ्यो ग (गा Pa) स्या उपचित्रा Ba, Br, Pa. Vs. Wa, Wo; -गाथा० Wb; -गाल्लावु१० Su (b); -भाद्गावु१० Ba, Ss, Vs; नवमे भवति गुरावुप-चित्रा Ba, Jn, Vs; उपचित्रा नवमे परयुक्ते Ba, Br, Nr, Pa, Pb, Ss, Wa, Wo; अक्षिय-युगाङ्कभेदुपचित्रा Rm, Wg. 36 is dropped in Sk. 37 c. -परिमाणयुक्तं Br, Nr, Pa, Pb, Wa. 38 a. ला (for लो) Ba, Br, Nr, Pa, Pb, Rm, Sd. 39 b. -पदविततिं भवति शिखा Ba, Br, Nr, Pa, Pb, Rm, Wa, Wb, Wo, Wg. 40 a. विनिमयविनिहित ... युगलकलितपदविततिविरचितगुण० Br, Nr, Pb, Wa, Wb, Wc, Wg; विनिमयनिहित ... ततिविरचितगण० Sm (a); -गुणनिचया Rm; -युगलघुकलित ... विरचित० Pa. 40 b. -जगति भ्नि जशिर उप० Br, Nr, Pb, Rm, Wa, Wb, Wc, Wg.

॥ तृतीयोऽध्यायः ॥

ग् श्रीः ॥ १ ॥ गौ स्त्री ॥ २ ॥ मो नारी ॥ ३ ॥ रो मृगी* ॥४॥ म्गौ चेत्कन्या* ॥ ५ ॥ भ्गौ गिति पङ्क्तिः* ॥ ६ ॥ त्यौ स्तस्तनुमध्या ॥ ७ ॥ शशिवदना न्यौ ॥ ८ ॥ त्सौ चेद्वसुमती* ॥ ९ ॥ म्सौ गः स्यान्मदलेखा ॥ १० ॥ कुमारललितं ज्सौग् ॥ ११ ॥ सरगा हंसमाला* ॥ १२ ॥ मो मो गो गो विद्युन्माला ॥ १३ ॥ भौ गिति चित्रपदा गः ॥ १४ ॥ माणवकं भात्तलगाः ॥ १५ ॥ म्नौ गौ हंसरुतमेतत् ॥ १६ ॥ जौं समानिका गलौ च ॥ १७ ॥ प्रमाणिका जरौ लगौ ॥ १८ ॥

---

* ४. १ य केसा Rm.

* ५. १ जग लासिनी Rm. ५. २ म्गौ सुमुखी Rm. ५. ३ यगौ व्रीडा Rm. ५. ४ गौं समृद्धिः Rm. ५. ५ सुमतिः स्गौ Rm.

* ६. १ सती जगौ गः Rm. ६. २ मन्दा तलगैः Rm. ६. ३ गौं गिति प्रीतिः Rm.

* ९. १ (A) कामलतिका भ्यौ Ba, Jn; (B) -ललिता भ्यौ Vs. ९. २ (A) मौ सावित्रीमाहुः Rm, Wg; (B) विद्युल्लेखा(न्माला Wo) मो मः Ba, Br, Nr, Pa, Pb, Vs, Wb. ९. ३ म्रौ यस्याः सा नदी Rm, Wg. ९. ४ (A) म्सौ प्रोक्तं मुकुलम् Rm, Wg; स्यान्मः सो मुकुलम् Wo; (B) स्यान्मः सोऽनुकूलम् Su (b); (C) स्यान्म्सौ सोमकुलम् Ba, Jn. ९. ५ यगौ सोमराजी Ba, Jn, Pa, Ss (T), Su (b), Vs, Wo. ९. ६ मालिनी मांभ्याम् स्यात् Rm, Wg. ९. ७ स्याद्ररौ स्रग्विणी Ba, Jn, Pa, Ss (T), Su (b), Vs, Wo. ९. ८ स्याद्रसौ कुलकम् Pa. ९. ९ सयुगं रमणी Rm, Wg.

* १२. १ चूडामणिस्तभगाः (गात् Nr) Ba, Bb. Jn, Nr, Pa, Ss (T), Wb. १२. २ मधुमति ननगाः Ba, Bb, Jn (T), Nr, Pa, Sk, Sm (T), Ss (T), Su (b), Vs, Wb, Wc. १२. ३ मधुमती नभगाः Jn (v. l.), Rm.

---

1. गः श्रीः Ba, Pb, Sm (b); Su (a, b, c); गुः श्रीः Br, Nr, Pa. 11. कुमारललिता० Ba, Bb, Br, Jn, Rm, PA, Sm, S-, Wa, Wb, Wc, Wg; कुमारलतिका० Vs. 12. सरगैर्हंस० Ba, Br, Pa, Wa, Wb, Wc, Wg. 11 and 12 are dropped in Pb and Sk.

वितानमाभ्यां यदन्यत्* ॥ १९ ॥ राभसाविह हलमुखी ॥ २० ॥ भुजगशिशुसृता नौ मः* ॥ २१ ॥ म्सौ ज्गौ शुद्धविराडिदं मतम् ॥ २२ ॥ म्नौ य्गौ चेति पणवनामेदम् ॥ २३ ॥ जौं रगो मयूरसारिणी स्यात् ॥ २४ ॥ भ्मौ सगयुक्तौ रुक्मवतीयम् ॥ २५ ॥ ज्ञेया मत्ता मभसगयुक्ता ॥ २६ ॥ नरजगैर्भवेन्मनोरमा ॥ २७ ॥ त्जौ जो गुरुणेयमुपस्थिता* ॥ २८ ॥ स्यादिन्द्रवज्रा यदि तौ जगौ गः ॥ २९ ॥ उपेन्द्रवज्रा जतजास्ततो गौ ॥ ३० ॥ अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः । इत्थं किलान्यास्वपि मिश्रितासु स्मरन्ति जातिष्विदमेव नाम ॥ ३१ ॥ नजजलगैर्गदिता सुमुखी ॥ ३२ ॥ दोधकवृत्तमिदं भभभाद्गौ ॥ ३३ ॥ शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः ॥ ३४ ॥ वातोर्मीयं गदिता म्भौ तगौ गः ॥ ३५ ॥ म्भौ न्लौ गः स्याद् भ्रमरविलसितम् ॥ ३६ ॥

---

* १९. १ कुमारललिता ज्सौ गौ Vs. १९. २ (A) नाराचकं तरौ लगौ Bb, Jn, Ss, Su(b), Vs, Wa, Wb; (B) नाराचिका॰ Pa, Nr, Rm, Wa, Wc, Wg. १९. ३ नागरकं भरौ लगौ Rm, Wg. १९. ४ जौं गगौ च सिंहलेखा Ba, Jn, Su, Vs.

* २१. १ स्यान्मणिमध्यं भान्मसयुक् Jn. २१. २ भद्रिका भवति रो नरौ Ba, Jn (T), Pa. Ss, Su, Vs, Wc; भद्रिकेति रनैरियम् Nr (T), Wb.

* २८. १ त्वरितगतिस्तु नजनगैः Rm, Wg. २८. २ दीपकमाला चेद् भमौ जगौ Ba, Jn. २८. ३ दीपकमाला चेद् द्वौ म्नौ तगौ Pa, Wc. २८. ४ चम्पक (पद्मक Bb, Wb.) माला चेद् भमसाद्गः (साद्गुः Pa, सा गः Rm) Bb, Jn, Pa, Rm, Sk (T), Ss (T), Su (b), Wb, Wc, Wg. २८. ५ म्नौ ज्गौ चेति पणवनामकम् Ba, Br, Nr, Pa, Pb, Wa, Wr. २८. ६ ज्ञेया (उक्ता Bb) हंसी मभनगयुता (-सम Bb) Ba, Bb, Jn (Wrongly -युक्ता). २८. ७ रश्च सौ सगुरुर्मणिरागः Rm, Wg. २८. ८ त्रिसगा अपि मेघवितानम् Rm, Wg.

21.- शिशुसृता॰ Br, Pb, Sm, Su (a, b), Wa. 26. मत्ता ज्ञेया॰ Pa, Pb (another name हंसी Vs). 28. This is dropped by Rm, Sk, Ss, Vs. 31 ab. -भाजः पादा यदीया उप॰ Ba, Vs (the latter rejects the dual reading). 35. कथिता (for गदिता) Br, Nr, Pb. 36. -भ्रमरविलसिता Ba, Bb, Jn, Sk, Sm, Ss.

पञ्चरसैः श्रीभैतनगगैः स्यात् ॥ ३७ ॥ रो नराविह रथोद्धता लगौ ॥ ३८ ॥ स्वागतेति रनभाद्गुरुयुग्मम् ॥ ३९ ॥ ननसगगुरुरचिता वृन्ता ॥ ४० ॥ ननरलगुरुमिश्च भद्रिका ॥ ४१ ॥ श्येनिका रजौ रलौ गुरुर्यदा ॥ ४२ ॥ उपस्थितमिदं ज्सौ ताद्गकारौ* ॥ ४३ ॥ चन्द्रवर्त्म गदितं तु रनभसैः ॥ ४४ ॥ जतौ तु वंशस्थमुदीरितं जरौ ॥ ४५ ॥ स्यादिन्द्रवंशा ततजै रसंयुतैः ॥ ४६ ॥ इह तोटकमम्बुधिसैः प्रथितम् ॥ ४७ ॥ द्रुतविलम्बितमाह नभौ भरौ ॥ ४८ ॥ वसुयुगविरतिर्नौ म्यौ पुटोऽयम् ॥ ४९ ॥ प्रमुदितवदना भवेन्नौ रौ ॥ ५० ॥ नयसहितौ न्यौ कुसुम-

---

* ४३. १ शिखण्डितमिदं ज्सौ तौ गुरुश्चेत् (- ज्सौ तो गुरू चेत् Ba) Ba, Bb, Jn (T), Pa, Ss, Va. ४३. २ शिखण्डितमिदं ज्सौ रगौ गश्चेत् Wb. ४३. ३ त्जौ ज्गौ गुरुणेयमुपस्थितोक्ता Ba, Bb, Rm, Sk, Ss (T), Wb, Wg. ४३. ४ विध्यङ्कमाला भवेत्तौ तगौ गः Ba. ४३. ५ अमुविलासो नतनलगवः Ss, Wb. ४३. ६ कुपुरुषजनिता ननौ गौं गः Nr, Pa. ४३. ७ ननरलगयुतेह चन्द्रिका Bb, Wg. (See 3. 41.) ४३. ८ अनवसिता न्यौ भ्गौ गु षडन्ते Nr, Pa. ४३. ९ भवति नो रौ कामदा लगौ Va. ४३. १० (A) मौक्तिकमाला यदि भतनाद्गौ Bb, Jn, Nr, Pa, Pb, Rm, Sm (b), Ss, Su (a, b), Wb, Wc, Wg; -भतनगगाश्चेत् Ba; (B) सान्द्र(भद्र० Wb)पदं भ्तौ नगगुरुभिश्च Ss, Wb. ४३. ११ सान्द्रपदं भ्तौ नगलघुभिश्च Ba, Bb, Jn (T), Pa, Su (a b), Va. (- स्याद् भतनलगैश्च Ba.). ४३. १२ मः सो जो गुरुयुग्ममेकरूपम् Rm (- युग्मं चैकरूपम् Wrongly Wb). ४३. १३ उपचित्रमिदं ससला लगौ Nr, Pa, Va.

---

37. श्रा (for श्रीः) Rm, Wg; बाणरसैः स्यात् ... ... श्रीः Nr, Pa; बाणरसैः श्रीभै ... श्च Wc. 38. रान्नराविह० Bb, Br, Nr, Pa, Pb, Rm, Sk, Ss. 40. वृत्ता (for वृन्ता) Ba, Bb, Br, Pa, Pb, Rm, Sm, Ss, Wa, Wc, Wg (the last three and Rm notice पृथ्वी as another name). 41. सु for च Rm, Wc, Wg. - लगयुतेह चन्द्रिका Bb, Wg, (also Rm). 42. वैतिका (for श्येनिका) Rm, Wg. 44. - निगदन्ति र० Br, Nr, Wa. 47. प्रमितम् Rm; प्रचितम् Su (b); प्रथितम् Su (a) (for प्रथितम्). 49. मुनिशरविरतिर्नौ० Nr, Pa, Pb, Va. 50. - नौ च रौ Br, Nr.

विचित्रा ॥ ५१ ॥ रसैर्जैसजसा जलोद्धतगतिः ॥ ५२ ॥ भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः ॥ ५३ ॥ रैश्चतुर्भिर्युता स्रग्विणी संमता ॥ ५४ ॥ भुवि भवेन्नभजरैः प्रियंवदा ॥ ५५ ॥ त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः ॥ ५६ ॥ धीरैरभाणि ललिता तभौ जरौ ॥ ५७ ॥ प्रमिताक्षरा सजससैरुदिता ॥ ५८ ॥ ननभरसहितामिहितोज्ज्वला ॥ ५९ ॥ पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ ॥ ६० ॥ अब्ध्यङ्कैः स्याज्जलधरमाला म्भौ स्मौ ॥ ६१ ॥ इह नवमालिनी नजभरौ भ्यौ ॥ ६२ ॥ भवति नजावथ मालती जरौ ॥ ६३ ॥ इति वद तामरसं नजजाद्यः* ॥ ६४ ॥ तुरगरस-

---

* ६४. १ चतुर्जगणं वद मौक्तिकदाम Ba, Bb, Jn (T), Nr (T), Ss (T), Su (b), Vs, Wb; जजाविह मौक्तिकदाम जजौ चेत् (v. l.) Ba, Bb, Jn, Sk. ६४. २ (A) जतौ जरौ शुद्धविराडिदं मतम् Jn, Vs; (B) मनीषिणः केऽपि वसन्तमञ्जरी Ba. (See वंशस्थ ३. ४५). ६४. ३ जभौ जरौ वदति पञ्चचामरम् Nr (T), Pa. ६४. ४ (A) जरौ जरौ वदन्ति पञ्चचामरम् Ba, Bb, Jn (T), Sk, Sm (T), Su (b), Vs, Wb; (B) विभावरी तु सा जरौ जरौ यतः Wb; (C) जरौ जरौ मतं वसन्तचामरम् Jn, Pa. ६४. ५ त्यौ त्याविति (विह Ba) निर्दिष्टा पुष्पविचित्रा Ba, Bb, Pa, Sm (T), Wb. ६४. ६ (A) भवति ततिर्नजजै रसंयुतैः Pa, Vs, Wb; (B) वरतनुरत्र नजौ जरौ भवेत् Ba. ६४. ७ ललितमभिहितं नौ म्रौ नामतः Ba, Br (T), Nr, Pa, Pb, Wa. ६४. ८ नयुगरयुगलं च गौरी मता Nr; Pa; नयुगरयुगयुक्च गौरी मता Ba, Br (T), Pb, Wa. See 3. 60. ६४. ९ स्वरशरविरतिर्ननौ रौ प्रभा Ba, Bb, Br, Jn (T), Nr (T), Pa, Rm, Sk, Sm (T), Ss (T), Su (b), Vs, Wb, Wg. ६४. १० द्रुतपदं नभजयैः कलितं स्यात् Ss. ६४. ११ द्रुतपदं भवति नभनयाश्चेत् Nr. Pa; द्रुतपदं [-ह्रुतपदं- Br] नभनयरचितं स्यात् Ba, Br (T), Ss, Wa. ६४. १२ पञ्चमुनी म्भौ सास्युता ललना Ba, Br (T- ललिता), Nr, Pa, Pb, Wa.

---

57. dropped by Vs. 59. - महितोज्ज्वला Br, Nr, Pa, Pb Wa, Wc. 61. अब्ध्यङ्काभिर्जल० Br, Nr, Rm, Pa, Pb, Wa, Wc; अब्ध्यंशैः सज्जल० Rm (v. l.). 62. - नवमालिका० Wa; - वनमालिका० Wr. -नवमालिका नजभयैः स्यात् Br, Nr, Pa, Pb. 63. मालिनी (for मालती) Wg; dropped by Br. 64. इह (for इति) Ba, Jn, Sm, Wc. अभिनवता० Br, Nr, Pa, Pb, Wa, Wb; dropped by Vs.

यतिर्नौ ततौ गः क्षमा ॥ ६५ ॥ म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षणीयम् ॥ ६६ ॥ चतुर्ग्रहैरिह रुचिरा जभौ स्जगाः ॥ ६७ ॥ वेदै रन्ध्रैर्म्तौ यसगा मत्तमयूरम् ॥ ६८॥ सजसा जगौ भवति मञ्जुभाषिणी ॥ ६९ ॥ ननतरगुरुभिश्चन्द्रिकाश्वषड्भिः* ॥ ७० ॥ म्तौ न्सौ गावक्षग्रहविरतिरसंबाधा ॥ ७१ ॥ ननरसलघुगैः स्वरैरपराजिता ॥ ७२ ॥ ननभनलगिति प्रहरणकलिता ॥ ७३ ॥ उक्ता वसन्ततिलका तभजा जगौ गः

---

* ७०. १ जतौ सजौ गो भवति मञ्जुवादिनी [Wb]; -मञ्जुहासिनी [Ba, Jn, Vs]; -मञ्जुभाषिणी [Bb]; -मन्दभाषिणी [Pa, Su (b), Wc.] ७०. २ उपस्थितमिदं ज्सौ त्सौ सगुरुकं चेत् [Bb, Nr, Wb]; -त्सौ यदि गुरुः स्यात् [Ba, Jn, Su (b), Vs.] ७०. ३ वेदैर्ग्रहैस्तभरा जगौ प्रभावती [Wb.] ७०. ४ वेदग्रहैस्तत (r. भ)-सजगाः प्रभावती [Su (b).] ७०. ५ भवति मृगेन्द्रमुखं नजौ जरौ गः [Ba.] ७०. ६ कुटिल (कुटज [Jn]) गतिर्नजौ सतभिस्तौ गुना (गुरुः [Ba]) [Ba, Jn, Ss, Vs.] ७०. ७ ननततगुरुभिश्चन्द्रिकाश्वर्तुभिः [Bb, Jn, Nr, Pb, Sk, Sm, Vs, Wc.] ७०. ८ भवति भुवि ननसरैर्गेन गौरी [Wb.] ७०. ९ ऋतुमुनियतिर्विद्युन्नसौ तौ गुरुः [Nr, Pa.] ७०. १० नसरयुगैश्चन्द्रलेखर्तुलोकैः [Nr, Pa, Wc.] ७०. ११ यमौ रौ विख्याता चञ्चरीकावली गः [Ba, Br (T), Nr, Pb, Rm, Wg.] ७०. १२ सजसा जगौ यदि तदा सुनन्दिनी [Su (b).] ७०. १३ (a) इह नन्दिनी सजससैर्गुरुयुक्तैः [Ba, Wb]; नवन° [Ss, Vs]; ननु न° [Jn.] (b) सजसा भवेदिह सगौ कुटजाख्यम् [Jn, Ss, Su (b), Vs.]

---

66. प्रहर्षिणीयम् Ba, Bb, Jn, Nr, Pa, Sk, Sm (b), Wa, Wc, Wg. 67. अति Nr, Pa, Wa Wc; इति Br, Pb (for इह). -जभस्जगाः Br, Nr. -जभौ सजौग् Bb, Sm (a). -रतिरुचिराम्बुधिग्रहैः Pa. 70 - चतुर्भिः (for श्वषड्भिः) Ba, Br, Ss, Su(b), Wa, Wb. Dropped in Pa. 73. लघुगैः(for लगिति) Br, Nr. कलिका (for कलिता) Ba, Bb, Rm, Su (b), Vs, Wc, Wg.

॥७४॥ सिंहोद्धतेयमुदिता मुनिकश्यपेन* ॥ ७५ ॥ इन्दुवदना भजसनैः सगुरुयुग्मैः ॥ ७६ ॥ द्विः सप्तच्छिदलोला म्सौ म्भौ गौ चरणे चेत्* ॥७७॥ द्विहतहयलघुरथ गिति शशिकला ॥ ७८ ॥ स्रगिति भवति रसनवकयतिरियम् ॥ ७९ ॥ वसुहययतिरिह मणिगुणनिकरः ॥ ८० ॥ ननमयययुतेयं मालिनी भोगिलोकैः ॥ ८१ ॥ भवति नजौ भजौ रसहितौ प्रभद्रकम् ॥ ८२ ॥ सजना नयौ शरदशकविरतिरेला ॥ ८३ ॥ म्रौ म्यौ यान्तौ

* ७५. १ उद्धर्षिणीति कविराजवसुन्धरेण Su; -णीयमुदिता मुनि- (किल Bb, Jn,) सैतवेन Bb, Br, Jn, Nr, Pa, Pb, Sm (b), Vs, Wa; . णीति गदिता किल सैतवेन Ba. ७५. २ गोमानसेन गदिता (कथिता Su (a)) मधुमाधवीति Pa, Sm (b), Su (a); गोमेन सैव गदि॰ Su (c); गोमेन सेन गदि॰ Bb, Su (b); सोमेन सैव गदि॰ Wb; नागेन सैव गदि॰ Ba, Jn; गर्गेण सैव भणिता॰ Vs; नागेन सेयमुदि॰ Br; रामेण सेयमुदि॰ Wa. ७५. ३ कर्णोत्पलेति गदिता कविसुन्दरेण Pa; Sm (b). ७५. ४ शोभावतीयमुदिता भुजगाधिपेन Pb.

* ७७. १ युगादिभिः कुटिलमिति मतं म्भौ न्यौ गौ Jn (T), Vs. ७७. २ ननतजगुरुगैः सप्तयतिर्नंदी स्यात् Nr, Pa. ७७. ३ नजभजगैर्गुरुश्च वसुषट् कुमारी Nr, Pa, Pb. ७७. ४ (a) नजभजलगयुता धृतिरियं कथिता Ba, Jn (T), Su (b), Vs. (b) नजभजला गुरुश्च भवति प्रमदा Nr, Pa. ७७. ५ त्रिननगगिति वसुयति सुपवित्रम् Nr, Pa. ७७. ६ नरनरैर्लगौ च रचितं सुकेसरम् Nr, Pa, Pb. ७७. ७ (a) म्भौ न्यौ गौ चेज्जलधि दश च हंसश्येनी Jn (T), Vs. (b) वेदे चाब्जे कुटिलमिह मभौ न्यौ गौ चेत् Pb. (c) मध्यक्षामा युगदशविरामा म्भौ न्यौ गौ Nr, Pa. ७७. ८ म्भौ न्यौ लगौ चेद्भवति जगति चन्द्रौरसः Jn (T), Vs. ७७. ९ लक्ष्मीरन्तविरामा म्सौ तभौ गुरुयुग्मम् Nr, Pa. ७७. १० सजसेन चैव यलगेन पथ्या मता Ba. ७७. ११ (a) सजसा यलगाश्च वसुधा सप्तग्रहैः Ba, Bb, Jn (T); (b) सजसयलगैरिषुखगैश्च पथ्या मता Vs; (c) सजसा यलौ गिति शरग्रहैर्मञ्जरी Nr, Pa. ७७. १२ युगादिभिः कुटिलमिति मतं म्भौ न्यौ गौ Ba.

75 सिंहोन्नते॰ Nr, Rm, Pa, Sm (b), Su (b), Vs, Wo; सिंहान्नतं Br; सिंहोद्धतं Pb, Wa, Wb. ति मुदिता॰ Rm; तदुदिता॰ Wb. तदुदितं॰ Br, Pb, Wa. -काश्यपेन Ba, Bb, Br, Jn, Nr, Pb, Rm, Sk, Sm, Ss, Wa, Wb, Wg. 77 स्यात् (for चेत्) Wb. 80. मुनि (for हय) and -मणिगणकिरणः Rm. 83. -दशयतिरियमेला Br, Nr, Pa, Wa; . दशयतिरतिरेखा (लेखा Wo) Rm, Wo, Wg; -नयौ च शरदशयतिरिहैला Ba.

भवेतां सप्ताष्टकैश्चन्द्रलेखा॥ ॥ ८४ ॥ भ्रत्रिनगैः स्वरात्खमृषभगजवि-लसितम् ॥ ८५ ॥ नजभजरैः सदा भवति वाणिनी गयुक्तैः॥ ॥ ८६ ॥ रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ॥ ८७ ॥ जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ॥ ८८ ॥ दिङ्मुनि वंशपत्रपतितं भरनभनलगैः ॥ ८९ ॥ रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा ॥ ९० ॥ मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेत् ॥९१॥ यदि भवतो

---

* ८४. १ छन्दो भवत्तभजजै रयुनैर्मृदङ्गकम् Bb, Wb. ८४. २ नजभजरै-र्विराजितमिदं सुकेसरम् Ba, Bb, Nr, Pa, Su (a, b), Wb. ८४. ३ ननतभरकृताङ्गैः (कृताष्ट Bb) स्वरैरुपमालिनी Bb, Pa, Nr. ८४. ४ मा बाणा यस्यां सा कामक्रीडासंज्ञा ज्ञातव्या Ba, Bb, Jn (T), Sk, Ss (T), Su (b), Wb; मा बाणाः स्युर्यस्यां सा कामक्रीडासंज्ञा ज्ञेया (सुज्ञातव्या Pa; संज्ञातव्या Vs.) Nr, Pa Vs; कामक्रीडा छन्दो जातं कृत्वा माभ्यां मम्मैर्वा Su (b, v. l.). ८४. ५ राजभद्वितयरैरुदितं रमणीयकम् Ba, Jn (T), Su(b), Vs. ८४. ६ चन्द्रकान्ताभिधा रौ म्यौ यो विरामः स्वराष्टौ Ba, Bb, Jn (T), Vs; चन्द्रलेखाभिधा० Nr. ८४. ७ चन्द्रलेखाभिधानं भवेत्पञ्चभी रैः स्फुटम् Pa, Wb. ८४. ८ भवतः सजौ ससयुता वृषभस्ततो यः Jn (T), Vs. ८४. ९ सगणैः शिववक्त्रमितैः कथिता (गदिता Ba) नलिनी Ba, Su (b).

* ८६. १ जरौ जरौ ततो जगौ च पञ्चचामरं वदेत् Nr; जरौ जरौ जगा-विदं वदन्ति पञ्चचामरम् Bb, Vs, Wb; लघुर्गुरुर्निरन्तरं (रौ Jn) यदा स (यदीह Pa) पञ्चचामरः (०रम् Pa, Wa) Ba, Jn, Pa, Pb, Wa. ८६. २ नजरभभेन गेन च स्यान्मणिकल्पलता Ba, Jn, Vs. ८६. ३ संकथिता भरौ नरनगाश्च धीरललिता Nr, Pa. ८६. ४ पञ्चभकारयुताश्चगतिर्यदि चान्त्यगुरुः Nr;- यता खगतिर्यदि चान्तगुरुः Pb, Wa; - कृताश्च(स्व Wb)गतिर्यदि चा (वा Jn)-न्तगुरुः Ba, Jn, Pa, Vs, Wb; -कृताश्च...गदितान्तगुरुः Bb. ८६. ५ चित्रसंज्ञ-मीरितं रजौ रजौ रगौ च वृत्तम् Nr, Pa.

---

84. - सप्ताष्टभिश्च० Ba, Br, Nr, Rm, Sm, Su (b), Wa, Wb, Wc, Wg. 85. भ्रौ त्रिनगाः स्वरात् (स्वराः Rm) खम्० Br, Pb, Rm. 86. तदा (for सदा) Vs. नजभजैः०-गान्वितैः Rm, Wg.

नजौ भजजला गुरु नर्कुटकम् ॥ ९२ ॥ मुनिगुहकार्णवैः कृतयतिं वद कोकिलकम्* ॥९३। स्याद्भूतर्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यौ*

* ९३. १ समदविलासिनी नजभजैर्भ्लगैरिनशरैः [Bb.] * ९३. २ रसयुगहययुङ् (कैर् [Pb]) नौ म्रौ सो लगौ (स्लौ सगौ [Pb]) हि यदा हरिः [Nr, Pb.] ९३. ३ नजभजेषु गौ यदि वदन्ति च वाणिनीं ताम् [Wb.] ९३. ४ भवेत्कान्ता युगरसहयैर्यभौ नरसा लगौ [Nr.] ९३. ५ ससजैरतिशायिनी मता (भवेत् [Pa, Wb]) भजपरैर्गुरुभ्याम् [Ba, Jn (T), Pa, Wb.] ९३. ६ (a) ससजा भजगा गु दिकस्वरैर्भवति चित्रलेखा [Nr, Pa;] (b) ससजा भजगा गुरुश्च सप्तविरतिर्द्रुता स्यात् [Vs.]

* ९४. १ भवति नयुगलं रभौ रौ दशाभिर्गिरीन्द्रैर्लता [Su (b); -] भिर्गजेन्द्रैर्लता [Ba.] ९४. २ (a) इह ननरचतुष्कमिष्टं तु नाराचमाचक्षते [Wb;] (b) यदिह (च [Ba]) नयुगलं ततो वेदरैर्महामालिका [Ba, Br (T), Nr, Pa, Pb, Wa;] (c) कथितमिह ननौ रौ चेद्ररौ सिंहविक्रीडितम् [Rm, Wg.] ९४. ३ दशवसुविरतिर्ननौ रैश्चतुर्भिर्युता लालसा [Jn, (T), Pa, Su (b), Vs, Wb; -] लालसी [Ba; -] सालसा [Bb.] ९४. ४ (a) अधिकदशयतिर्ननौ रौ भवेतां रगौ तारका [Ba, Jn (T);] (b) त्रियुतदशशरच्छिदुक्ता ननौ रौ ततो रौ निशा [Su (b);] (c) अधिकदशयतिर्ननौ रौ ररौ।च प्रिया [Wb;] दशशिखिशरभुविरामा ननौ रौ ररौ च प्रिया [Pa.] ९४. ५ पञ्चभकारकृताश्वगतिर्यदि चान्तसरचिता [Nr; -] न्तसनिरता [Br (T), Pb, Wa.] ९४. ६ भाद्रनना नसौ भ्रमरपदकमिदमभिहितम् [Nr, Pa.] ९४. ७ वर्णाश्वैर्मननततमकः कीर्तिता चित्रलेखेयम् [Nr, Pa.] ९४. ८ म्भौ न्जौ भ्रौ चेच्चलमिदमुदितं युगैर्मुनिभिः स्वरैः [Nr; Pa.] ९४. ९ अर्थाश्वाश्वैर्मभनयरयुगैर्वृत्तं मतं केशरम् [Nr.] ९४. १० मात्सो जौ भरसंयुतौ करिबाणकैः (स्वैः [Ba])र्हरिणप्लुतम् [Ba, Br (T), Nr, Pa, Pb, Wa; -] कैर्हरनर्तकम् [Wg] (See below No. 14). ९४. ११ शार्दूलं वद मासषट्कयति मः सो जसौ रो भश्चेत् [Nr.] ९४. १२ सुधा तर्कैस्तर्कैर्भवति ऋतुभिर्यो मो नससता: [Ba, Nr, Wc.] ९४. १३ स्याद् (तत् [Ba]) भूतर्त्वश्वैर्मौ भ्मौ विरतिश्चेत् सिंहविस्फूर्जितं यौ [Ba, Jn (T), Su (b), Vs.]

92. लघु (for गुरु) Ba, Wa. हयदश° भनजौ° Nr, Pa, Pb, Wa, Wg; हयदश° गुरु तत्कुटकम् Rm, Wg. 93. -कृतयति वद° Nr, Pa, Pb, Wc; -कृतयनिर्वद° Wa; -कृतयतिर्वनको° Wg. 94. स्याद्ब्राणर्त्वश्वैः° Su (ac). †8 letters missing.

॥ ९४ ॥ रसर्त्वश्वैर्म्सौ म्सौ ररगुरुयुता मेघविस्फूर्जिता स्यात् ॥ ९५ ॥ सूर्याश्वैर्मसजाः सतताः सगुरवः शार्दूलविक्रीडितम्* ॥ ९६ ॥ ज्ञेया सप्ताश्वषड्भिर्मरभनययुता भ्लौ गः सुवदना ॥ ९७ ॥ त्री रजौ गलौ भवेदिहेदृशेन लक्षणेन वृत्तनाम* ॥ ९८ ॥ म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्* ॥ ९९ ॥ भ्रौ नरना रनावथ गुरुर्दिग-

---

९४. १४ सौं जजौ मरसंयुतौ करिबाणकै(खै [Ba.])र्हरनर्तकम् [Ba, Rm]; - बाणखं हरनर्तकम् [Jn (T).] ९४. १५ सौं जया भरसंयुताष्टनुबाणाश्वैर्रक्तनम् [Bb.]

* ९६. १ गजाब्धितुरगैर्जसौ जमतभा गश्चेत्समुद्रतता [Nr.] ९६. २ नजभयसा जगौ च रचना शूलिककुब्भिरत्र सा [Jn (T), Su (b)]; ९६. ३ नजभयभा जगौ च रचना मुन्यर्कयतिरत्र सा [Ba.] ९६. ४ नयुगललगुरु निरन्तरं यदा स पञ्चचामरः [Nr, pb, Wa]; नयुगलगर्लघुर्निर० [Br]; नयुगगुरुलघुर्नि० [Wr.] ९६. ५ वृत्तं बिम्बाख्य शरमुनितुरगैर्म्तौ न्सौ ततौ चेद्गुरुः [Nr.] ९६. ६ भूताश्वाश्वान्तं मतनसररगैः कीर्तितं पुष्पदाम [Nr.] ९६. ७ इनाश्वैर्या यभनयजजगाः कीर्तिता मणिमञ्जरी [Nr.] ९६. ८ रसैः षड्भिर्लोकैर्यमनसजजा गुरुर्मकरन्दिका [Nr, Pa.] ९६. ९ इयं छाया ख्याता ऋतुरसहयैर्यो मनसा भ्तौ गुरुः [Nr.] ९६ १० भौं जलौ तौ सगुरुकौ यदा दिग्ग्रहच्छेदभाग्वल्लरी [Ba, Su (b)]; - यदा दिग्ग्रहच्छेदभाग्० [Ju (T).]

* ९८. १ ख्याता पूर्वैः सुवंशा यदि मरभनास्तद्वयं गो गुरुश्च [Ba, Jn (T); Su (b)] ९८. २ रसैरश्वैरश्वैर्यमननततगैर्गेन शोभेयमुक्ता [Nr, Pa.] ९८ ३ सजजा भरौ सलगाश्च चेदुदितं तदा प्रमदाननम् [Rm, Wg.] ९८. ४ समरा न्म्या लगिति त्रयोदशयतिर्मत्तेभविक्रीडितम् [Wg]; समरान्मौ यलगाश्च० [(Rm v. l.)] समरा नम्लगिति० [Rm.]

* ९९. १ [(a)] भवति नजौ हि खिद्धिगिति भाजजजा यदि गे भवेदितः (दिह [Ba])[Ba, Jn (T), Pa]; [(b)] सलिलनिधिर्भवेदिह नजौ भगणो जगणास्त्रयश्च रः [Nr.] ९९. २ नजभजजाजरौ हरहरिद्धिरतिः खलु पंचकावली [Va.] ९९. ३ मौ भभमाश्च भरौ यदि कीर्तय पुत्रक मत्तविलासिनीम् [Rm, Wg.]

---

95. युनो (for युता) Rm. Dropped by Nr and Va. 96. मसजसतता: Br, Jn, Nr, Pb, Sk, Sm, Sa, Su (c), Va. 97. युतौ (for युता) Rm. Dropped by Va.

कविरमं हि मद्रकमिदम्* ॥ १०० ॥ यदिह नजौ भजौ भजभलगास्त- दाश्वललितं हरार्कयतिमत् ॥ १०१ ॥ मत्ताक्रीडं मौ त्नौ नौ न्लौ गिति भवति वसुशरदशयतियुतम्* ॥ १०२ ॥ भूतमुनीनैर्यतिरिह भतनाः स्भौ भनयाश्च यदि भवति तन्वी ॥ १०३ ॥ क्रौञ्चपदा भ्मौ स्भौ ननन- न्गा इषुशरवसुमुनिविरतिरिह भवेत् ॥१०४॥ वस्वीशाश्वच्छेदोपेतं ममत- नयुगनरसलगैर्भुजङ्गविजृम्भितम् ॥ १०५ ॥ मो नाः षट् सगगिति यदि नवरसरसशरयतियुतमपवाहाख्यम्* ॥१०६॥ यदिह नयुगलं ततः सप्त रेफास्तदा चण्डवृष्टिप्रयातो भवेद्दण्डकः ॥१०७॥ प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्यालजीमूतलीलाकरोद्दामशङ्खादयः ॥१०८॥ प्रचितकसम- भिधो धीरधीभिः स्मृतो दण्डको नद्वयादुत्तरैः सप्तभिर्यैः ॥ १०९ ॥

॥ इति भट्टकेदारविरचिते वृत्तरत्नाकराख्ये छन्दसि मात्रावृत्तवर्णनो नाम तृतीयोऽध्यायः ॥ ३ ॥ [ग्रं० श्लो० ४५]

---

* १००. १ सप्तभकारकृतावसितौ सगुरुः कविभिः कथिता मदिरा [Nr, Pa]; सप्तभिरेव भकारगणैर्गुरुणा सहिता कथिता मदिरा [Vs]. १००. २ लालित्यं भुजगेन्द्रेण भाषितमेतच्चन्मभरस्तजनगुरुः [Jn (T), Su (b)]. १००. ३ लालित्यं भुजगेन्द्रभाषितमेतच्चन्मसजरभभनगुरुभिः [Ba]. १००. ४ सजता नसौ रसौ गः फणितुरगहयैः (युगैः [Bb]) स्यान्महास्रग्धराख्या [Ba, Bb, Jn (T), Su (b)].

* १०२. १ भैरथ सप्तभिरत्र कृता गुरुणा गुरुणा च मयुरगतिः स्यात् [Rm, Wg].

* १०६. १ म्यो न्तौ नो रसौ लगौ यदि च आहुर्वसुमदनदहनर्षिभिर्भुजगे- रितं [Ss]. १०६. २ म्यो न्यौ ([r.] न्तौ) नौ रयौ लगौ ([r.] ल्गौ) यदि० भुजंगेरितं [Wb]. १०६. ३ यत्किञ्चिद्दृश्यते छन्दः षड्विंशत्यधिकाक्षरम् । शेषजात्यादिकं मुक्त्वा तत्सर्वं दण्डकानिह ॥ [Jn (T)]. Jn introduces this verse as the सामान्यलक्षण of दण्डक.

* १०९. १ नद्वयात्परतस्तकारेणापि क्वचिद्दण्डका दृश्यन्ते [Rm]. १०९. २ एवमेकोनसहस्राक्षरवृद्धिर्भवति दण्डकं वृत्तम् [Rm].

---

100. भद्रक (for मद्रकं) Br, Jn, Nr, Pa, Pb, Sk, Sm, Ss, Su (a, b); प्रभद्रकं (for हि मद्रकं) Rm, Ss, Va. 101. - भजौ भजभल्गा तदा० Rm; तदश्व (for तदाश्व) Br, Nr. 102. मत्ताक्रीडा० युतं Br, Nr, Pa, Pb, Rm, Vs, Wa. We, Wg. - त्नौ नौ नस्गिति० Br, Nr, Rm. 104. - ननना न्गाविषु० Br, Nr, Pa, Pb, Rm, Ss; - नननन्गाविषु० Ba, Vs; - नचतुष्कं गयुतमिषुवसु० Ba; (- नचतुष्कं गुरु च शरविषयवसुमु- निविरतिः v. l. noted by Jn).

॥ चतुर्थोऽध्यायः ॥

विषमे यदि सौ सलगा दले
भौ युजि भाद्गुरुकावुपचित्रम् * ॥ १ ॥
भत्रयमोजगतं गुरुणी चेद्
युजि च नजौ ज्यगुतौ द्रुतमध्या ॥ २ ॥
सयुगात्सगुरू विषमे चेद्
भाविह वेगवती युजि भाद्गौ ॥ ३ ॥
ओजे तपरौ जरौ गुरुश्चेन्
म्सौ ज्गौग् भद्रविराड् भवेदनोजे ॥ ४ ॥
असमे सजौ सगुरुयुक्तौ
केतुमती समे भरनगाद्गः * ॥ ५ ॥
आख्यानिकी तौ जगुरू गमोजे
जतावनोजे जगुरू गुरुश्चेत् ॥ ६ ॥
जतौ जगौ गो विषमे समे स्यात्
तौ ज्गौ ग एषा विपरीतपूर्वा ॥ ७ ॥
सयुगात्सलघू विषमे गुरु—
र्युजि नभौ च भरौ हरिणप्लुता ॥ ८ ॥

---

* १. १ सौं लगौ विषमे यदि । सजजा गुरुर्ललिता समे [Nr, Pa, Va.]

* ५. १ (a) विषमे सगणौ जगौ समे । सभरा लश्च गुरुः शिखामणिः [Sd.] (b) विषमे ससजास्ततो गुरुः । समपादे मुरली सभलगाः [Va.] (c) ससजा विषमे यदा गुरुः । सभराः स्याल्ललिता समे लगौ [Rm.] (d) विषमे यदि सौ जगौ, समे । स्भरला गोऽपरवक्त्रमीरितम् [Ba, Jn.]

---

1. given after 4 in Pb.   2 a. - गुरुकौ चेत् Va.   5 a. विषमे सजौ° Bb, Va. 6. आख्यानकी° ग (गम् Bb, Ss) ओजे Ba, Bb, Br, Nr, Pa, Sd, Sk, Sm, Ss, Va, Wa, Wb, Wc; आख्यातकी° ग ओजे Rm; आख्यातिकी° ग ओजे Wg. 7 a. चेत् (for स्यात्) Nr, Rm, Vs, Wa, Wc.   7 b. - गमेषा° Bb, Ss.   8. b. - नभौ भरकौ° Br, Nr, Va, Wa, Wc.

अयुजि ननरला गुरुः समे
न्जमपरवक्त्रमिदं ततो जरौ* ॥ ९ ॥
अयुजि नयुगरेफतो यकारो
युजि च नजौ जरगाश्च पुष्पिताग्रा* ॥ १० ॥
वदन्त्यपरवक्त्राख्यं वैतालीयं विपश्चितः।
पुष्पिताग्राभिधं केचिदौपच्छन्दसिकं तथा ॥ ११ ॥
स्यादयुग्मके रजौ रजौ समे तु ।
जरौ जरौ गुरुर्यवात्परा मतीयम्* ॥ १२ ॥
॥ इति भट्टकेदारविरचिते वृत्तरत्नाकराख्ये छन्दसि अर्धसमवृत्तवर्णनो नाम चतुर्थोऽध्यायः ॥४॥ [ग्रं० श्लो० ८, अ० २६]

---

* ९. १ (a) ससजाः प्रथमे पदे गुरू चेत् । सभरा येन च मालभारिणी स्यात् [1a]; विषमे ससजा गुरू, अनोजे (पदे गुरू चेत् [Ba]) । सभरा यश्च तु (येन तु [Ba], येन च [Su (a)]) मालभारिणीयम् [Ba, Su (a, c)]; विषमे ससजेन गेन गेना– । विषमे रभयेण तु मालभारिणीयम् [Va.] (b) विषमं ससजा गुरू, समे चेत् । सभरा यश्च वसन्तमालिका सा [Br, Pb, Wa.] (c) विषमे ससजा गुरू, अनोजे । रभरयाश्छन्दसिकं तदौपपूर्वम् [Su (b), Wb.]

* १०. १ अयुजि ननभभाः समकेऽपि तु । नयुगरयुगलं तदा कौमुदी [Nr, Pa.] १०. २ यदि विषमे भवतो नजौ जरौ । सजयाः समे जगुरू मञ्जुसौरभम् [Nr, Pa.] १०. ३ रो जरौ जसयुतौ पदे पदेऽथ । युग्मे तरौ जरौ गुरुर्मृगी यवानी [Nr, Pa.]

* १२. १ ओजे तपरौ भरौ जरौ गुरू समे जौ यौ । कीर्तिता बुधैरियं तु षट्पदाख्या [Nr. Pa.]

---

9 b. तदपर० नजौ जरौ Ba, Jn, Su (a), Va. 12 a. चेत् (for तु) Nr, Wa, Wo; 12. b - गुरुः परा यवान्मतीयम् Va.

॥ पञ्चमोऽध्यायः ॥

मुखपादोऽष्टभिर्वर्णैः ।
परेऽस्मान्मकरालयैः क्रमाद्वृद्धाः ।
सततं यस्य विचित्रैः पादैः संपन्नसौन्दर्यम् ।
तदभिहितममलधीभिः पदचतुरूर्ध्वाभिधं वृत्तम् ॥ १ ॥
प्रथममुदितवृत्ते ।
विरचितविषमचरणभाजि ।
गुरुकयुगलनिधन इह कलित आद्यः ।
विधृतरुचिरपदविततियतिरिह भवति पीडः ॥ २ ॥
प्रथममितरचरणसमुत्थं ।
श्रयति जगति लक्ष्म ।
इतरदितरचरणजनितमपि तुर्यम् ।
चरणयुगलकमविकृतमपरमिति कलिका सा ॥ ३ ॥
द्विगुरुयुतसकलचरणान्ता ।
मुखचरणरचितमनुभवति तृतीयः ।
चरण इह हि लक्ष्म ।
प्रकृतमपरमखिलमपि यदि भवति लवली सा ॥ ४ ॥

---

1 b. स्युर् (for ऽस्मान्) Ba, Br, Wa, Wc. वृद्धः (for वृद्धाः) Br, Nr, Pb. 1 c. -पादैः प्रसन्नसौन्दर्यम् Va. 1 d. तदुदितममलनिभिः पद० Br, Nr, Pb, Wa, Wc. 2 c. सहित (for कलित) Nr, Wa, Wc. गुरुयुगलकनि० Ba, Sm (a). 2 d. रिति for रिह in text Ba, Rm, Ss, Va. लघुविरचितपदविततियतिरिह० (रिति० Pa, Pb) Br, Nr, Pa, Pb, Wa, Wc; विधृतरुचिररचितपदविततियतिरिति पीडः Wg. 3 b. स यदि Nr, Wa; सपदि Wc (for जगति). 3 c. इतरदितरजनितमपि यदि च (तु Wg) तुर्यम् Ba, Jn, Rm, Sk, Sm, Ss, Wb, Wg; गदितं (for जनितं in the last) Br, Nr, Pb, Wa, Wc; सम्यक् (for तुर्यम् in the last) Su (b), Wa, Wc. Su (a) adds यदि च and Su (c) only च before तुर्यम्. 4 b. -णगतमनुभवति च तृतीयः (यम् Wa) Br, Nr, Rm, Wa; -णकगतमनुभवति तृतीयम् Wg. 4 c. च (for हि) Rm, Wg. अपरमिह हि० Nr. 4 d. प्रकृतमखिलमपि यदिदमनुभवति० Br, Wa, Wc; प्रकृतमपरमखिलमिदमपि च भवति कवल्याः Sm, Ss, Wb. प्रकृतमपरमखिलमपि जगति भवति कवल्याः Su (b).

॥ षष्ठोऽध्यायः ॥

पादे सर्वगुरावाद्याल्लघुं न्यस्य गुरोरधः ।
यथोपरि तथा शेषं भूयः कुर्यादमुं विधिम् ॥ १ ॥
ऊने दद्याद् गुरूण्येव यावत्सर्वलघुर्भवेत् ।
प्रस्तारोऽयं समाख्यातश्छन्दोविचितिवेदिभिः ॥ २ ॥
नष्टस्य यो भवेदङ्कस्तस्यार्धेऽर्धे समे च लः ।
विषमे चैकमाधाय तदर्धेऽर्धे गुरुर्भवेत् ॥ ३ ॥
उद्दिष्टं द्विगुणानाद्यादुपर्यङ्कान्समालिखेत् ।
लघुस्था ये च तत्राङ्कास्तैः सैकैर्मिश्रितैर्भवेत् ॥ ४ ॥
वर्णान्वृत्तभवान्सैकानौत्तराधर्यतः स्थितान् ।
एकादिक्रमशश्चैतानुपर्युपरि निक्षिपेत् ॥ ५ ॥
उपान्त्यतो निवर्तेत त्यजन्नेकैकमूर्ध्वतः ।
उपर्याद्याद् गुरोरेवमेकद्व्यादिलघुक्रिया ॥ ६ ॥
लघुक्रियाङ्कसंदोहे भवेत्संख्या विमिश्रिते ।
उद्दिष्टाङ्कसमाहारः सैको वा जनयेदिमाम् ॥ ७ ॥
संख्यैव द्विगुणैकोना सद्भिरध्वा प्रकीर्तितः ।
वृत्तस्याङ्गुलिकीं व्याप्तिमधः कुर्यात्तथाङ्गुलम् ॥ ८ ॥

---

१. १ प्रस्तारो नष्टमुद्दिष्टमेकद्व्यादिलगक्रिया । संख्यानमध्वयोगश्च षडेते प्रत्यया: स्मृता: ॥ Bb, Br, Nr, Pa, Pb, Rm, Vs. Ba and Jn give it after v. 8; the latter calls it a संग्रहश्लोक Su mss. contain it but there is no trace of it in Sulhaṇa's *commentary*.

---

2 a. -गुरूनेव Bb, Br, Nr, Pa, Pb, Rm, Vs, Su (a); -गुरूनवं Bb, Ss; -गुरूण्येवं Sk; -गुरुं चैव Sm. 3 c. मादाय (for माधाय) Vs. 3 d. स्यादर्धेऽर्धे° Nr; तस्यार्धेऽर्धे° Ba, Pa, Rm. 4 ab. -नङ्कानुपर्याद्यात्° Rm. 4 c. तु (for च in the text) Ss, Vs. लघुस्थाने तु येऽङ्का: स्यु: Rm; लघुस्थास्तत्र ये चाङ्का Ba. 5 c. क्रमत: (for क्रमश:) Nr, Pb. 5 d. विन्यसेत् (for निक्षिपेत्) Pb. 6 b. त्यजेत् (for त्यजन्) Sm, Ss. 6 d. -लगक्रिया Ba, Bb, Nr, Pa, Rm, Vs; लघुक्रिया Sk, Su (a). 7 a. लगक्रिया° Ba, Bb Nr, Pa, Rm, Vs; लघु° Sk. 8 c. -लिकी व्याप्तिरध: Nr, Pa, Rm. 8 d. -तथांगुलिम् Nr, Pa, Rm, Vs.

वंशेऽभूत्कश्यपस्य प्रकटगुणगणः शैवसिद्धान्तवेत्ता ।
विप्रः पव्येकनामा विमलतरमतिः शैवतत्त्वावबोधे ॥
केदारस्तस्य सूनुः शिवचरणयुगाराधनैकाग्रचित्त-
श्छन्दस्तेनाभिरामं प्रविरचितमिदं वृत्तरत्नाकराख्यम् ॥ ९ ॥
॥ इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकराख्ये छन्दसि
षट्प्रत्ययवर्णनो नाम षष्ठोऽध्यायः ॥ ६ ॥ [ग्रं० श्लो० १० अ० २०]
सर्वग्रन्थाग्रम्– २१+३२. ८ + ४५ + ८. २६ + १९ + १०. २०
= श्लो० १३६ अ० २२.

---

9 a. . काश्य० Ba.　　9 b. - वेदतत्त्वावबोधे (धी Jn, Ss; धे: Bs) Ba, Jn, Sd, Sk, Sm, Ss, Ve; वेदतत्त्वार्थबोधे (ध: Bb) Bb, Nr, Pa; वेदशास्त्रार्थवेत्ता Pb; वेदशास्त्रावबोधी Rm.

अथ हेमचन्द्राचार्यकृतं छन्दोऽनुशासनम् ।

(Adhyayas IV-VII of this work are separately Published at Journal BBRAS. 1943, 1944, together with the author's Tīkā and an Avacuri. Here, I give a brief commentary on Adhyayas I-III only.)

प्रथमोऽध्यायः ।

वाचं ध्यात्वाऽऽर्हतीं सिद्ध-शब्दकाव्यानुशासनः ।

काव्योपयोगिनां वक्ष्ये छन्दसामनुशासनम् ॥ १ ॥

सर्वादिमध्यान्तग्लौ त्रिकौ म्नौ भ्यौ ज्सौ स्तौ वर्णगणाः ॥ १ ॥ द्वित्रिचतुष्पञ्चषट्कला दतचपषा द्वित्रिपञ्चाष्टत्रयोदशभेदा मात्रागणाः ॥२॥ समानेनैकादि. ॥३॥ ह्रस्वो लजुः ॥४॥ वान्ते ग्वक्रः ॥ ५ ॥ ≍क)(पविसर्गानुस्वारव्यञ्जनाह्रादिसंयोगे ॥६॥ दीर्घप्लुतौ ॥ ७ ॥ स द्विमात्रः ॥८॥ एदोतौ पदान्ते प्राकृते ह्रस्वौ वा ॥९॥ तुर्योऽशः पादोऽविशेषे ॥१०॥ वृत्तम् ॥११॥ समैः पादैः समम् ॥१२॥ समार्धे-मर्धसमम् ॥ १३ ॥ अन्यद्विषमम् ॥ १४ ॥ श्रव्यो विरामो यतिः ॥ १५ ॥ स्यादिर्गादिः ॥ १६ ॥

इत्याचार्यश्रीहेमचन्द्रानुस्मृते छन्दोऽनुशासने संज्ञाध्यायः प्रथमः ॥

द्वितीयोऽध्यायः ।

छन्दः ॥१॥ पादः ॥२॥ एकाक्षरोक्ता जातिः ॥३॥ अत्युक्ता-मध्या-प्रतिष्ठा-सुप्रतिष्ठा-गायत्री-उष्णिग्-अनुष्टुब्-बृहती-पङ्क्तिस्-त्रिष्टुब्- जगती- अतिजगती- शक्वरी- अतिशक्वरी- अष्टि-अत्यष्टि- धृति- अतिधृतय एकैकवृद्धाः ॥४॥ कृतिः प्राविसमभ्युदश्च

ग्लौ मादयो दादयश्च समानेन लक्षिता एकादिसङ्ख्या भवन्ति । यावतिथः समानस्तावतिथा गादयोऽपि गृह्यन्ते । ग १ गा २ गि ३ गी ४ गु ५ गू ६ गृ ७ गॄ ८ ग्लृ ९ ग्लॄ १० । एवं लादयोऽपि ॥ ३ ॥ ह्रादिवर्जिते संयोगे च परे ह्रस्वोऽपि गो भवति वक्रश्च । अह्रादीति समस्तव्यस्तसंग्रहात् ह्रसंयोगे ह्रसंयोगे रसंयोगे च न गुरुः ॥ ६ ॥ सा च (यतिः) तृतीयान्तेषु गघादिनिर्देशेषु प्रतिष्ठते । गाद्यवच्छिन्नैरक्षरैर्यतिः क्रियते इत्ययमर्थः सिध्यति ॥ १५ ॥ त्रिचतुरादिः संख्या क्रमेण गघङादिसंज्ञा ॥ १६ ॥

१ कृतिः प्राङ्विसमभ्युदश्च कृतिः P.

॥५॥ उक्तायां । गः श्रीः ॥६॥ अत्युक्तायां । गौ स्त्री ॥७॥ लौ मदः ॥८॥ ग्लौ दुःखम् ॥९॥ ल्गौ सुखम् ॥१०॥ २/४ ॥ मध्यायां । मो नारी ॥११॥ यः केशा ॥१२॥ रो मृगी ॥१३॥ सो मदनः ॥ १४ ॥ ३/४ ॥ प्रतिष्ठायां । म्गौ कन्या ॥१५॥ भ्गौ सुमुखी ॥१६॥ ज्गौ विलासिनी ॥१७॥ गौं समृद्धिः ॥१८॥ न्गौ मृगवधूः ॥१९॥ य्गौ क्रीडा ॥२०॥ स्गौ सुमतिः ॥२१॥ ल्गौ सोमप्रिया ॥२२॥ ४/८ ॥ सुप्रतिष्ठायां । रो गौ प्रीतिः ॥२३॥ र्ल्गौ विदग्धकः ॥२४॥ भो गौ पङ्क्तिः ॥२५॥ भ्लगा रतिः ॥२६॥ जो गौ सती ॥२७॥ त्लगा नन्दा ॥२८॥ य्लगा जया ॥२९॥ म्लगाः सावित्री ॥३०॥ सो गौ घनपङ्क्तिः ॥३१॥ न्लगा अभिमुखी ॥३२॥ ५/१० ॥ गायत्र्यां । मौ सावित्री ॥३३॥ म्रौ तटी ॥३४॥ सौ रमणी ॥३५॥ त्यौ तनुमध्या ॥ ३६ ॥ स्भौ गुरुमध्या ॥३७॥ यौ सोमराजी ॥३८॥ न्यौ शशिवदना ॥३९॥ मौं मालिनी ॥ ४० ॥ भ्यौ कामलतिका ॥ ४१ ॥ म्लौ मुकुलम् ॥४२॥ त्रौ शफरिका ॥४३॥ नौं कच्छपी ॥४४॥ भ्रौ लघुमालिनी ॥४५॥ स्यौ विमला ॥४६॥ त्रौ जला ॥४७॥ म्यौ सुनन्दा ॥४८॥ भ्मौ विक्रान्ता ॥४९॥ स्भौ सूचीमुखी ॥५०॥ य्भौ शिखण्डिनी ॥५१॥ ६/१९ ॥ उष्णिहि । मौ गा गान्धर्वी ॥५२॥ जौं ग उष्णिक् ॥५३॥ भ्सौ गः कुमारललिता ॥५४॥ म्सौ गो मदलेखा ॥५५॥ सौं ग उद्धता ॥५६॥ त्सौ गो भ्रमरमाला ॥५७॥ रौ गो हंसमाला ॥५८॥ भौ गः कालेका ॥५९॥ म्सौ गो विधुवक्त्रा ॥६०॥ म्भौ

स्त्री । पद्ममित्येके ॥ ७ ॥ मदः । पुष्पमिति काश्चित् ॥८॥ केशा । धूरिति भरतः ॥ १२ ॥ मृगी । तडिदिति भरतः ॥ १३ ॥ मदनः । रजनीति भरतः ॥१४॥ सुमुखी । ललितेति भरतः ॥१६॥ विलासिनी । जयेति भरतः ॥ १७ ॥ समृद्धिः । पुण्य(ष्प ?)मिति भरतः ॥१८॥ सुमतिः । भ्रमरीति भरतः ॥२१॥ विदग्धकः । वागुरेति भरतः ॥ २४ ॥ पङ्क्तिः । अक्षरोपपदेत्यन्ये । कुन्तलतन्वीति भरतः ॥ २५ ॥ सती । शिखेति भरतः ॥ २७ ॥ अभिमुखी । मृगचपलेत्यन्यः । कमलमुखीति भरतः ॥ ३२ ॥ रमणी । नलिनीति भरतः ॥ ३५ ॥ शशिवदना । मुकुलितेत्यन्यः । मकरशीर्षेति भरतः ॥ ३९ ॥ मुकुलम् । वीथीति भरतः ॥ ४२ ॥ शफरिका । गिरेति भरतः ॥ ४३ ॥ उष्णिक् । शिखेति भरतः ॥ ५३ ॥ कलिका । सोपानमित्यन्यः । भोगवतीति भरतः ॥ ५९ ॥

गः सरहम् ॥६१॥ म्नौ गश्चित्रम् ॥६२॥ नौ मौ हरिविलसितम् ॥६३॥ म्जौ गः शारदी ॥६४॥ त्लगा मधुकरिका ॥६५॥ स्जौ गौ विमला ॥६६॥ जौ गः सुभद्रा ॥६७॥ म्यौ गः कुमुद्वती ॥६८॥ म्सौ गौ मुदिता ॥६९॥ त्रौ गो मनोज्ञा ॥७०॥ त्सौ गो दीप्ता ॥ ७१ ॥ ७/२० ॥ अनुष्टुभि । त्रौ गौ विभा ॥७२॥ यौं स्माावनुष्टुप् ॥ ७३ ॥ मौर्गौर्विद्युन्माला ॥७४॥ भौ गौ चित्रपदा ॥७५॥ त्रौ स्गौ सुमालती ॥७६॥ भ्तौ ल्गौ माणवकं घैः ॥७७॥ त्रौं ल्गौ नाराचम् ॥७८॥ म्नौ गौ हंसरुतम् ॥७९॥ न्जौ ल्गौ ललितगतिः ॥८०॥ जौं गौ सिंहलेखा ॥८१॥ जौ ल्गौ प्रमाणी ॥८२॥ जौं ग्लौ समानी ॥८३॥ न्सौ गौ गुणलयनी ॥८४॥ सौ ल्गौ मही ॥८५॥ नौ गौ रतिमाला ॥८६॥ अन्यद्वितानम् ॥८७॥ ८/१६ ॥ बृहत्यां । भो मौ वक्त्रं कैः ॥८८॥ नो रौ बृहतिका ॥८९॥ नसा हलमुखी ॥९०॥ नौ मो भुजगशिशुसृता ॥९१॥ भजसा उदयम् ॥९२॥ भौ र उत्सुकम् ॥९३॥ नरा भद्रिका ॥९४॥ नौ र उपच्युतम् ॥९५॥ स्जसा अक्षि ॥९६॥ मः सौ कनकम् ॥९७॥ सौ मस्तारम् ॥९८॥ सिः सौम्या ॥९९॥ तभ्या रुचिरा ॥१००॥ नस्या विशाला ॥१०१॥ तन्मा मकरलता ॥ १०२ ॥ नज्याः शशिलेखा ॥१०३॥ नौ सो लघुमणिगुणनिकरः ॥ १०४ ॥ मभसाः सिंहाक्रान्ता ॥१०५॥ रजाः कामिनी ॥१०६॥ ९/१९ ॥ पङ्क्तौ । मभस्गा मत्ता घैः ॥१०७॥ यैज्गाः पङ्क्तिका ॥१०८॥ मस्जगाः शुद्धविराट् ॥१०९॥ मन्यंगाः पणवो कैः ॥११०॥ रजगा मयूरसारिणी ॥१११॥ नजनगास्त्वरितमतिः ॥११२॥ भ्मसगा रुक्मवती ॥ ११३ ॥

हरिविलसितम् । चपलेत्यन्ये । द्रुतगतिरिति भरतः ॥ ६३ ॥ मधुकरिका । वज्रमित्यन्यः ॥ ६५ ॥ घैरिति म्यादिर्गादिरिति वचनाच्चतुर्भिरिति लभ्यते ॥ ७७ ॥ प्रमाणी । मत्तचेष्टितमिति भरतः ॥ ८२ ॥ वितानम् । उक्ताद्वक्ष्यमाणाच्चान्यत्समवृत्तं छन्दो वितानसंज्ञम् ॥ ८७ ॥ कैरिति पञ्चभिर्यतिः ॥ ८८ ॥ भुजगशिशुसृता । मधुकरिकेति भरतः ॥ ९१ ॥ कामिनी । तरंगवतीत्यन्यः ॥ १०६ ॥ मत्ता । इयं च यद्यपि वानवासिकायामन्तर्भवति तथापि विशेषसंज्ञार्थमुक्ता । एवमन्यत्रापि ॥ १०७ ॥ पणवः । कुवलयमालेति भरतः । केचित्तु यगणस्थाने सगणं मन्यन्ते ॥ ११० ॥ रुक्मवती । चम्पकमाला सुभावेति चान्ये । पुष्पस-

---

१ म्नगाः A.

भिगौ चित्रगतिः ॥ ११४ ॥ निगौ मिलया ॥ ११५ ॥ जिगावुषिता ॥११६॥ रः सौ गो मणिरङ्गः ॥११७॥ भ्नौ म्गौ बन्धूकम् ॥ ११८ ॥ भ्रज्गा मनोरमा ॥ ११९ ॥ तो जौ ग उपस्थिता ॥ १२० ॥ मस्गाः कलिका ॥१२१॥ भत्नगा मृगचपला ॥१२२॥ मो नौ गः कुमुदिनी ॥ १२३॥ मः सौ ग उद्धतम् ॥१२४॥ नज्यगा विपुलभुजा ॥१२५॥ रजसगा माला ॥१२६॥ १०/२० । त्रिष्टुभि । भौ रो गौ रोचकम् ॥ १२७ ॥ रः सौ लगावच्युतम् ॥ १२८ ॥ तिगौं लयग्राहि ॥ १२९ ॥ भिगौं दोधकम् ॥१३०॥ सिल्गा विदुषी ॥ १३१ ॥ भत्ना गौ श्रीर्कैः ॥ १३२ ॥ तौ जौ गावुपस्थिता ॥१३३॥ जस्ता गावुपस्थितम् ॥ १३४ ॥ मात्तौ[1] गौ शालिनी घैः ॥१३५॥ मभता गौ वातोर्मी ॥१३६॥ मो भौ गौ वा ॥१३७॥ मभ्नल्गा भ्रमरविलसितम् ॥१३८॥ नौ सो गौ वृन्ता ॥१३९॥ न्यभा गौ पतिता चैः ॥१४०॥ नेरल्गा रथोद्धता ॥ १४१ ॥ नेभा गौ स्वागता ॥ १४२ ॥ नौ रल्गा भद्रिका ॥ १४३ ॥ रज्रल्गाः श्येनी ॥१४४॥ नो जौ ल्गौ सुमुखी ॥१४५॥ मस्जा गावेकरूपम् ॥ १४६ ॥ तो जौ ल्गौ मोटनकम् ॥१४७॥ तभजल्गा उत्थापनी ॥१४८॥ तो नौ ल्गौ मुखचपला ॥१४९॥ न्यनल्गाः कमलदलाक्षी ॥ १५० ॥ स्नल्गा विमला ॥ १५१ ॥ नस्ना गावशोका ॥ १५२ ॥ सज्या ल्गौ सारणी ॥१५३॥ तौ जो गाविन्द्रवज्रा ॥१५४॥ जतजा गावुपेन्द्रवज्रा ॥१५५॥ एतयोः परयोश्च सङ्कर उपजातिश्चतुर्दशधा ॥ १५६ ॥ सर्वजातीनाम-

---

मृद्धिरिति भरतः ॥ ११३ ॥ मणिरङ्गः । (उदाहरणे मणिरागः । cf VR. 3, 28. 7) ॥११७॥ कुमुदिनी । कुसुमसमुदितेत्यन्ये ॥ १२३ ॥ माला । प्रमितेत्यन्ये ॥ १२६ ॥ दोधकम् । उपचित्रेयम् ॥१३०॥ श्रीः । सान्द्रपदमित्यन्ये । रुचिरेति भरतः । यतिनियमाभावे इदमेव प्रत्यवबोधः ॥ १३२ ॥ घैरिति वर्तते १३६-१३९॥ भ्रमरविलसितम् । वानवासिकेयम् ॥१३८॥ रथोद्धता । अपरान्तिकेयम् ॥१४१॥ भद्रिका । अपरवक्त्रमिति भरतः । उत्तरान्तिकेयम् ॥१४३॥ श्येनी । निःश्रेणिकेत्यन्ये ॥१४४॥ सुमुखी । द्रुतपादगतिरिति भरतः ॥१४५॥ कमलदलाक्षी । रुचिरमुखीति भरतः ॥ १५० ॥ परयोः इन्द्रवंशावंशस्थयोः ॥ १५६ ॥ सर्वजातीनामुक्तादीनां, प्रायो गायत्र्यादीनाम्, इतः परासां

---

[1] मस्तौ P. (मस्तद्वयं गुरुद्वयं च com.)

पीति वृद्धाः[1] ॥ १५७ ॥ ११/३१ ॥ जगत्यां। तौ ज्राविन्द्रवंशा ॥ १५८ ॥ जतज्रा वंशस्थम् ॥१५९॥ नभज्याः कलहंसा ॥१६०॥ नेभसाश्चन्द्रवर्त्म ॥१६१॥ सीस्तोटकम् ॥ १६२॥ नभभ्रा द्रुतविलम्बितम् ॥ १६३ ॥ नौ म्यौ पुटो जैः ॥ १६४ ॥ नौ म्रौ ततम् ॥ १६५ ॥ नौ भ्रावुज्ज्वला ॥ १६६ ॥ तीः कामावतारः ॥ १६७ ॥ न्यौ न्यौ कुसुमविचित्रा ॥ १६८ ॥ ज्सज्सा जलोद्धतगतिश्चैः ॥ १६९ ॥ यीर्भुजङ्गप्रयातम् ॥ १७० ॥ रीः स्रग्विणी ॥ १७१ ॥ जीर्मौक्तिकदाम ॥ १७२ ॥ मीः कल्याणम् ॥ १७३ ॥ नाद्भज्राः प्रियंवदा ॥ १७४ ॥ त्ताललिता ॥ १७५ ॥ स्जौ सौ प्रमिताक्षरा ॥ १७६ ॥ मौ यौ वैश्वदेवी कैः ॥ १७७ ॥ म्भौ स्मौ जलधरमाला घैः ॥ १७८ ॥ न्जौ भ्यौ नवमालिनी जैः ॥ १७९ ॥ न्जौ ज्रौ मालती ॥ १८० ॥ नौ रौ प्रमुदितवदना ॥ १८१ ॥ सा प्रभा छैः ॥ १८२ ॥ न्जज्यास्तामरसम् ॥ १८३ ॥ ज्रजा विभावरी ॥ १८४ ॥ येन्याः कुमुदिनी ॥ १८५ ॥ भ्तौ न्सौ ललना कैः ॥ १८६ ॥ नौ यौ कामदत्ता ॥ १८७ ॥ नो रिर्मेघावली ॥ १८८ ॥ त्यौ त्यौ पुष्पविचित्रा

जगत्यादीनां कृतनामाकृतनामविसदृशप्रस्ताररूपस्वस्वपादानां स्वल्पभेदानां संकरः उपजातिरिति बहुश्रुताः प्राहुः ॥ १५७ ॥ वंशस्थम् । वसन्तमञ्जरी, अवभ्रंशा चेत्यन्ये ॥१५९॥ कलहंसा । द्रुतपदा, मुखरं चेत्यन्ये ॥१६०॥ तोटकम् । मात्रासमकमिदम् ॥१६२॥ द्रुतविलम्बितम् । हरिणप्लुतमिति भरतः ॥ १६३ ॥ उज्ज्वला । चपलनेत्रेत्येके ॥१६६॥ कुसुमविचित्रा । इयं मदनविकारा, गजलुलितं वान्येषाम् ॥ १६८ ॥ भुजंगप्रयातम् । अप्रमेयेति भरतः ॥ १७० ॥ स्रग्विणी । पद्मिनीति भरतः ॥ १७१ ॥ कल्याणम् । काञ्चनमिदमिति कश्चित् ॥१७३॥ प्रियंवदा । मत्तकोकिलमित्यन्ये ॥१७४॥ प्रमिताक्षरा । चित्रेयम् ॥१७६॥ वैश्वदेवी । चन्द्रकान्तेत्यन्ये ॥१७७॥ जलधरमाला । कान्तोत्पीडेत्यन्ये ॥ १७८ ॥ मालती । वरतनुरित्यन्ये ॥ १८० ॥ प्रमुदितवदना । चञ्चलाक्षीत्यन्ये । गौरीत्यपरे ॥१८१॥ तामरसम् । कमलविलासिनीत्यन्ये ॥ १८३ ॥ विभावरी । वसन्तचत्वरमित्यन्ये ॥ १८४ ॥ मेघावली । वसन्तेति कश्चित ॥

---

१ वृद्धाः प्राहुः A.

॥ १८९ ॥ सा मणिमाला चैः ॥ १९० ॥ स्यौ स्यौ केकिरवम् ॥ १९१ ॥ निसौ ह्रीः ॥ १९२ ॥ ज्सौ स्यौ कोलः ॥ १९३ ॥ १२/३६ ॥ अतिजगत्यां । नतिगा उर्वशी ॥१९४॥ न्जौ क्षौ गः सुवक्त्रा ॥ १९५ ॥ मीगावक्त्ररुचिः ॥ १९६ ॥ म्नौ ज्रौ गः प्रहर्षिणी गैः ॥ १९७ ॥ ज्भौ स्जौ गो रुचिरा चैः ॥१९८॥ म्तौ य्सौ गो मत्तमयूरम् ॥ १९९ ॥ नौ त्रौ गः क्षमा ॥ २०० ॥ मौ जौ गः श्रेयोमाला ॥ २०१ ॥ नौ तौ गः कुटिलगतिश्छैः ॥ २०२ ॥ नौ त्रौ गः क्ष्मा[1] ॥ २०३ ॥ य्मौ रौ गश्चन्द्रिणी चैः ॥ २०४ ॥ नौ यौ गश्चन्द्रिका ॥ २०५ ॥ ज्तौ स्जौ गो मञ्जुभाषिणी ॥ २०६ ॥ न्सौ रौ गश्चन्द्रलेखा ॥ २०७ ॥ न्सौ जौ गो लयः ॥ २०८ ॥ न्सौ तौ गो विद्युन्मालिका ॥ २०९ ॥ स्जौ स्जौ गो नन्दिनी ॥ २१० ॥ न्जौ न्सौ गो मदललिता ॥ २११ ॥ स्जौ सौ गः कुटजम् ॥ २१२ ॥ नौ त्सौ गो गौरी ॥ २१३ ॥ त्भौ स्जौ गो लक्ष्मीः ॥ २१४ ॥ त्भौ जौ गोऽभ्रकम् ॥ २१५ ॥ म्तौ स्रौ गः कोडुम्भो[2] डैः ॥ २१६ ॥ स्यौ स्जौ[3] गः सुदन्तम् ॥ २१७ ॥ नौ सौ गः कमलाक्षी ॥ २१८ ॥ नीगौ त्वरितगतिः ॥ २१९ ॥ १३/२६ ॥ शक्वर्यां । नौ सौ ल्गावपराजिता छैः ॥ २२० ॥ म्सौ म्भौ गावलोला ॥ २२१ ॥ नौ भ्नौ ल्गौ प्रहरणकलिता ॥ २२२ ॥ नौ म्यौ ल्गौ करिमकरभुजा ॥ २२३ ॥ नौ तौ गौ वसन्तः ॥ २२४ ॥ म्रौ तौ गौ लक्ष्मीः ॥ २२५ ॥ मो रौ सो ल्गौ जया ॥ २२६ ॥ म्रम्यल्गा ज्योत्स्ना ॥ २२७ ॥ नम्रसल्गाः सिंहः ॥ २२८ ॥ ज्सौ नौ गौ राजरमणीयम् ॥ २२९ ॥ म्तौ न्सौ गावसम्बाधा कैः ॥ २३० ॥ त्भौ जौ गौ वसन्ततिलका ॥ २३१ ॥ नौ भौ गौ

१८८॥ सुवक्त्रा । अन्वलेत्यन्ये ॥१९५॥ चैरिति वर्तते १९९-२०१॥ कुटिलगतिः । नर्तकीत्यन्ये ॥ २०२ ॥ नन्दिनी । कनकप्रभा, जया, सुमङ्गलीति च केचिदाहुः । मनोवतीति भरतः ॥२१०॥ कुटजम् । भ्रमर इत्यन्यः ॥२१२॥ त्वरितगतिः । लघुगतिश्चपला वेत्यन्ये ॥ २१९ ॥ छैरिति वर्तते ॥ २२१-२२९ ॥ वसन्तः । नन्दीमुखीत्येके ॥ २२४ ॥ वसन्ततिलका । उद्धर्षिणी सैतवस्य ।

---

१ क्ष्मा छैः A. २ कोट्टुम्भो A (Wrongly). ३ सजौ P.

बलना ॥ २३२ ॥ ननल्गाः सुकेसरम् ॥ २३३ ॥ नीर्गौबुपचित्रम् ॥ २३४ ॥ न्जभ्जल्गा धृतिः ॥ २३५ ॥ भौ रसल्गा दुर्दुरकः ॥ २३६ ॥ भ्जस्नाद्गौ स्खलितम् ॥ २३७ ॥ ल्गौ चेदिन्दुवदना ॥२३८॥ न्भन्ता गौ शरभललितम् ॥ २३९ ॥ तच्छरभा घचैः ॥ २४० ॥ म्भन्या गौ कुटिलम्[1] ॥ २४१ ॥ १४/२२ ॥ अतिशक्वर्या । स्जसस्या ऋषभः ॥ २४२ ॥ नीसौ शशिकला ॥२४३॥ सा स्रक् चैः ॥ २४४ ॥ मणिगुणनिकरो जैः ॥ २४५ ॥ नौ म्यौ यो मालिनी ॥ २४६ ॥ नौ मौ रौ चन्द्रोद्योतः ॥ २४७ ॥ नौ तभ्रा उपमालिनी ॥ २४८ ॥ मियौँ चित्रा ॥२४९॥ मात्र्म्ययाश्चन्द्रलेखा छैः ॥२५०॥ राद्वा ॥२५१॥ स्जनन्या एला कैः ॥२५२॥ न्जभ्भ्राः[2] प्रभद्रकम् ॥२५३॥ र्जेर्जेरा-स्तूणकम् ॥ २५४ ॥ नो जौ भ्रौ कलभाषिणी ॥ २५५ ॥ राम्रभभ्राः सुन्दरम् ॥ २५६ ॥ नाद्रौः ॥ २५७ ॥ नौ रो यौ भोगिनी ॥ २५८ ॥ स्जसस्याः शिशुः ॥२५९॥ भ्यसस्याः केतनम् ॥ २६० ॥ स्भौ जौ रो मृदङ्गः ॥२६१॥ मुः कामक्रीडा ॥२६२॥ १५/२१ । अष्टौ । नभ्रा भौ गो मणिकल्पलता ॥ २६३ ॥ भीः स्गौ शरमाला ॥ २६४ ॥ मुगौ सङ्गतम् ॥ २६५ ॥ मुगौ कामुकी ॥ २६६ ॥ सुगौ वा ॥ २६७ ॥ नुगौ चलधृतिः ॥ २६८ ॥ तुलावचलधृतिः ॥ २७९ ॥ न्भौ जिगौ मङ्गलमङ्गना चैः ॥२७०॥ भ्रनिगा ऋषभगजविलसितं छैः ॥ २७१ ॥ निजस्गा ललितपदं कैः ॥२७२॥ य्मन्सगौ जयानन्दं चैः ॥ २७३ ॥

सिंहोन्नता काश्यपस्य ॥ २३१ ॥ वलना । लतेत्यन्यः ॥ २३२ ॥ धृतिः । मणिकटकामित्यन्ये ॥ २३५ ॥ स्खलितम् । महिता, कान्ता, वनमयूरश्चेत्यन्ये ॥ २३७॥ कुटिलम् । घचैरिति वर्तते । हंसश्येनीत्येके ॥ २४१ ॥ शशिकला । सप्तभिर्यतिरित्येके । चन्द्रावर्तेति पिङ्गलः ॥ २४३ ॥ स्रक् । मालेति पिङ्गलः ॥ २४४ ॥ जैरिति वर्तते ॥२४६-२४९॥ मालिनी । नान्दीमुखीति भरतः ॥२४६॥ चित्रा । मण्डुकी चञ्चला वेत्यन्ये ॥२४९॥ छैरिति वर्तते ॥२५१॥ कलभाषिणी । अरविन्दमित्येके ॥२५५॥ सुन्दरम् । मणिभूषणं रमणीयं चेत्येके ॥ २५६ ॥ कामुकी । सोमकमित्यन्ये । २६७ ॥ ऋषभगजविलसितम् । मत्त-गजविलसितमिति भरतः ॥ २७१ ॥ जयानन्दम् प्रवरललितमित्येके ॥ २७३ ॥

---

[1] कुटिलं घचैः A. [2] नजभभ्राः A.

भ्रौ नौ न्मौ महिषी वैः ॥ २७४ ॥ म्भौ न्भौ न्गौ मदनललिता घचैः ॥२७५॥ न्जभ्जगौ वाणिनी ॥२७६॥ नजिगौ वा ॥ २७७ ॥ जभ्जजाः पञ्चचामरम् ॥ २७८ ॥ जेर्जेर्गौश्चित्रम् ॥ २७९ ॥ म्नस्त-गौः सुरतललिता ॥ २८० ॥ भ्रौ न्भौ भ्गौ शैलशिखा ॥ २८१ ॥ भ्रौ य्नौ न्गौ वरयुवतिः ॥ २८२ ॥ र्नौगा ललना ॥ २८३ ॥ सौ नौ मो गो वेल्लिता ॥ २८४ ॥ म्तौ स्तौ त्गौ कोमललता घकैः ॥ २८५ ॥ १६/२३ ॥ अत्यष्टौ । यम्नस्भल्गा शिखरिणी चैः ॥ २८६ ॥ ज्सजस्यल्गाः पृथ्वी जैः ॥ २८७ ॥ भ्रौ न्भौ न्लौ गो वंशपत्रपतितं कैः ॥ २८८ ॥ सौ ज्भौ जो गावतिशायिनी ॥ २८९ ॥ मो भ्नौ तौ गौ मन्दाक्रान्ता घचैः ॥ २९० ॥ मभ्नरसल्गा भाराक्रान्ता ॥ २९१ ॥ मभ्नम्यल्गा हारिणी ॥ २९२ ॥ न्सौ म्रौ स्लौ गो हरिणी चघैः ॥ २९३ ॥ नः स्मौ तौ गौ पद्मम् ॥ २९४ ॥ नसम्यल्गा रोहिणी ॥ २९५ ॥ नुर्गौ वसुधारा ङैः ॥ २९६ ॥ न्जभ्जजा ल्गाववितथम् ॥ २९७ ॥ तत्कोकिलकं छचैः ॥ २९८ ॥ गौ चेद्वाणिनी ॥ २९९ ॥ १७/१४॥ धृत्यां । म्रभ्या रौ काञ्ची टैः ॥३००॥ भिम्भसा मणिमाला ॥ ३०१ ॥ मत्ना यिः कुसुमलतावेल्लिता ङचैः ॥ ३०२ ॥ घछैश्चि-त्रलेखा ॥ ३०३ ॥ मभ्ना यिश्चन्द्रलेखा ॥ ३०४ ॥ म्भन्जभ्राश्चलम् ॥ ३०५ ॥ म्भौ न्यौ रौ केसरम् ॥ ३०६ ॥ नौ मौ यौ चन्द्रमाला छघैः ॥ ३०७ ॥ नौ म्तौ भ्रौ ललितम् ॥ ३०८ ॥ भ्रनिसा भ्रमरपदं झैः ॥ ३०९ ॥ म्सौ ज्सौ त्सौ शार्दूलललितं ठैः ॥ ३१० ॥ म्तन्जभ्राः कुरङ्गिका ङछैः ॥ ३११ ॥ न्सौ मौ यावनङ्गलेखा चङैः ॥ ३१२ ॥ सौं ज्सौ भ्रावुज्ज्वलं जैः ॥ ३१३ ॥ नौ रीर्निशा ङैः ॥ ३१४ ॥ नौ सौ

पृथ्वी । विलम्बितगतिरिति भरतः ॥२८७॥ वंशपत्रपतितम् । वंशदलमित्यन्ये ॥ २८८॥ अतिशायिनी । जैरिति वर्तते । यादवीत्यन्ये ॥२८९॥ मन्दाक्रान्ता । श्रीधरेति भरतः ॥२९०॥ घचैरिति वर्तते २९१-२९२ ॥ हरिणी । वृषभल-लितमित्येके ॥२९३॥ चघैरिति वर्तते २९४-२९५ ॥ अवितथम् । नर्कुटकमिति जयदेवः ॥२९७॥ काञ्ची । वाचालकाञ्चीत्यन्ये ॥३००॥ टैरिति वर्तते ॥३०१॥ घछैरिति वर्तते ३०४-३०६॥ छघैरिति वर्तते ३०८ ॥ उज्ज्वलम् । विबु-धप्रियेत्यन्ये । मालिकोत्तरमालिकावित्यन्ये (-केत्यन्ये ?) ॥ ३१३ ॥ निशा ।

स्यौ पङ्कजवक्त्रा घडैः ॥ ३१५ ॥ स्नज्नभसाः सुरभिर्बिडैः ॥ ३१६ ॥ य्मौ न्सौ त्सौ क्रीडा चचैः ॥ ३१७ ॥ न्सौ म्तौ भ्रौ हरिणीपदं चचैः ॥ ३१८ ॥ मीन्या भङ्गिः ॥ ३१९ ॥ स्जौ स्जौ त्रौ बुद्बुदम् ॥ ३२० ॥ १८/२१ ॥ अतिधृत्यां । म्सौ ज्सौ तौ गः शार्दूलविक्रीडितं ठैः[2] ॥३२१॥ म्सौ ज्सौ न्जौ गो वायुवेगा[3] ॥ ३२२ ॥ य्मौ न्सौ रौ गो मेघविस्फूर्जिता चचैः ॥ ३२३ ॥ य्मौ न्सौ जौ गो मकरन्दिका ॥ ३२४ ॥ य्मौ न्सौ तौ गश्छाया ॥ ३२५ ॥ त्रिज्सौ गो रतिलीला ॥ ३२६ ॥ म्तौ न्सौ रौ गः पुष्पदाम ञ्छैः ॥ ३२७ ॥ म्तौ न्सौ तौ गो वञ्चितम् ॥३२८॥ य्मौ नौ रौ गो मुग्धकं चछैः ॥ ३२९ ॥ रः सौ तो जौ ग ऊर्जितं वैः ॥ ३३० ॥ नभ्रसा जौ गस्तरलम् ॥ ३३१ ॥ म्रौ भः सौ ज्गौ माधवीलता छैः ॥ ३३२ ॥ सूगौ तरुणीवदनेन्दुः ॥ ३३३ ॥ १९/१३ ॥ कृतौ । म्रौ भ्नौ य्मौ ल्गौ सुवदना छछैः ॥३३४॥ दशग्ला वृत्तम् ॥ ३३५ ॥ स्मौ नौ म्यौ ल्गौ मत्तेभविक्रीडितं डैः ॥ ३३६ ॥ नो भौ मः सौ ल्गौ मुद्रा टैः ॥ ३३७ ॥ य्मौ नौ तौ गौ शोभा चछैः ॥ ३३८ ॥ म्रौ भ्नौ तौ गौ चित्रमाला छचैः ॥ ३३९ ॥ म्नौ म्रौ म्यौ ल्गौ सँद्रत्नमाला[4] ञ्जैः ॥ ३४० ॥ भीरसल्गा नन्दकम् ॥ ३४१ ॥ भ्रौ न्भौ भ्रौ ल्गौ कामलता ॥ ३४२ ॥ भ्नौ य्नौ भ्रौ ल्गौ दीपिकाशिखा गचैः ॥ ३४३ ॥ त्भौ ज्भौ ज्भौ ल्गौ शशाङ्करुचितम् ॥३४४॥ २०/११ ॥ प्रकृतौ । म्रौ भ्नौ यिः स्रग्धरा छछैः ॥ ३४५ ॥ म्रौ भ्नौ ज्भौ रः कथागतिः[5] ॥३४६॥ भ्रौ म्रौ न्रौ रो ललितविक्रमो वैः ॥ ३४७ ॥ मौ तनिसा मत्तक्रीडा जडैः ॥ ३४८ ॥ जैतनिसाश्चन्द्-

---

तारकेत्यन्ये ॥३१४॥ भङ्गिः । विच्छित्तिरिति कश्चित् ॥३१९॥ छैरिति वर्तते ॥ ३२२ ॥ मेघविस्फूर्जिता । रम्भेति स्वयम्भूः ॥ ३२३ ॥ चचैरिति वर्तते ॥ ३२४–३२६ ॥ वञ्चितम् । विचितमित्यन्यः । ञ्छैरिति वर्तते ॥ ३२८ ॥ मुद्रा । उज्ज्वलमित्यन्ये ॥३३७॥ चित्रमाला । सुप्रभेत्यन्यः ॥३३९॥ कामलता । उत्पलमालिकेत्यन्ये ॥३४२॥ छछैरिति वर्तते ॥३४६॥ सिद्धिः । चित्र-

---

१ बिडैः P. २ छैः P. (But of द्वादशभिर्यतिः om.). ३ वायुवेगा ठैः A. ४ रत्नमाला A. ५ A adds छछैः.

नप्रकृतिः ॥ ३४९ ॥ न्जमजिराः सिद्धिः ॥ ३५० ॥ नजीभ्रा वनमञ्जरी ॥ ३५१ ॥ त्री नौं रसरङ्गः ॥३५२॥ २१/८ ॥ आकृतौ । भ्रौ बौ बौ न्गौ मङ्गकं बैः ॥ ३५३ ॥ स्तौ त्नौ स्त्रौ गौं महास्रग्धरा जछैः ॥ ३५४ ॥ भूगौ मदिरा ॥ ३५५ ॥ मत्यनीगा वरतनुः ॥ ३५६ ॥ म्सौ ज्सौ ज्सौ ज्गौ[1] दीपार्चिर्बैः ॥ ३५७ ॥ २२/५ ॥ विकृतौ । न्जौ भ्जौ भ्जौ भ्लौ [2]गोऽश्वललितं टैः ॥३५८॥ मौ तो नील्गा मत्ताक्रीडा जङ्कैः ॥ ३५९ ॥ ताज्जूल्गाः शङ्खः ॥ ३६० ॥ नादू हंसगतिः ॥ ३६१ ॥ त्री नौं ल्गौश्चित्रकम् ॥ ३६२ ॥ भ्मौ स्मौ निल्गाश्चपलगतिः ॥ ३६३ ॥ ज्सौ ज्सौ यिल्गा वृन्दारकम् ॥ ३६४ ॥ २३/७॥ संकृतौ । भ्तौ न्सौ भौ न्यौ तन्वी ठैः ॥ ३६५ ॥ नौ भ्नौ ज्नौ न्यौ ललितलता छछैः ॥ ३६६ ॥ नौ रूर्मेघमाला ॥ ३६७ ॥ भूः सुभद्रम् ॥ ३६८ ॥ भितनिसा द्रुतलघुपदगतिः ॥ ३६९ ॥ न्यौ भ्तौ निसौ संभ्रान्ता ॥ ३७० ॥ म्सौ ज्सौ तौ भ्रौ विभ्रमगतिः ॥३७१॥ २४/७ ॥ अभिकृतौ । भ्मरभनीगाः क्रौञ्चपदा ञ्ङ्जैः ॥३७२॥ नीसमिगा हंसलयो जछैः ॥ ३७३ ॥ त्यौ भौ नीगौ हंसपदा बैः ॥ ३७४ ॥ न्जज्या नीगौ चपलम् ॥ ३७५ ॥ २५/४ ॥ उत्कृतौ । मौ तो निरसल्गा भुजङ्गविजृम्भितं जटैः ॥ ३७६ ॥ मनूसगगा अपवाहो झचचैः ॥ ३७७ ॥ भो नौ स्मौ निल्गा आपीडो डैः[4] ॥३७८॥ न्जौ न्सौ भनिल्गा वेगवती ॥ ३७९ ॥ नजभजिभ्जल्गाः सुधाकलशो डैः ॥३८०॥ २६/५ । उक्तादिजातिप्रकरणम् ॥ शेषजातौ । मतिनापि मालाचित्रं

लता, रुचिरा, शशिवदना चेत्यन्ये ॥ ३५० ॥ मदिरा । लताकुसुममित्यन्ये ॥३५५॥ अश्वललितम् । अत्र केचित्सप्तमभगणस्थाने जगणमिच्छन्ति ॥३५८॥ हंसगतिः । महातरुणीदयितमित्यन्ये ॥ ३६१ ॥ मेघमाला । भृङ्गाञ्जनीलालकमित्यन्ये ॥३६७॥ चण्डवृष्टिप्रपात इत्यन्ये ॥ ३८७ ॥ आदिशब्दात् पञ्च-

---

१ जगौ P. २ गश्च ललितं P. (But in illustration we have -इन्द्रियाश्वललितैः wrongly read as इन्द्रियाश्च ललितैः in P). ३ वंशगतिः A. (Even the Ṭippana in A has this same name). ४ डैः P. (चतुर्दशभिर्यतिः Com. in P. But Com. in B has त्रयोदशभिर्यतिः and this seems to be correct as seen from the illustration in P). Both A and B have डैः as in the text.

टैः ॥ ३८१ ॥ म्तौ य्तौ निर्सल्गाः प्रमोदमहोदयो घछटैः ॥ ३८२ ॥ ह्विर्भजसना भ्यौ नृत्तललितम् ॥ ३८३ ॥ द्वादश ना ल्गौ ललितलता त्रिर्वैः ॥ ३८४ ॥ मातनीजभ्राः पिपीलिका जणैः ॥ ३८५ ॥ एषैव नीपरतः पञ्चदशपञ्चदशलवृद्धा क्रमेण करभपणवमालाः ॥ ३८६ ॥ शेषजातिप्रकरणम् । अथ दण्डकाः ॥ नार् चण्डवृष्टिः ॥ ३८७ ॥ यथोत्तरमेकैकरवृद्धा अर्णोर्णवव्यालजीमूतलीलाकरोद्दामशङ्खादयः ॥ ३८८ ॥ नाभ्यां रवद्यादयः प्रचितः ॥ ३८९ ॥ नग्भ्यामष्टाविराः पन्नगदम्भोलिहेलावलीमालतीकेलिकङ्केलिलीलाविलासादयः ॥ ३९० ॥ लोर्यथेष्टं राश्चण्डकालः ॥ ३९१ ॥ याः सिंहविक्रान्तः ॥ ३९२ ॥ लुगिभ्यां मेघमाला ॥ ३९३ ॥ यथेष्टं रा मत्तमातङ्गः ॥ ३९४ ॥ साः कुसुमास्तरणः ॥ ३९५ ॥ याः सिंहविक्रीडः ॥ ३९६ ॥ ल्गावनङ्गशेखरः ॥ ३९७ ॥ ग्लावशोकपुष्पमञ्जरी ॥ ३९८ ॥ ताः गौ कामबाणः ॥ ३९९ ॥ भाः गौ भुजङ्गविलासः ॥ ४०० ॥ नाभ्यां पञ्चमात्रैरुत्कलिका ॥ ४०१ ॥ इति दण्डकप्रकरणम् । इत्याचार्यश्रीहेमचन्द्रानुस्मृते छन्दोऽनुशासने समवृत्तव्यावर्णनो नाम द्वितीयोऽध्यायः॥

तृतीयोऽध्यायः ।

ओजयुजोः ॥ १ ॥ सिल्गा नभभ्रा हरिणप्लुता ॥ २ ॥ सिल्गा भिगगा उपचित्रम् ॥ ३ ॥ लोनं वेगवती ॥ ४ ॥ भिगगा नजज्या द्रुतमध्या ॥ ५ ॥ तजगा मस्जगगा भद्रविराट् ॥ ६ ॥ सजस्गा भर्नगगाः केतुमती ॥ ७ ॥ ताजगगा जतजगगा आख्यानकी ॥ ८ ॥

दशभिः समुद्रः षोडशभिर्भुजङ्गः इत्येवमादयो यथेष्टकृतनामानो यावदेकोनसहस्राक्षरपादस्तावद्भवन्ति ॥३८८॥ रवत् इत्यतिदेशात् सप्तभिर्यैः प्रचितः । ततः परं एकैकयादिवृद्धया अर्णादयोऽत्रापि भवन्ति ॥ ३८९ ॥

हरिणप्लुता । प्राच्यवृत्तिरियम् ॥२॥ वेगवती । आपातलिकेयम् ॥ ४ ॥ द्रुतमध्या । आपातलिकापरान्तिकेयम् ॥ ५ ॥ भद्रविराट् । औपच्छन्दसिक-

---

१ निरसल्गाः A.

व्यत्यये विपरीतादिः ॥ ९ ॥ जैजौ भजगा यवमती ॥ १० ॥ व्यत्यये षट्पदावली ॥ ११ ॥ नभभ्रा नभिरा मकरावली ॥ १२ ॥ भसागाः सभासाः करिणी ॥ १३ ॥ साज्गाः सभ्र्ल्गाः प्रबोधिता ॥ १४ ॥ नारल्गा नजभ्रा अपरवक्त्रम् ॥ १५ ॥ गान्तं पुष्पिताग्रा ॥ १६ ॥ साज्गगाः स्भयौ मालभारिणी ॥ १७ ॥ भातल्गा न्जन्सगा विलसित-लीला ॥ १८ ॥ भन्जनल्गा भैन्र्जैभ्जन्साष्टैर्मानिनी ॥ १९ ॥ रो जल्गाः कामिनी ॥ २० ॥ रो जभ्राः शिखी ॥ २१ ॥ रो जभौ ज्गौ नितम्बिनी ॥ २२ ॥ रश्चिर्भौ ल्गौ वारुणी ॥ २३ ॥ रश्चतुर्भौ वतंसिनी ॥ २४ ॥ कामिन्याद्या व्यत्यये वानरीशिखण्डिसारस्यपराह्वंस्यः ॥ २५ ॥ स्लगाः सिल्गा इला ॥ २६ ॥ स्लगाः सूर्मृगाङ्कमुखी ॥ २७ ॥ न्लर्ल्गाः न्लगौ शिखा ॥ २८ ॥ व्यत्यये खञ्जा ॥ २९ ॥ अर्धयोर्वा ॥ ३० ॥ न्लगावतिरुचिरा ॥ ३१ ॥ न्लॅल्गाश्च ॥ ३२ ॥ इति अर्धसमप्रकरणम् ॥ अनुष्टुभि नाद्यात्स्नौ तुर्याद्यो वक्त्रम् ॥ ३३ ॥ तद्युजोर्जः पथ्या ॥ ३४ ॥ ओजे विपरीतादिः ॥ ३५ ॥ नश्चपला ॥ ३६ ॥ युजोः षड्भ्यो लो विपुला ॥ ३७ ॥ सैतवस्य चतुर्षु ॥ ३८ ॥ तुर्यात्भ्रतभ्रम्सास्तद्विपुला ॥ ३९ ॥ इति वक्त्रप्रकरणम् ॥ एकोऽष्टाक्षरः पादश्चतुर्वृद्धाः क्रमात्परे पद-चतुरूर्ध्वं चतुर्विंशतिधा ॥ ४० ॥ तदादौ द्विगं सर्वलं प्रत्यापीडः ॥ ४१ ॥ अन्ते च ॥ ४२ ॥ द्विगमापीडः ॥ ४३ ॥ स आद्यस्य द्वितीयादिना व्यत्यये कलिकालवल्यमृतधाराः ॥ ४४ ॥ इति पदचतुरूर्ध्व-प्रकरणं सप्तभिः ॥ स्जस्ला न्सज्गा भनजलगाः स्जसज्गाः पादेषूद्गता

मिदम् ॥६॥ एतौ वैतालीयभेदौ १४॥१५॥ औपच्छन्दसिकभेदावेतौ ॥१६॥ १७ ॥ अर्धयोरित्यभिधानात् ओजयुजोरिति निवृत्तम् । अनयोर्विषमवृत्तत्वेऽपि अर्धसममध्ये लाघवार्थं पाठः ॥३०॥ द्वे अप्येते चूलिके इत्यहीन्द्रः ॥३१॥३२॥ नन्वेयं पथ्यया गतार्था । विपुलावर्गस्येदानीमारभ्यमाणत्वात् तां (विपुलां) विना तस्य (वर्गस्य) अनुपपत्तेः ॥ युक्तपादयोः सप्तमेन लघुनावश्यमेव भवितव्यम् । विषमपादयोस्तु नादिभिर्यगणस्यापवादं वक्ष्यति । पथ्यायां तु यगण एवावतिष्ठते ॥ ३७ ॥ चानुकृष्टत्वात् आदाविति नानुवर्तते ॥ ४३ ॥ कलिका । मञ्जरीति पिङ्गलः ॥ ४४ ॥

---

१ सभर्ल्गाः P. २ भजनसा० P. ३ जभजगा नितम्बिनी A. ४ न्लल्गाः B; P.

॥ ४५ ॥ नेभगास्तृतीये सौरभकम् ॥ ४६ ॥ नौ सौ ललितम् ॥ ४७ ॥ उद्गताप्रकरणं त्रिभिः ॥ म्सज्भगगाः स्नजर्गोः नासौ निज्याः पादेषूपस्थितप्रचुपितम् ॥ ४८ ॥ नौ स्नौ न्सौ तृतीये वर्धमानम् ॥४९॥ तज्राः शुद्धविराड्ऋषभम् ॥ ५० ॥ उपस्थितप्रचुपितप्रकरणं त्रिभिः ॥ पूर्वेऽर्धे मुगौ परे ग्लूलला: सौम्या ॥ ५१ ॥ व्यत्यये ज्योतिः ॥ ५२ ॥ इति विषमवृत्तप्रकरणम् । अथ मात्राच्छन्दांसि ॥ ओजे षण्मात्रा र्लोन्तौ युज्यष्टौ न युजि षट् सन्ततं ला न समः परेण गो वैतालीयम् ॥ ५३ ॥ र्योन्ता औपच्छन्दसकम् ॥ ५४ ॥ भगगान्ता आपातलिका ॥ ५५ ॥ युजि तिसृभ्यो गः प्राच्यवृत्तिः ॥ ५६ ॥ अयुज्याद्यार्द्धाद्ग उदीच्यवृत्तिः ॥ ५७ ॥ ते मिश्रे प्रवृत्तकम् ॥ ५८ ॥ वैतालीयादेर्युक्पादजापरान्तिका ॥ ५९ ॥ ओजजा चारुहासिनी ॥ ६० ॥ सर्वेष्वाद्यलाद्गो दक्षिणान्तिका ॥ ६१ ॥ ओजे चौ युजि षचौ लद्लदान्तौ मागधी ॥ ६२ ॥ ओजजा पश्चिमान्तिका ॥ ६३ ॥ युग्जोपहासिनी ॥ ६४ ॥ अजमुखश्चीर्गन्तो नवमे ले मात्रासमकम् ॥६५॥ ग्युपचित्रा ॥ ६६ ॥ लौ पञ्चमाष्टमौ विश्लोकः ॥ ६७ ॥ नवमश्च चित्रा ॥ ६८ ॥ द्वादशश्च वानवासिका ॥ ६९ ॥ एभिः पादाकुलकम् ॥ ७० ॥ चो गीर्नटचरणं जैः ॥ ७१ ॥ चौ गौ चो गौ नृत्तगतिश्चैः ॥ ७२ ॥ चीर्नौजे जो जो लीर्वान्तेऽनुप्रासे पद्धतिः ॥ ७३ ॥

इत्याचार्यश्रीहेमचन्द्रानुस्मृते छन्दोऽनुशासने
अर्धसमविषमवैतालीयमात्रासमकादिव्यावर्णनस्तृतीयोऽध्यायः ॥

एते द्वे अपि अनङ्गक्रीडेति जयदेवः। शिखेत्यहीन्द्रः ॥ ५१ ॥ ५२ ॥ प्राच्यवृत्तिः । सा च वैतालीयौपच्छन्दसकापातलिकोपाधिभेदात् त्रिधा ॥ ५६ ॥ एषापि पूर्ववत् त्रिधा ॥ ५७ ॥ प्रवृत्तकम् । इदमपि वैतालीयादिभेदात् त्रेधा ॥ ५८ ॥

---

१ स्नजरगाः P. २ पूर्वे अर्धे P. ३ र्लान्ता P. ४ चला P.

चतुर्थोऽध्यायः ॥

चृगौ षष्ठो जो न्लौ वा पूर्वेऽर्धे परे षष्ठो लु आर्या गाथा ॥ १ ॥ षष्ठे न्ले लाद् द्वितीयात्सप्तमे त्वाद्यात्पदमन्यार्धे च पञ्चमे ॥ २ ॥ आद्यचियतिः पथ्या ॥ ३ ॥ विपुलान्याद्यन्तसर्वभेदात्त्रेधा ॥ ४ ॥ ग्मध्ये द्वितीयतुर्यौ जौ चपला ॥ ५ ॥ द्विः पूर्वार्धे गीतिः ॥ ६ ॥ परार्धमुपगीतिः ॥ ७ ॥ द्वयोर्व्यत्यये उद्गीतिः ॥ ८ ॥ गीतिः सप्तमे पे रिपुच्छन्दा ॥ ९ ॥ तृतीये ललिता ॥ १० ॥ द्वाभ्यां भद्रिका ॥ ११ ॥ षष्ठं विनेष्टपैर्विचित्रा ॥ १२ ॥ चेऽष्टमे स्कन्धकम् ॥ १३ ॥ तत्षष्ठे ल्युपात् ॥ १४ ॥ आद्येऽर्धे उदः ॥ १५ ॥ अन्त्येऽवात् ॥ १६ ॥ गीतिस्कन्धके सङ्कीर्णम् ॥ १७ ॥ गाथाद्यर्धेऽन्त्यगात् प्राक् चो वृद्धौ जातीफलम् ॥ १८ ॥ चयोर्गाथः ॥ १९ ॥ क्रमवृद्ध्योश्च-वसमुपात् ॥ २० ॥ गाथिनी ॥ २१ ॥ यथेष्टं मालागाथः ॥ २२ ॥ जातीफलाद्यर्धे गाथवद्दामादयः ॥ २३ ॥ मात्रा वर्णोना गो वर्णा गूना लः ॥ २४ ॥ इत्यार्याप्रकरणम् । पौ चौ तो गलितकं यमितेऽङ्घ्रौ ॥ २५ ॥ तृतीये षष्ठे ल्युपात् ॥ २६ ॥ समेऽन्तरात् ॥ २७ ॥ पौ चौ पो वेः ॥ २८ ॥ चौ पः समः ॥ २९ ॥ षतीगाः शुभात् ॥ ३० ॥ चः पौ चौ तः समात् ॥ ३१ ॥ तदोजे चतौ मुखात् ॥ ३२ ॥ षाच्चल्लुनौजे जः समे जो लीर्वा मालायाः ॥ ३३ ॥ चृगन्तो मुग्धात् ॥ ३४ ॥ चूरुग्रात् ॥ ३५ ॥ पौ तः सुन्दरा ॥ ३६ ॥ पौ तौ भूषणा ॥ ३७ ॥ चपचापचाल्गा मालागलिता ॥ ३८ ॥ षश्चीः समे जो लीर्वा विलम्बिता ॥ ३९ ॥ गन्तचः पचुपाः खण्डोद्गतम् ॥ ४० ॥ चपाचीपाः प्रसृता ॥ ४१ ॥ चुर्दो नौजे जो लम्बिता ॥ ४२ ॥ सौजे पैर्विच्छित्तिः ॥ ४३ ॥ चापचपदा ललिता ॥ ४४ ॥ उभे विषमा ॥ ४५ ॥ तीचौ मुक्तावली ॥ ४६ ॥ पिचौ रतिवल्लभः ॥ ४७ ॥ पौ चषौ हीरावली ॥ ४८ ॥ इति गलितक-प्रकरणम् । गलितकमेवायमकं सानुप्रासं समांह्रि खञ्जकम् ॥४९॥ तौ चितगाः खञ्जकम् ॥ ५० ॥ पचपचपा मह्यतोणकः ॥ ५१ ॥ चीगौ सुमङ्गला ॥ ५२ ॥ चौ पः खण्डम् ॥ ५३ ॥ षचता उपात् ॥ ५४ ॥

---

१ चाद्यात् P. २ त्रिधा P. (But P. com. has त्रेधा).

षश्चौ खण्डिता ॥ ५५ ॥ त्रयोऽप्यवलम्बकः ॥ ५६ ॥ षश्चीर्युग्जो लीर्वो हेला ॥ ५७ ॥ सान्ते दोनावली ॥ ५८ ॥ चूपगा विनता ॥ ५९ ॥ तौ चस्तौ विलासिनी ॥ ६० ॥ तौ चितौ मञ्जरी ॥ ६१ ॥ सा तान्ता सालभञ्जिका ॥ ६२ ॥ चादिः कुसुमिता ॥ ६३ ॥ षश्चुगौ द्वितीयषष्ठौ जो लीर्वो द्विपदी ॥ ६४ ॥ साद्ये न्ले छे रचिता ॥ ६५ ॥ गन्तारनालम् ॥ ६६ ॥ उपान्त्यलोना कामलेखा ॥ ६७ ॥ षचीदा-श्चन्द्रलेखा ॥ ६८ ॥ चिपताः क्रीडनकं जैः ॥ ६९ ॥ षपचतदा अरविन्दकम् ॥ ७० ॥ षलदलचदगाद्वौ मागधनर्कुटी ॥ ७१ ॥ सश्चेन्नर्कुटकम् ॥ ७२ ॥ षजौ सिः समात् ॥ ७३ ॥ त्रिष्वप्यन्त्यचस्य ते तरङ्गकम् ॥ ७४ ॥ गान्तं पवनोध्दुतम् ॥ ७५ ॥ चाभ्यां पाभ्यां पाद्वा तिर्निध्यायिका ॥ ७६ ॥ चुपौ युग्म जोऽधिकाक्षरा ॥ ७७ ॥ सा तुर्यपा मुग्धिका ॥ ७८ ॥ आदौ पश्चित्रलेखा ॥ ७९ ॥ पौ मल्लिका ॥ ८० ॥ सा तुर्यपा दीपिका ॥ ८१ ॥ ताभिर्लक्ष्मिका ॥ ८२ ॥ चतुःपञ्चषट्सप्ताष्टनवपा मदनावतार-मधुकरी-नवकोकिला-कामलीला-सुतारा-वसन्तोत्सवाः ॥ ८३ ॥ इति खञ्जकप्रकरणम् । खञ्जकं दीर्घीकृतं शीर्षकम् ॥ ८४ ॥ गीत्यन्तावबलम्बकौ द्विपदीखण्डम् । ८५ ॥ द्विपद्यन्ते गीतिर्द्विभङ्गिका ॥ ८६ ॥ अन्यथापि ॥ ८७ ॥ द्विपद्यव-लम्बकान्ते गीतिस्त्रिभङ्गिका ॥ ८८ ॥ त्रिभिरन्यैरपि ॥ ८९ ॥ गाथस्याद्यार्धं[1] समैश्चैर्गात् प्राग्वृद्धं गस्य ते[2] पादः समशीर्षकम् ॥ ९० ॥ मालागलितकपादान्ते विषमचावृद्धौ वेः ॥ ९१ ॥ इति शीर्षकप्रकरणम् ।

इत्याचार्यश्रीहेमचन्द्रानुस्मृते छन्दोऽनुशासने
आर्या-गलितक-खञ्जक-शीर्षक-व्यावर्णनो नाम चतुर्थोऽध्यायः ॥

---

१ गाथस्यार्धं A. २ (अन्त्य) स्य ते P. (But अन्त्यस्य च गुरोः स्थाने ते त्रिमात्रे सति om. in P).

पञ्चमोऽध्यायः ।

अथ प्रायोऽपभ्रंशे ॥ १ ॥ अजश्चूस्तृतीयपञ्चमौ जो लीर्वोत्साहः ॥ २ ॥ दामात्रा नो रासको ढैः ॥ ३ ॥ चुल्गा वा ॥ ४ ॥ चपजाया अवतंसकः ॥ ५ ॥ चः पौ जो गौ कुन्दः ॥ ६ ॥ पाचाजगाः करभकः ॥ ७ ॥ चपाचागा इन्द्रगोपः ॥ ८ ॥ चपाचाल्गाः कोकिलः ॥ ९ ॥ चपाचल्गा दर्दुरः ॥ १० ॥ चरजमगा आमोदः ॥ ११ ॥ भ्रल्गपासा[1] विद्रुमः ॥ १२ ॥ रो मीर्मेघः ॥ १३ ॥ त्रयल्गा विभ्रमः ॥ १४ ॥ चपजगगाः कुसुमः ॥ १५ ॥ ओजयुजोश्छढा रासः ॥ १६ ॥ पाचदास्त्रिस्तृतीये पञ्चमे चो जो लीर्वो पञ्चांह्रिखिपात्पूर्वोर्धो मात्रा ॥१७॥ द्वितीये तुर्ये तयोर्वाद्यस्य चः स्थाने पो मत्तबालिका ॥ १८ ॥ तृतीयस्य तो मत्तमधुकरी ॥ १९ ॥ तृतीये पञ्चमे तयोर्वा पोश्चौ मत्तविलासिनी ॥ २० ॥ चस्य पो मत्तकरिणी ॥ २१ ॥ आभिर्बहुरूपा ॥ २२ ॥ आसां तृतीयस्य पञ्चमेनानुप्रासेऽन्ते दोहकादिश्चेद्वस्तु रड्डा वा ॥ २३ ॥ इति मात्राप्रकरणम् । चौ लान्ततौ चौ तो वस्तुकम् ॥ २४ ॥ षचिपा युज्यजच ओजे जो लीर्वा वस्तुवदनकम् ॥ २५ ॥ षोऽजचः षपौ रासावलयम् ॥ २६ ॥ द्वयोरर्धसङ्करे सङ्कीर्णम् ॥ २७ ॥ षचचाद्दो वदनकम् ॥२८॥ तद्[2]उपवदनकम् ॥ २९ ॥ ते यमितेऽन्तेऽडिला ॥ ३० ॥ पिदावुत्थक्कः ॥ ३१ ॥ धवलमष्ट[3]पात्षट्पाच्चतुष्पात् ॥ ३२ ॥ तत्राष्टांह्रावोजे चिदौ समे चौ श्रीधवलम् ॥ ३३ ॥ आद्ये तृतीये चिदौ द्वितीये तुर्ये चिः शेषे त्वोजे चातौ समे चादौ चिर्वा यशोधवलम् ॥ ३४ ॥ षडंह्राद्ये तुर्ये षादौ द्वितीये पञ्चमे चौ शेषे षाभ्यां चः पो वा कीर्तिधवलम् ॥ ३५ ॥ चतुरंह्रावोजे षश्चौ समे षचचाद्स्तो वा गुणधवलम् ॥ ३६ ॥ षचताः षचौ भ्रमरः ॥ ३७ ॥ षचताः षचचा अमरम् ॥ ३८ ॥ आद्ययोः षची अन्त्ययोश्चुः सर्वत्रान्ते तो दो वा मङ्गलम् ॥ ३९ ॥ उत्साहादिना येनैव धवलमङ्गलभाषागाने तन्नामाद्ये धवलमङ्गले ॥ ४० ॥ देवगानं फुल्लडकम् ॥ ४१ ॥ गाने चिदौ झम्बटकम् ॥ ४२ ॥ इत्युत्साहादिप्रकरणम् ।

इत्याचार्यश्रीहेमचन्द्रानुस्मृते छन्दोऽनुशासने
उत्साहादिप्रतिपादनः पञ्चमोऽध्यायः ॥

---

१ भ्रल्गाः पासौ P. २ A drops S. 29. ३ -मष्टषट्चतुष्पात् A.

षष्ठोऽध्यायः ।

सन्ध्याद्यौ कडवकान्ते च ध्रुवं स्यादिति ध्रुवा ध्रुवकं घत्ता वा ॥ १ ॥ सा त्रेधा षट्पदी चतुष्पदी द्विपदी च ॥ २ ॥ कडवकान्ते प्रारब्धार्थोपसंहारे आद्ये छड्डणिका च ॥ ३ ॥ ध्रुवायां छैः कलाभिः पादे षतौ पदौ वा ॥ ४ ॥ जैः पतौ षदौ चौ वा ॥ ५ ॥ झैः षतौ तिः पचौ वा ॥ ६ ॥ ञैश्चादौ षचौ पौ वा ॥ ७ ॥ टैश्चपदं पचदं षदतं चातौ वा ॥ ८ ॥ ठैश्चपतं षचदं पादौ चिर्वा ॥ ९ ॥ डैः पातौ चापौ षपतं वा ॥ १० ॥ ढैश्चिदौ षचचं वा ॥ ११ ॥ णैश्चितौ पिर्वा ॥ १२ ॥ तैः षचादं चीर्वा ॥ १३ ॥ थैः षचातं चिपौ वा ॥ १४ ॥ तृतीयषष्ठयोर्दशादिसप्तदशान्ताः कलाः शेषेषु सप्त षट्पदी षट्पदजातिरष्टधा ॥ १५ ॥ अष्टावुपजातिः[1] ॥ १६ ॥ नवावजातिः ॥ १७ ॥ चतुष्पदी वस्तुकं वान्तरसमार्धसमा सङ्कीर्णा सर्वसमा च ॥ १८ ॥ चतुष्पदी कला ओजे सप्ताद्याः षोडशान्ताः समे प्रत्येकं ऽैकाः सप्तदशान्ताः चम्पककुसुम–सामुद्रक–मल्हणक–सुभगविलास–केसर–रावणहस्तक–सिंहविजृम्भित–मकरन्दिका–मधुकरविलसित–चम्पककुसुमावर्ताः (१०) मणिरत्नप्रभा–कुङ्कुमतिलक–चम्पकशेखर–क्रीडनक–बकुलामोद–मन्मथतिलक–मालाविलसित–पुण्यामलक–नवकुसुमितपल्लवाः (९) मलयमारुत–मदनावास–माङ्गलिका–ऽभिसारिका–कुसुमनिरन्तर–मदनोदक–चन्द्रोद्योत–रत्नावल्याः (८) भ्रूचक्रणक[2]–मुक्ताफलमाला–कोकिलावली–मधुकरवृन्द–केतकीकुसुम–नव[3]विद्युन्माला–त्रिवलीतरङ्गकाणि (७) अरविन्दक–विभ्रमविलसितवदन–नवपुष्पन्धय–किन्नरमिथुनविलास–विद्याधरलीला–सारङ्गाः (६) कामिनीहासाऽपदोहक–प्रेमविलास–काञ्चनमाला–जलधरविलसिताः (५) अभिनवमृगाङ्कलेखा–सहकारकुसुममञ्जरी–कामिनीक्रीडनक–कामिनीकङ्कणकहस्तकाः (४) मुखपालनतिलक–वसन्तलेखा–मधुरालापिनीहस्ताः (३) मुखपङ्क्ति–कुसुमलतागृहे (२) रत्नमाला[4] चेति पञ्चपञ्चाशद्भेदाः ॥ १९ ॥ व्यत्यये सुमनोरमा–पङ्कज–कुञ्जर–मदनातुर–भ्रमरावली–पङ्कजश्री–किङ्किणी–कुङ्कुमलता–शशिशेखर–लीलालयाः (१०) चन्द्र-

---

१ महोपजातिः A. २ भ्रूवक्रणक A. ३ A drops नव. ४ -मालेति P.

हास-गोरोचना-कुसुमबाण-मालतीकुसुम-नागकेसर-नवचम्पकमाला-विद्याधर-कुब्जककुसुम-कुसुमास्तरणाः (९) मधुकरीसंलाप-सुखावास-कुङ्कुमलेखा- कुवलयदाम-कलहंस-सन्ध्यावली- कुञ्जरललिता-कुसुमावल्यः (८) विद्युल्लता-पञ्चाननललिता-मरकतमाला-ऽभिनववसन्तश्री- मनोहरा- क्षिप्तिका- किन्नरलीलाः (७) मकरध्वजहास-कुसुमाकुलमधुकर-भ्रमरविलास-मदनविलास-विद्याधरहास-कुसुमायुधशेखराः (६) उपदोहक-दोहक-चन्द्रलेखिका-सुतालिङ्गन-कङ्केल्लिताभवनानि (५) कुसुमितकेतकीहस्त-कुञ्जरविलसित-राजहंसा-ऽशोकपल्लवच्छायाः (४) अनङ्गललिता-मन्मथविलसित-ओहुल्लणकानि (३) कज्जललेखा-किलिकिञ्चिते (२) शशिविम्बितं चेति तावद्धा ॥ २० ॥ अन्तरसमा एव द्वितीयतृतीयांह्रिव्यत्ययेऽर्धसमाः ॥ २१ ॥ द्वित्रिचतुर्भिलक्षणैर्मिश्रा सङ्कीर्णा ॥ २२ ॥ समैः पादैः सर्वसमा ॥ २३ ॥ पचौ ध्रुवकम् ॥ २४ ॥ चौ दः शशाङ्कवदना ॥ २५ ॥ षपदाश्चातौ वा मारकृतिः ॥ २६ ॥ षचदाश्चिर्वा महानुभावा ॥ २७ ॥ षचताश्चापौ पातौ वाप्सरोविलसितम् ॥ २८ ॥ षचचाश्चिदौ वा गन्धोदकधारा ॥ २९ ॥ चितौ षचपा वा पारणकम् ॥ ३० ॥ चीः पद्धडिका ॥ ३१ ॥ चिपौ षचाता वा रगडाध्रुवकम् ॥ ३२ ॥

इत्याचार्यश्रीहेमचन्द्रानुस्मृते छन्दोऽनुशासने षट्पदी—
चतुष्पदीशासनः षष्ठोऽध्यायः ॥

सप्तमोऽध्यायः ।

द्विपदी ॥ १ ॥ दाचदालदाचदालि कर्पूरो गैः ॥ २ ॥ सोन्त्यलोनः कुङ्कुमः ॥ ३ ॥ चूं लयः ॥ ४ ॥ स भ्रमरपदं ञजैः ॥ ५ ॥ षचुदा उपात् ॥ ६ ॥ चूपौ गरुडपदम् ॥ ७ ॥ षचुता उपात् ॥ ८ ॥ चूदौ हरिणीकुलं ठजैः ॥ ९ ॥ तद्गीतिसमं ञजैः ॥ १० ॥ षुर्भ्रमररुतम् ॥ ११ ॥ षश्चूर्हरिणीपदम् ॥ १२ ॥ षीचताः कमलाकरम् ॥ १३ ॥ चूतौ कुङ्कुमतिलकावली ॥ १४ ॥

---

१ This Sûtra is dropped in P, being regarded as a part of the commentary. २ सर्वसमाः A.

ते रत्नकण्ठिके ठजैः ॥ १५ ॥ षचुपाः शिखा ॥ १६ ॥ चृतौ छद्दणिका ब्जैः ॥ १७ ॥ चृः स्कन्धकसमम् ॥ १८ ॥ तत् मौक्तिकदाम ठजैः ॥ १९ ॥ नवकदलीपत्र ढजैः ॥ २० ॥ षचूदैः कृतेष्वेषु स्त्रीत्वम् ॥ २१ ॥ चृपावायामकम् ॥ २२ ॥ तत्काञ्चीदाम ब्जैः ॥ २३ ॥ रसनादाम ठजैः ॥ २४ ॥ चूडामणिर्ढजैः ॥ २५ ॥ षचूतैः कृतान्यायामकादीन्युपात् ॥ २६ ॥ चृदौ स्वप्नकम् ॥ २७ ॥ तद्भुजङ्गविक्रान्तं ठजैः ॥ २८ ॥ ताराध्रुवकं ढजैः ॥ २९ ॥ नवरङ्गकं तजैः ॥ ३० ॥ षिश्चीः स्थविरासनकम् ॥ ३१ ॥ चृषौ सुभगम् ॥ ३२ ॥ षचीषचदाः पवनध्रुवकं ढजैः ॥ ३३ ॥ षचाषचिदाः कुमुदं ब्जैः ॥ ३४ ॥ तद्धाराक्रान्तं ठजैः ॥ ३५ ॥ चृतौ कन्दोट्टम् ॥ ३६ ॥ षाचुना भ्रमरद्रुतं ब्जैः ॥ ३७ ॥ तत्सुरक्रीडितं ठजैः ॥ ३८ ॥ सिंहविक्रान्तं ढजैः ॥ ३९ ॥ कुङ्कुमकेसरं तजैः ॥ ४० ॥ च्लृ बालभुजङ्गमललितम् ॥ ४१ ॥ षिचीदा उपगन्धर्वं ठजैः ॥ ४२ ॥ तत्सङ्गीतं ढजैः ॥ ४३ ॥ उपगीतं तजैः ॥ ४४ ॥ चृपौ गोन्दलम् ॥ ४५ ॥ षचृता रथ्यावर्णकं ठजैः ॥ ४६ ॥ तच्चचरी ढजैः ॥ ४७ ॥ अभिनवं तजैः ॥ ४८ ॥ चूषचताश्चपलम् ॥ ४९ ॥ चूषौ चावमृतम् ॥ ५० ॥ च्लृदौ सिंहपदम् ॥ ५१ ॥ तद्दीर्घकं ढजैः ॥ ५२ ॥ षश्चृः कलकण्ठीरुतम् ॥ ५३ ॥ षाचूदाः शतपत्रम् ॥ ५४ ॥ च्लृतावतिदीर्घं ढजैः ॥ ५५ ॥ षाचूता मत्तमातङ्गविजृम्भितम् ॥ ५६ ॥ चत्वारिंशत्कला एकद्व्यधिका वा मालाध्रुवकम् ॥ ५७ ॥ चो विजया ॥ ५८ ॥ पो रेवका ॥ ५९ ॥ षो गणद्विपदी ॥ ६० ॥ चतौ स्वरद्विपदी ॥ ६१ ॥ पदावप्सराः ॥ ६२ ॥ अष्टौ कला वसुद्विपदी ॥ ६३ ॥ चौ करिमकरभुजा ॥ ६४ ॥ चलदलाश्चन्द्रलेखा ॥ ६५ ॥ पतौ मदनविलसिता ॥ ६६ ॥ चपौ जम्भेट्टिका ॥ ६७ ॥ पचौ लवली ॥ ६८ ॥ सप्त कला दलौ चामरपुरसुन्दरी ॥ ६९ ॥ षचौ काञ्चनलेखा ॥ ७० ॥ पौ चारुः ॥ ७१ ॥ तषताः पुष्पमाला ॥ ७२ ॥ गाथात्रानुक्तम् ॥ ७३ ॥

इत्याचार्यश्रीहेमचन्द्रानुस्मृते छन्दोऽनुशासने द्विपदीव्यावर्णनो नाम सप्तमोऽध्यायः ॥

अष्टमोऽध्यायः ।

अथ प्रस्तारादयः षट् प्रत्ययाः ॥१॥ प्राक्कल्पाद्यगोऽधो लः परमुपरिसमं प्राक् पूर्वविधिरिति समयभेदकृद्वर्ज प्रस्तारः ॥ २ ॥ ग्लावधोऽधो द्विर्द्विरतः ॥ ३ ॥ नष्टाङ्कस्य[1] दले लः सैकस्य गः ॥ ४ ॥ नष्टाङ्के गणैर्हृते शेषसङ्ख्यो गणो देयो राशिशेषे लब्धं सैकम् ॥ ५ ॥ उद्दिष्टेऽन्त्याल्लाद् द्विर्गैकं त्यजेत् ॥ ६ ॥ आद्यमन्त्येन हृतं व्यधस्तनम् ॥ ७ ॥ वर्णसमानेककान् सैकानुपर्युपरि क्षिपेत्, मुक्त्वान्त्यं सर्वैकादि गलक्रिया ॥८॥ आद्यभेदानधोऽधो न्यस्य परैर्हृत्वाग्रे क्षिपेत् ॥ ९ ॥ ते पिण्डिताः संख्या ॥ १० ॥ वर्णसमद्विकहृतिः समस्य ॥ ११ ॥ ते द्विगुणा द्विहीनाः सर्वे ॥१२॥ समकृती राश्यूना अर्धसमस्य ॥ १३ ॥ तत्कृतिर्विषमस्य ॥ १४ ॥ विकल्पहृतिर्मात्रावृत्तानाम् ॥ १५ ॥ अङ्कान्त्योपान्त्ययोगः परे परे मात्राणाम् ॥ १६ ॥ द्विघ्नानेकाध्वयोगः ॥ १७ ॥

इत्याचार्यश्रीहेमचन्द्रानुस्मृते छन्दोऽनुशासने प्रस्तारादिव्यावर्णनो नाम अष्टमोऽध्यायः ॥

---

१ नष्टेऽङ्कस्य A.

जयदामाख्यः संस्कृतवृत्तकुसुमोच्चयः ।

(**Jayadāman** :— A Classified List of Sanskrit Metres.)

1 Jayadāman is a classified list of the old classical Sanskrit metres. It includes both Varṇa Vṛttas and Mātrā Vṛttas. It is divided into six sections namely, I Varṇavṛtta–Samacatuṣpadī; II Varṇavṛtta – Daṇḍaka; III Varṇavṛtta – Ardhasamacatuṣpadī; IV Varṇavṛtta – Viṣamacatuṣpadī; V Mātrāvṛtta – Dvipadī; VI Mātrāvṛtta – Catuṣpadī. In section I metres are arranged according to the alphabetical order of the Gaṇas which constitute their lines, but under 36 different heads which indicate the number of letters contained in a line. In section II the Daṇḍakas are arranged in an alphabetical order, so that their names will not again appear in the Alphabetical Index of all the names given at the end of this List. In section III the Ardhasama Varṇavṛttas are arranged in an ascending order of the number of letters in their first lines. In the remaining sections, the metres are arranged in groups of allied metres without any reference to the alphabetical order or the order of the number of letters in a line.

2 In section I the entries are as follows:–First the serial number under each head, then the Gaṇas (with figures indicating Yati, if any, within brackets) alphabetically arranged under each head, and lastly the names of the metres immediately followed by the references both in an alphabetical order. Sometimes, when the Yati is mentioned only by a few authorities it is shown by figures within brackets, immediately after the reference. In section II, I give first the serial number, then the name of the Daṇḍaka followed by the Gaṇas which constitute the line given within the brackets, and lastly the references in an alphabetical order. In section III, I first give the serial number, then the number of letters contained in the 1st and 2nd lines which

form a half, given within the brackets. These are followed by the Gaṇas which constitute the 1st and the 2nd lines, then the names and lastly the references in an alphabetical order. In section IV, I give the serial number, then the name, with the Gaṇas forming the 4 lines given within the brackets, and lastly the references.

3 The metres listed in the Jayadāman are collected from the following 10 old and important treatises on Sanskrit metres, arranged in an approximate chronological order:– 1. *Chandaśśāstra* of Piṅgala (P) : published in the Kavyamala Series NO. 91 (3rd edition), Bomby, 1938; 2. *Nāṭyaśāstra* of Bharata (Bh.) : Published in the Kashi Sanskrit Series, NO. 60, Benares, 1929 ; 3. *Jayadevachandas* of Jayadeva (Jd.) : Published in this volume ; 4. *Vṛttajātisamuccaya* of Virahāṅka (Vjs.) : Published in the Journal BBRAS., 1929, 1931 ; 5. *Ratnamañjūṣā* of an unknown Digambara Jain author (Rm.): Published by the Bharatiya Jnana Pitha, Durgakunda, Benares (In press) ; 6. *Svayambhūchandas* of Svayambhū (Sb.): Published in the Journal BBRAS., 1935 ; 7. *Vṛttaratnākara* of Kedāra (Vr.) : Critically edited in this volume; 8. *Chandonuśāsana* of Jayakīrti (Jk.) : published also in this volume; 9. *Chandonuśāsana* of Hemacandra (H.) with brief footnotes (Hc.): both published in this volume ; and 10 *Prākṛta Paiṅgalam* (Pp) : Published in the Bibliotheca Indica, Calcutta, 1902.

4 A few additional metres which are not given in these older works are added in this List (the choice being purely subjective) from the following five works, which with the exception of the first, are comparatively modern:– 1. Utpala's commentary on *Varāhamihira's Bṛhatsaṁhitā*, ch. 103, quoted by verses (Utpala, v.): Published in the Vizianagaram Sanskrit Series, vol. X, Benares, 1895 onwards ; 2. *Kavidarpaṇa* of an unknown author who knows Hemacandra (Kd.) : published in the Annals BORI., 1935–36 ; 3. *Chandomañjarī* of

Gaṅgādāsa (Chm.) : Published in the Kashi Sanskrit Series, NO. 55 , Benares , 1927 ; 4. *Mandāramarandacampū* (Mm.) : Published in the Kavyamala Series , NO. 52, Bombay , 1895 ; .and 5. *Chandaḥkaustubha* (Ckau.): From a Ms. NO. 894 of 1886–92 in the Bhandarkar Research Institute , Poona.

5 Prakrit metres defined in some of these works (Nos. 4, 6, 9, and 10) are not included in the Jayadāman. A List and an index of Prakrit metres collected from eight old works (including the above–mentioned ones), prepared on a similar plan is published at Journal BBRAS., 1946.

6 At the end, an Alphabetical Index of all the names of the metres occurring in the List (with the exception of the Daṇḍakas which are alphabetically arranged in section II) is given. The references in the Index are to the sections and the serial numbers under them, except in the case of Section I , where an additional reference to the head under that section is given before the serial number.

वर्णवृत्त : समचतुष्पदी

1

1 ग — गौ Vjs. 5. 1; श्री H. 2. 6; Pp. 2. 1.

2

1 गग — काम Pp. 2. 3; नौ Vjs. 5. 2; पद्म Jk. 2. 4; Hc. 2. 7; स्त्री H. 2. 7; Vr. 3. 2.

2 गल — शत्रु Jk. 2. 6; दुःख H. 2. 9; सार Pp. 2. 9.

3 लग — मही Pp. 2. 8; सुख H. 2, 10; Jk. 2. 5.

4 लल — पुष्प Hc. 2. 8; मद H. 2. 8; मधु Pp. 2 5; वलि Jk. 2. 7.

3

1 ज — मृगेन्द्र Pp, 2. 21; सुवस्तु Jk. 2. 13.

2 त — पञ्चाल Pp. 2. 19; सेना Jk. 2. 12.

3 न — कमल Pp. 2. 25; हकु Jk. 2. 15.

4 भ — मन्दर Pp. 2. 23; हृद्य Jk. 2. 14.

5 म — ताली Pp. 2. 11; नारी H. 2. 11; Vjs. 5. 3; Vr. 3. 3; श्यामाङ्गी Jk. 2. 8.

6 य — केशा H. 2. 12; Vr. 3. 4. 1; धूः Hc. 2. 12; धृति Bh. 32. 52; घन Jk 2. 9; शशी Pp. 2. 15.

7 र — तडित् Bh. 32. 50; प्रिया Pp. 2. 13; मृगी H. 2. 13; Vr. 3. 4; सुखी Jk. 2. 10.

8 स — प्रवर Jk. 2. 11; मदन H. 2. 14; रजनी Bh. 32. 54; रमण Pp. 2. 17.

4

1 जग — जया Bh. 32. 61; Jk. 2. 21; नगानिता (or °णिका) Pp. 2. 31; लासिनी Vr. 3. 5. 1; विलासिनी H. 2. 17.

2 जल — जपा Jk. 2. 29.

3 तग — तारा Jk 2. 20; सोमप्रिया H. 2. 22.

4 तल — वपु Jk 2. 28.

5 नग मधु Jk. 2. 23; मृगवधू H. 2. 19; Vjs. 5. 4; सती Chm. 2. 4. 2; Cku. 2. 6.

6 नल दधि Jk. 2. 31.

7 भग ललिता Hc. 2. 16; सुमुखी H. 2. 16; Jk. 2. 22; Vr. 3. 5. 2.

8 भल जतु Jk. 2. 30.

9 मग कन्या H. 2. 15; Vr. 3. 5; गीति Jk. 2. 16; तीर्णा Pp. 2. 27.

10 मल वल्ली Jk. 2. 24.

11 यग व्रीडा H. 2. 20; Vr 3. 5. 3; वृद्धि Jk 2. 17.

12 यल सद्म Jk. 2. 25.

13 रग ऋद्धि Jk. 2. 18; पुष्प Bh. 32. 57; समृद्धि H. 2. 18; Vr. 3. 5. 4.

14 रल धारी Pp. 2. 29; वर्त्म Jk. 2. 26.

15 सग भ्रमरी Bh. 32. 59; सुमति H. 2. 21; Jk. 2. 19; Vr 3. 5. 5.

16 सल कदली Jk. 2. 27.

5

1 जगग सती H. 2. 27; Jk. 2. 35; Vr. 3. 6. 1; शिखा Bh. 32. 71.

2 तगग तिष्ठगु Jk. 2.39; हारि Pp. 2. 35.

3 तलग नन्दा H. 2. 28; मन्दा Vr. 3. 6. 2.

4 नलग अभिमुखी H. 2. 32; कमलमुखी Bh. 32. 67; धृति Jk. 2. 41; मृगचपला Hc. 2. 32.

5 नलल यमक Pp. 2. 39.

6 भगग अक्षरोपपदा Hc. 2. 25; अक्षरपङ्क्ति Vjs. 5. 5; काञ्चनमाला Jk. 2. 33; कुन्तलतन्वी Hc. 2. 25; पङ्क्ति H. 2. 25; Vr 3. 6; भूतलतन्वी Bh. 32. 65; हंस Pp. 2. 37.

7 भलग रति H. 2. 26; शर्म Jk. 2. 36.

8 मगग विद्युद्भ्रान्ता Bh. 32.63; संमोहा Pp. 2. 33.

9 मलग सावित्री H. 2. 30.

10 यलग जया Kd. 4. 8.

11 रगग प्रीति H. 2. 23; Jk. 2. 32; Vr. 3. 6. 3.

12 रलग धृति Jk. 2. 34; वागुरा Bh. 32. 69; विदग्धक H. 2. 24.

13 सगग घनपङ्क्ति H. 2. 31; Bh. 32. 73; सुवृत्ती Jk. 2. 40.

14 सलग प्रिया Chm. 2. 5. 2; Cksu. 2. 8; रमा Jk. 2. 38.

6

1 जज सुमालती Pp. 2. 54.

2 तत मन्थान or कामावतार Pp. 2. 50.

3 तय तनुमध्या Bh. 16. 2; 32. 76; H. 2. 36; Jd. 6. 1; Jk. 2. 44; P. 6. 2; Rm. 5. 5; Vjs. 5. 6; Vr. 3. 7.

4 तर बला Bh. 32. 88; H. 2. 47.

5 तस वसुमती Vr. 3. 9.

6 नन दमनक Pp. 2. 56.

7 नय कनकलता Jk. 2. 46; चतुरंशा Pp. 2. 47; मकरशीर्षा Bh. 16. 4; 32. 80; मुकुलिता Rm. 5. 6; शशिवदना H. 2. 39; Vr. 3. 8.

8 नर गिरा Bh. 32. 86; मणिरुचि Jk. 2. 48; शफरिका H. 2. 43.

9 भम विक्रान्ता Bh. 32. 92; H. 2. 49.

10 भय कामलतिका H. 2. 41; Vr. 3. 9. 1; कामललिता Jk. 2. 45.

11 भर मालिनी Bh. 32. 78; लघुमालिनी H. 2. 45.

12 मम विद्युल्लेखा Vr. 3. 9. 2 (b); शेषराज Pp. 2. 41; सावित्री H. 2. 33; Jk. 2. 43; Vr. 3. 9. 2 (a).

13 मय तटी Jk. 2. 42; रम्या Bh. 32. 90; सुनन्दा H. 2. 48.

14 मर तटी H. 2. 34; नदी Vr. 3. 9. 3.

15 मस पङ्क्ति Bh. 32. 94; मुकुल H. 2. 42; Jk. 2. 47; वीथी Bh. 32. 84; Vr. 3. 9. 4 (v. l. अनुकूल; सोमकुल).

16 यम शिखण्डिनी H. 2. 51; Rm. 5. 8.

17 यय द्रुत Jk. 2. 50; शङ्खनारी Pp. 2. 52; सोमराजी H. 2. 38; Vr. 3. 9. 5.

18 रन कच्छपी H. 2. 44.

19 रम नीलतोया Bh. 32. 98; मालिनी Bh. 16. 6; H. 2. 40; Vr. 3. 9. 6.

20 रर द्वियोधा Pp. 2. 45; स्रग्विणी Vr. 3. 9. 7; हंसमाला Jk. 2. 51.

21 सभ गुरुमध्या H. 2. 37.

22 समग सूचीमुखी H. 2. 50; Rm. 5. 7.

23 सयग बिम्बका Bh. 32. 32; H. 2. 46

24 ससग कुमुद Jk. 2. 49; तिलक or तिलक Pp. 2. 43; नलिनी Bh 32. 96; रमणी H. 2. 35; Vr. 3. 9. 3.

7

1 जरग विलम्बिता Bh. 32. 123; सुभद्रा Bh. 32. 113; H. 2. 67.

2 जसग कुमारललिता H. 2. 54; Jd. 6. 2; Jk. 2. 56; P. 6. 3; Rm. 5. 10; Vr. 3. 11.

3 तजग मधुकरिका Bh. 32. 111; H. 2. 65; वज्र Ho. 2. 65.

4 तभग चूडामणि Vr. 3. 12. 1.

5 तसग भ्रमरमाला Bh. 16. 10; 32. 107; H. 2. 57; Jk. 2. 55; वज्रक Rm. 5. 11.

6 नजल सुवास Pp. 2. 60.

7 नजग द्रुतगति or चपला Bh. 32. 101; मधुमति Vr. 3. 12. 2; लटह Jk 2. 60; हरिविलसित H. 2. 63; Vjs. 5. 8.

8 नभग मधुमती Vr. 3. 12. 3.

9 नयग कुमुदवती H. 2. 68; कुसुमवती Bh. 32. 115.

10 नरग प्रकाशिता Bh. 32. 119; मनोज्ञा H. 2. 70.

11 नसल करहञ्च Pp. 2. 62.

12 भजग धुनी Jk. 2. 52; पञ्चमगति Bh. 32. 125; शारदी H. 2. 64.

13 भनग चित्र H. 2. 62; Jk. 2. 59.

14 भभग कलिका H. 2. 59; Jk. 2. 53; भोगवती Bh. 32. 109; सोपान Ho. 2. 59.

15 भसग मदलेखा Jk. 2. 61; विधुवक्त्रा H. 2. 60.

16 मभग सरल H. 2. 61; Jk. 2. 57.

17 ममग गान्धर्वी H. 2. 52; शीर्षरूपक Pp. 2. 64.

18 मसग मदलेखा H. 2. 55; Vjs. 5. 7; Vr. 3. 10.

19 यसग मुदिता Bh. 32. 117; H. 2. 69.

20 रजग   उष्णिह् H. 2. 58; कामिनी Bh. 32. 105; खेटक Vjs. 4. 76; गोमिनी Jk. 2. 58; रक्ता Vjs. 3. 7; शिखा He. 2. 58; समानिका Pp. 2. 58.

21 ररग   हंसमाला H. 2. 58.

22 रसग   उद्धता Bh. 16. 8; H. 2. 56.

23 सजग   विमला Bh. 32. 103; H. 2. 68.

24 सरग   दीप्ता Bh. 32. 121; H. 2. 71; हंसमाला Vr. 3. 12.

8

1 जतगग   वितान Vr. 3. 19.

2 जरगल   सुचन्द्रप्रभा Ckau. 2. 27.

3 जरलग   नगस्वरूपिणी Sham. 3. 8. 3; नाराचक Vjs. 4. 58; प्रमाणिका H. 2. 82; Jd. 5. 4; Jk. 2. 65; P. 5. 7; Vr. 3. 18; मत्तचेष्टित Bh. 16. 14; 32. 306 (Nsp.); स्थिर Utpala, v. 38.

4 तजलग   अनुष्टुभ् Jk. 2. 62; Bṛhajjātaka 6. 3–4.

5 ततगग   केतुमाला Jk. 2. 71.

6 तरगग   विभा H. 2. 72.

7 तरलग   नाराच (or °चिका) H. 2. 78; Jk. 2. 70; Vr. 3. 19. 2 (ab).

8 तसगग   श्यामा Vjs. 5. 10.

9 नजगग   चित्तविलासित Bh. (Gaek. ed.) 15. 26.

10 नजलग   ललितगति Bh. 32. 180–81; H. 2 80.

11 ननगग   तुङ्ग Pp. 2 72; मधुकरसदृशाख्या Bh. 32. 185; रतिमाला H. 2. 86.

12 ननलग   कुसुम Vjs. 5. 14.

13 नभलग   गजगति Chm. 2. 8. 6.

14 नरलग   सुमालती H. 2. 76; Jk. 2. 72.

15 नसगग   गुणलयनी H. 2. 84.

16 नसलग   कमल Pp. 2. 74; मही Bh. 32. 183.

17 भतलग (4, 4) माणवक H. 2. 77; Jd 6. 5; Jk. 2. 69; P. 6. 4; Vr. 3. 15; माणवकक्रीडितक Rm. 5. 18; Vjs. 5. 12.

18	भनलग	नदी Bh. 32. 139.
19	भभगग	चित्रपदा H. 2. 75; Jd. 6. 3; Jk. 2. 68; P. 6. 5; Rm. 5. 14; Vr. 3. 14; वितान. Jk. 2. 67; Vjs. 5. 11.
20	भरलग	नागरक Vr. 3. 19. 2.
21	मनगग	हंसरुत H. 2. 79; P. 6. 7; Vr. 3. 16.
22	ममगग	विद्युन्माला H. 2. 74; Jd. 6. 4; Jk. 2. 64; P. 6. 6; Vjs. 5. 9; Vr. 3. 18; विद्युल्लेखा Bh. 16. 16.
23	मरलग	क्षमा Jk. 2. 63.
24	रजगग	मानिनी Vjs. 3. 8; मालिनी Vjs. 5. 13; सिंहलीला Bh. 16. 12; सिंहलेखा H. 2. 81; Vr. 3. 19. 3.
25	रजगल	समानी H. 2. 83; Jd. 5. 3; Jk 2. 66; P. 5. 6; Rm. 5. 1; Vr. 3. 17.
26	रयलग	अनुष्टुप् H. 2. 69; हंसिनी Vjs. 4. 72.
27	ररगग	पद्ममाला Oksu. 2. 26.
28	रसगग	गाथ Vjs. 4. 57.
29	सनलग	विमलजला Bh. 32. 123.
30	सरगल	सुविलासा Oksu. 2. 28.
31	ससलग	मही H. 2. 85.

9

1	जतर	चारुहासिनी Jk. 2. 77.
2	तनम	कनकलता Bh. 32. 200; मकरलता H. 2. 102.
3	तभय	रुचिरा Bh. 32. 142; H. 2. 100.
4	नजय	शशिलेखा Bh. 32. 204; H. 2. 103.
5	नजर	बुद्बुद Bh. (Nsp.) 32. 284.
6	ननम	मधुकरिका Bh. 16. 18; भुजगशिशुसृता H. 2. 91; Jd. 6. 7; Jk. 2. 78; P. 6. 7; Rm. 5. 16; °भृता Vr. 3. 21.
7	ननर	उपच्युत H. 2. 95; Jk. 2. 82.
